ष्यते जातूकर्ण्यः वस्त्रोत्तरीयाभावे अंगुलं वस्त्रं गुलं वा सूत्रैर्वस्त्राकृतिर्मंगलं तदुत्तरीयं कुर्याद्धस्तसवीवर्द्धं वा उत्तरीया
भावे तु धौतवस्त्रस्यार्धभागेनोत्तरीयं कुर्यात् तथा च पारस्करः एकं चेद्वासो भवति तस्यैवोत्तरीयेण प्रच्छादयतीति या
नीश्वरः व्रतादेशेनाद्र्वावासानैकवासास्यलेजपेत् कषायं हस्तवस्त्रं च मालिनं केशाहूषितं छिन्नाग्रं चोपवस्त्रं च कृत्या।

७५

न॰ पा॰
१२७

वः विमानित्ययं प्रक्तो ब्राह्मणभोजनात्पूर्वमेव पिण्डदानाभिप्रायेण कात्यायनः एतद्दहनिस्रवाणिप्रतिपिण्डं
वयस्त्वन्तरेयजमानस्सलोमानिवेति शंखः दशांविवर्जयेन्नाज्ञोयथप्यहतवस्त्रजा अत्रसर्वत्रयथाशाख
व्यवस्था पुत्रार्थिनोमध्यमापिण्डम्पत्निपत्निराश्वलायनेनोक्तापिण्डानांमध्यमंपत्नीप्राशयेदिति अत्रम
न्त्रः आधत्तपितरोगर्भंकुमारंपुष्करस्रजं यथेहपुरुषोसदिति देवलः ततः कर्माणिनिवृत्तेतान्पिण्डांस्तद
नंतरं ब्राह्मणोग्निरजोगौर्वाभक्षयेदप्सुवाक्षिपेत् एवंस्वगृह्योक्तविधिनाब्रह्मविसर्जनान्तं कृत्वापितृ
शेषंबंधुभिः सहभुंजीत आवश्यकोपवासेवितमाग्रायोपवासयेत् तथाचस्मृतिः अवघ्रेयमेवतन्नैवप्रा
श्नीतंनैवप्राशितमिति शातातपः श्राद्धंकृत्वापरश्राद्धेभुंजतेयेतुमोहिताः पतंतिपितरस्तेषांलुप्तपिं
डोदकक्रियाः पुनर्भोजनमध्वानंभाराध्यापनमैथुनं दानंप्रतिग्रहंहोमंश्राद्धकृदष्टवर्जयेत् यमः द
शकृत्वः पिवेदंतुगायत्र्याश्राद्धभुग्द्विजः ततः संध्यामुपासीतजपेज्जुहुयादपि एवंप्रतिमासंदर्शेपा
र्वणश्राद्धंकर्तव्यं एवंप्रतिसांवत्सरिकादीन्यपिपार्वणश्राद्धादिकर्तव्यानि तत्रमातापित्रोर्विषयेयः पा
र्वणैकोद्दिष्टविकल्पः सस्वशाखानुसारेणव्यवस्थितोविज्ञेयइतिविज्ञानेश्वरमते एतच्चोपपादितम १२७

कुर्वीतपार्वणे एकोद्दिष्टेविल्वमात्रंपिण्डमेकंतुनिर्वपेत् नवश्राद्धेस्थूलत्वंनतस्मादपितुअनिर्वपेत् तस्मा
दपिस्थूलतरमाषौचेप्रतिवासरं पिण्डः उच्छिष्टसन्निधौदक्षिणाग्रेषुदर्भेषुपृथिवीदर्विरक्षितेते
द्वितीयंपितामहाय द्यौर्दर्विरक्षितेतितृतीयंप्रपितामहाय येत्रपितरः प्रेताइतिवासोदेयंवीरणन्न
पितरोदत्तइत्यन्नमत्रपितरोमादयध्वमितिदर्भमूलेकराच चर्षणऊर्जंवहंतीत्यनेनसोदकेवाप्रदक्षि
णंपिण्डानांविकरणंकृत्वा चंदनपुष्पधूपानुलेपनान्नाद्यमन्नभाज्यंनिवेदयेदिति मन्त्रः अपसव्यमग्नौकृ
त्वासव्यंमान्नत्वाविप्रा मम अपसव्येनहस्तेनानिर्वपेदुदकंभुवि त्रीस्तुतस्माद्दिभ्योपापिण्डान्कृत्वासमा
हितः उदकेनैवविधिनानिर्वपेदक्षिणामुखः नुप्यापिण्डांस्तुतस्मात्प्रयतोविधिपूर्वकम् तेषुद
र्भेषुतंहस्तंनिमृज्याल्लेपभागिनाम् आचम्योदकमाहत्यत्रिरायम्यशनैरसून् षड्ऋतूंश्चनमस्कुर्यात्पितॄ
न्नेवचमंत्रवत् अत्रनमस्कारोनमोवः पितरइत्यादिभिः तथाचमत्स्यपुराणे नीवींविस्रस्यचजपेन्न
मोवःपितरस्स्विति मन्त्रः उदकंनिनयेत्शेषंशनैःपिण्डान्तिकेपुनः अवजिघ्रेच्चतान्पिण्डान्न्युप्तान्समा न्यथार
हितः पिण्डेभ्यःस्वल्पिकामात्रांसमादद्यादनुपूर्वशः तानेवविप्रानासीनान्विधिनापूर्वमाशयेत् तान्

यवस्थयाग्नौकरणं विधानात्कुर्यात् तदनंतरं याज्ञवल्क्यः सव्याहृतिकां गायत्रीं मधुवाता इति त्र्यृचं जप्त्वा यथासुखं
वाच्यं भुंजीरंस्तेऽपि वाग्यताः गायत्रीं त्रिः सकृद्वा जप्त्वा मधुवातेत्यृचं मधुमध्विति त्रिकमुच्चार्य यथासुखं जुष
ध्वमिति वचनानंतरं ते ब्राह्मणा मौनिनो भूत्वा भुंजीरन्नित्यर्थः वसिष्ठः उभयोः शाखयोर्मुक्तं पितृभ्योन्नं
निवेदितं तदंतरं प्रतीक्षंते ह्यसुरा दुष्टचेतसः तस्मादशून्यं हस्तेन कुर्यादन्नमुपागतं भाजनं वा समाल-
भ्यतिष्ठेदोच्छेषणाद्बुधः उभयोः शाखयोर्हस्तयोर्मध्ये एकेन हस्तेन यदि मुक्तं पितृभ्यो दत्तमन्नं तद्देवान
रमक्षाशोरहा तस्मादशून्यं कुर्यादित्यर्थः भारद्वाजः पितृणामन्नमादाय बलिं यस्तु प्रयच्छति ले
पेन ब्राह्मणास्तेन सर्वे च स्तेयकृद्भवेत् पितृणामन्नं यद्विश्वेदेवार्थं पित्र्यार्थं वान्नं याज्ञवल्क्यः अन्ना-
मिष्टं हविष्यं च दद्यादक्रोधनोऽत्वरन् आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वं जपं तथा पवित्राणि पावमानप्रभृतीनि
श्र्यं च जपतप्रवीतिना कार्यः कृत्वापसव्यं कुर्वंति मन्त्रा यस्त अग्रतो जपमिति निगमस्मरणात् जमद
ग्निरपि अपसव्येन कर्तव्यं सर्वं श्राद्धं यथाविधि सूक्तस्तोत्रजपमुक्त्वा विप्राणां च विसर्जनमिति ततश्च
सव्याहृतिकगायत्रीमधुवातेत्यादिजपः कार्यः तथा अन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य च तदन्नं वि

कर्वेहं मौरयाप्स्याप: स्वाहेत्यनलेन अनग्नौकरणार्थं गां तृप्तार्थं च सर्वमन्नमुपाधाय सतिलं दक्षिणामुखः तच्छि
ष्टं: सन्निधौ पिण्डान्दद्यात् पितृयज्ञवत् मातामहानामप्येवं दद्यादाचमनं ततः स्वस्तिवाच्यं ततः अर्घ्यादक्षय्योद
कमेव च दत्वा तद्दक्षिणां शक्त्या स्वधाकारमुदाहरेत् दक्षिणादानमुपवीतिना कार्यं तथा च जमदग्निः
सर्वकर्मापसव्येन दक्षिणादानवर्जितम् याज्ञवल्क्यः वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः स्वधोच्यतां
वृष्टुरस्तु स्वधेत्युक्ते भूमौ सिंचेत्ततो जलम् विश्वेदेवाश्च प्रीयन्तां विप्रैश्चोक्ते इदं जपेत् दातारो नोभिवर्धन्तां
विप्रैश्चोक्ते इदं जपेत् दातारो नोभिवर्धन्तां वेदाः संततिरेव च श्रद्धा च मानो व्यगमद्बहु देयं च नोस्त्विति
यास्मिंस्ते संस्रवाः पूर्वमर्घ्यपात्रे निपातिताः पितृपात्रं तदुत्तानं कृत्वा विप्रान्विसर्जयेत् मनुः पिण्डनि
र्वपणं केचित्पुरस्तादेव कुर्वते ब्राह्मणभोजनात्प्रागर्चनानन्तरं अग्नौकरणानन्तरं केचित्पिण्डदानं ऊर्ध्वं
नरस्तर्थः आश्वलायनः भुक्तवत्स्वनाचांतेष्वपि पिण्डान्निदध्यादाचांतेष्वेक इति अत्र यथाशाखं व्यवस्था
जातूकर्ण्यः व्याममात्रं समुत्सृज्य पिण्डांस्तत्र प्रदापयेत् व्यासः अरत्निमात्रमुत्सृज्य पिंडांस्तत्र प्रदापयेत्
यत्रोपस्पर्शिना ह्यापि प्राप्नुवंति न विन्दवः वायुपुराणे पिण्डानन्तरं मरीचिः अग्रमलकमात्रांस्तु पिंडा
इत्युक्तो त्वा प्रियवचः प्रणिपत्य विसर्जयेत् वाजेवाजे इति प्रीतः पितृपूर्वं विसर्जयेत् ६

स. पा. ६ यांभक्षयेद्दन्तधावनं निराशास्तस्यगच्छंति देवताःपितरोऽभिः सहेति षत्रस्त्रमध्याह्नस्नानविषयं [illegible]मः मंगलविधिः
तत्रविष्णुपुराणे पातकस्त्रततः कुर्यात्समान्केशप्रसाधनं आदर्शांजनमांगल्यं दूर्वाद्यालंभनानिच ब्रह्मपुराणे स्वमात्मा।
नं घृतेनपश्येद्यदीच्छेच्चिरजीवितं प्रातःस्नानंततःकृत्वासंध्योपासनंयथोदितम् प्रातःस्नानंततःकृत्वासंध्योपासनयथोदितं सं
ध्यांवापितृयाकुर्यादिति प्रातः संध्यासमनंतरं याज्ञवल्क्यः हुत्वाग्नीन्सूर्यदैवत्यांजपेन्मंत्रान्समाहितः वेदार्थानधिगच्छे स
च्छास्त्राणिविविधानिच प्रातःसंध्यावन्दनानंतरं अग्नीनाहवनीयादीनौपासनाग्निंवाविधिवद्धुत्वासूर्यदैवत्यानुदितसंज्ञा
तवेदसामित्यादिकांजपेत् प्रातःसंध्यादिकंब्रह्मचारिकस्तवकेप्रपंचितं होमविधिस्तुगृहस्थस्तवकेप्रपंचितः नारसिं
हपुराणे दिवसस्याद्यभागेतुसर्वमेतत्समाचरेत् दिवसस्याद्यभागेपूर्वाह्णस्याद्यभागे दक्षः द्वितीयेचतथाभागे।
वेदाभ्यासोविधीयते वेदस्वीकरणंपूर्वंविचारोभ्यापनंजपः तद्दानंचैवशिष्येभ्योवेदाभ्यासोहिपंचधा समित्पुष्पकु
शादीनामकालःसमुदाहृतः उपादानस्येतिशेषः द्वितीयभागेपूर्वाह्णस्यद्वितीयभागे अथपोष्यवर्गचिंतादिः तत्र
पोष्यवर्गश्चमातागुरुः पिताभार्याप्रजादीनःसमाश्रितः अभ्यागतोतिथिश्चाग्निःपोष्यवर्गउदाहृतः याज्ञवल्क्यः उपे
यादीश्वरंचैवयोगक्षेमार्थसिद्धये ईश्वरमभिषेकादिगुणयुक्तं अप्रमत्तंवाश्रीमंतमर्थयाचितं अलब्धस्यप्रापणंयोगः।

स्नभक्षयेत्सूर्वप्रत्यासैवचमसनजेत् नारदः खदिरश्चकरंजश्चकरवीरकदम्बयोः सर्वेकंटकिनः पुण्याः क्षीरिणश्चयशस्वि
च२ नः संबुतिर्मकत्तृताश्चकदम्बोलोद्रमकाः बदरीतिन्दुकास्त्वेते प्रशस्तादंतधावने कोविदारः करंजश्च कुटजलदमा।
लती सालोर्कश्चप्रियंगुश्चतमालः शाकपवचच शाकाः शाकद्रुमाः शाकवन इति लोके प्रसिद्धः आम्राम्रातकोविमेदश्च
प्रशस्तान्यपियेद्रुमाः वर्ज्यानिस्नाल्मलीपीलुभल्लिकिंशुकतिन्दुकाः अरिष्टाद्याः परिभद्रोगुल्गुलुस्तिलितिणी तथाश्मस
नेशयनेयानेपादकेदंतधावने पालाशमाश्वस्यकौहृतौसर्वकर्मसु उत्थितौ अभावेदंतकाष्ठानांनिषिद्धायांतथातिथौ।
अपांद्वादशगंडूषैः प्रत्रैर्वादंतधावनं चतुर्दश्यष्टमीषष्ठीपौर्णमासेषुचनन्दासुचनवम्यांचदंतकाष्ठंविवर्जयेत् आद्धेय।
न्तेचनियमेनतथाप्रोषितभर्तृका विष्णुः प्रतिपद्दर्शषष्ठीषुचदशम्यष्टमीषुच नवम्यांभानुवारेचदंतकाष्ठंविवर्जयेत् म
रीचिः नाद्यादजीर्णवमथुकासश्वासज्वरार्दितः तृष्णास्यपाकहृन्नेत्रशिरःकर्णामयीतथा वृद्धयाज्ञवल्क्यः इष्टकालोष्ठ
पाषाणैर्नतर्जन्यंगुलिभिस्तथा मुक्त्वाचानामिकांगुष्ठेवर्जयेद्दंतधावनं वराहपुराणे आज्ञातवृक्षाणिनदंतकाष्ठान्यथा
न्नपत्रैश्चसमन्वितानि नयुग्मपूर्णानिनपाटितानिनचोर्ध्वशुष्काणिविनात्वचावा व्यासः योमोहात्स्नानतोन्यत्रभक्षये त
द्दंतधावनं निराशास्तस्यगच्छंतिदेवतापितृभिस्सहेति एतच्चमध्याह्नस्नानविषयं तथाचयमः मध्याह्नस्नानवेला

न्वितं क्षीरवृक्षाणां यागुल्माद्भवेद्दंतधावनं कात्यायनः उत्थायनेत्रप्रक्षाल्य शुचिर्भूत्वा समाहितः परिजप्य च मंत्रेण भक्षयेद्दं
तधावनं मंत्रमाह विष्णुः आयुर्बलंयशोवर्चःप्रजापशुवसूनि च ब्रह्मप्रज्ञां च मेधां च त्वंनो देहि वनस्पते इति गर्गः दशांगुलंतु
विप्राणांक्षत्रियाणां नवांगुलं अष्टांगुलं तु वैश्यानामितरेषां षडंगुलं चतुरंगुलमानं तु नारीणां नात्र संशयः विष्णुः द्वादशां
गुलकं विप्रे कार्यमाहुर्मनीषिभिः क्षत्रविट्शूद्रजातीनां नवषट्चतुरंगुलं एवं विकल्प्य परिमाणे तथान्यापि विशेषस्तेने
वोक्तः कनिष्ठिकाग्रवत्स्थूलं पर्वार्धकृतकूर्चकं दंतधावनमुद्दिष्टमित्युक्त्वा सुसूक्ष्मं हीनदंतस्य समदंतस्य मध्यमं स्थूलंवि
षमदंतस्य त्रिविधं दंतधावनम् गर्गः प्राङ्मुखस्य धृतिः सौख्यं शरीरारोग्यमेव च दक्षिणेन तथा कष्टं पश्चिमेन पराजयः
उत्तरेण गवां नाशः स्त्रीणां परिजनस्य च मार्कंडेयः उदङ्मुखो वा कषायतिक्तं सकंटकमिति उदंमुखः प्राग्दंमुखवद्नर्थः
अस्मस्या गर्गवचनेन विरोधात् अनेनैवाभिप्रायेण कात्यायनः पूर्वोत्तरे तु दिग्भागे सर्वान्कामानवाप्नुयादिति महाभार
ते दंतधावनप्रकरणं प्रक्षाल्य हस्तौ पादौ च मुखं च सुसमाहितः दक्षिणं बाहुमुद्धृत्य कृत्वा जान्वंतरा नरः मनुः प्रक्षाल्य
दंमुखो वाग्यतो दंतधावनमुत्सृजेत् पतितेभिमुखेस्यादभोजमाप्रसंधाय यमः आम्रपालाशबिल्वानामपामार्गशिरीष
योः भक्षयेत्प्रातरुत्थाय वाग्यतो दंतधावनं पालाशः आम्रतकः मार्कंडेयोपि प्रातर्भुक्त्वा च यतवाग्मनोस्य दंतधावनं प्रक्षा

वीरायंजनं व्रासमुहूर्तेलते ब्रह्मचारिप्रकरणेभिहितं विष्णुः उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितं मरणव्याधिशोका
नां किमद्य निपतिष्यति इति संचिंत्येष्टदेवतां स्मरेत् प्रायनाडास्थितो यस्तु कीर्तयेन्मधुसूदनं कीर्तनात्तस्य पापानि नाशमा
यांत्यशेषतः स्कंदपुराणे अविभक्तचरणकमलयुगलं दक्षिणामूर्ते चऊकूटवत्तुषः स्मरणमपि वाराणस्यां निहं
ति दुःस्वप्नमवद्यकृतमाते कात्यायनः शोचनाचंदनं गांधमृद्वंगादर्पणमणिम् गुरुमग्निं रविं पश्येन्नमस्येत्प्रातरेव हि ॥
श्रोत्रियं सुभगां गामग्निं गां नृपं धार्मिकं नदीम् प्रातरुत्थाय यः पश्येत्स आपद्भ्यः प्रमुच्यते अत्र मूत्रपुरीषोत्सर्गादिविधिस्तु ब्रह्मचा
रिप्रकरणेभिहितः अथ दंतधावनं तत्र यमः मुखे पर्युषिते नित्यं भवेदप्रयतो नरः तदार्द्रकाष्ठं शुष्कं वा भक्षये
द्दंतधावनं विष्णुः कंटकिक्षीरवृक्षोत्थं द्वादशांगुलमात्रं कनिष्ठकाग्रवत्स्थूलं कूर्चाग्रं सत्वगपर्वकं दंतकाष्ठस्या
ग्रं भक्षयित्वा प्रशिथिलावयवं कर्तव्यमित्यर्थः सर्वार्थकृतकूर्चकमित्यपि पाठः यदि दंतकाष्ठं पूर्वयुक्तं भवति तदा
पर्वद्वयमध्यभागं स्थित्वा तत्र कूर्चकं प्रशिथिलावयवं कर्तव्यमिति तात्पर्यार्थः अथवा पर्वशब्देनांगुलीपर्वनिर्दिश्यते
पर्वार्धपरिमाणेन दंतकाष्ठस्याग्रं प्रशिथिलावयवं कर्तव्यमित्यर्थः दंतधावनं चाग्रेण कर्तव्यं तथा च कूर्मपुराणे मध्यां
गुलसमस्थौल्यं द्वादशांगुलसंमितं सत्वचं दंतकाष्ठं स्यात्तदग्रेण तु धावयेत् मनुः तिक्तं कटुकषायं वा सुगंधं कंटका

म. पा. ५९

र्येद्रियाविषयवाञ्छावित् गंधद्रव्यस्य सम्भोगो नैव कार्यस्तथा पुनः तर्पणं प्रत्यहं कार्यं भर्त्तुः कुशतिलोदकैः तर्पणं पुत्रपौ।
त्राभावविषयं विष्णोस्तु पूजनं कार्यं पतिबुद्ध्या न चान्यथा पतिमेव सदा ध्यायेद्विष्णुरूपधरं परं यद्यदिष्टतमं लोके यद्यत्पत्युः
समीहितं तत्तद्गुणवते देयं पतिप्रीणनकाम्यया वैशाखे कार्त्तिके माघे विशेषान्नियमं चरेत् स्नानं दानं तीर्थयात्रां विष्णोर्ना।
मग्रहणं मुहुः एवं विधैस्तु विधिवद्विधिस्यैर्नियमव्रतैः वैशाखीं कार्त्तिकीं माघीमेवमेवातिवाहयेत् नाधिरोहेदनड्वाहं प्रा
णैः कंठगतैरपि कंचुकं न परीदध्याद्वासो न विकृतं वसेत् अपृष्ट्वा च सुतान् किंचिन्न कुर्याद्भर्तृतत्परा एवं धर्मसमायुक्ता विधि।
वापि पतिव्रता पतिलोकमवाप्नोति न [illegible] पिडःखितेति श्रीमदनपारिजाते मदनादितिपालदनानकृते स्तवको द्वि।
तीयः आसीदामोदहृष्टपंडितभ्रमरः मतिर्येषां प्राप्य प्रकृतिरमणी यावद्वृत्तिः परामोदं ज्ञात्वा जगति कुरुतवेल्लकनिष
येविदं चित्रं तेषां मुदं रतलक्ष्मणोस्त्विति मियादियं व्यासारण्यप्रवरमुनिशिष्यस्य भणितिः गृहस्थस्तवकानंतरं गृहस्थोपा।
योगित्वादाह्निकमारभ्यते अत्र विष्णुः गृहमेधिनियमोक्तं स्वर्गसाधनमुत्तमम् ब्राह्मे मुहूर्ते चोत्थाय तत्सर्वं समाचरेत्॥
मनुरपि ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिंतयेत् कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च विष्णुपुराणे मैत्रेय प्रसाधनं स्ना
नं दंतधावनमंजनम् पूर्वाह्णएव कुर्वीत देवतानां च पूजनं मैत्रेयमित्रदेवसंमूहंचषरीषोत्सर्गः प्रसाधनेकार्यानो अंजनंसे

ह्री नेष्टतोयमकिंकारैः तिष्ठते विवशो दीनश्चेष्टमानः स्वकर्मभिः व्यालग्राही यथा व्यालं बलादुद्धरते बिलात् तद्वद्भर्तारमादा
यद्दिवं याति च सा बलादिति फलदानानुत्पन्नसुखं स प्रारब्धं कर्मशायशक्तिस्थानीयेनानुगमनेन यथा विनश्यति तदा फल
दानानुत्पन्नसुखमपि तेनैव पापशाठ्यत्त विशेषाभावादिति चेत् न पुनानीत्यनुक्तपापनिवृत्तिः कल्पते कल्पना चानुपपन्नविवशा.
त् सा वानुपपन्निर्यावतिकाल्पितेऽसाम्पतिता वत्कल्पनीयं तथा च फलोन्मुखप्रारब्धकर्मनिवृत्त्यापि पुनातीत्यस्य चरितार्थ
त्वात् न सकलपापनिवृत्तिः परिकल्पनीया यत्तु क्रमन्यानिष्टेनानुगमनेनासमगतदुरितनिवृत्तिरयुक्तेति तदपेशलं पति
पत्न्योः सहकर्तृत्वेनाग्निहोत्रादिसाध्य स्वर्गादिवदुपपत्तेः उक्तं च दुरितं जन्मांतरकृतमेव निवर्तयत जन्मकृतसदुरितयुक्त
स्य पतितत्वेन तेन सहानुगमनानधिकारात् वैधव्यपालने यि स्वर्गादिफलविशेषः स्मृत्यंतरे स्मर्यते पत्यौ मृते च या योषि
द्वैधव्यं पालयेत्क्वचित् सा पुनः प्राप्य भर्तारं स्वर्गलोकान्समश्नुते विधवाकबरीबंधो भर्तृबंधाय जायते शिरसो वपनं तस्मात्
कार्यं विधवया सदा एकाहारः सदा कार्यो न द्वितीयः कदाचन त्रिरात्रं पंचरात्रं वा पक्षव्रतमथापि वा मासोपवासं वा कुर्याच्चा
वा न्द्रायणमथापि वा कृच्छ्रं पाराकं कुर्यात्तप्तकृच्छ्रमथापि वा यवान्नेन फलाहारैः शाकाहारैः पयोव्रतैः प्राणयात्रां प्रकुर्वीत यावत्
प्राणाः स्वयं व्रजेत् पर्यंकशायिनी नारी विधवा पातयेत्पतिम् तस्माद्भूशयनं कार्यं पतिसौख्यसमीहया नैवांगोद्वर्तनं का

म. प्रा. ५८ त२

शेषशास्त्रविषयमुत्सर्गप्रवर्त्तते तद्वदत्रापि न काचिद्विरोधः ननु ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्सतिः पुनास्त्र।
विधवा नारीतमादाय म्रियेत या इमे वमादि हारीतादि वाक्यानि ब्रह्महत्यादिदोषनिवृत्तिमनुगमनेनाभिदधाति एतद
नुपपन्नं शास्त्रफलं प्रयोक्तरितलक्षणत्वादिति न्यायेनापूर्वफलयोः कर्तृसमवेतत्वात्परनिगतदुरितापूर्वसपत्नीगता
नुगमनान्निवृत्तिः निवृत्तावभ्युपगमे तु कार्यकारणयोः समानाधिकरणशास्त्रसिद्धं व्याहन्येतेति चेत् बाढं ब्रह्मघ्नो वे
त्यादीनि वाक्यानि अनुगमनविधिशेषत्वेनार्थवादत्वादनुगमनस्य प्रशस्त्यं वर्णयंति अतो न स्वार्थे प्रमाणानि युक्तमेवा
र्थवादत्वं ब्रह्महत्यादिदोषदुष्टस्य पतितस्य संस्कारमेव तावन्नार्हतीति दूरेनुगमनं अतः प्रशस्त्यपराणीति न काचि
दनुपपत्तिः एवं वा हि विधिकर्मप्रारब्धं चेति नेत् प्रारब्धकर्मणो भोगादेव क्षयात् प्रारब्धमपि अनुगमनरूपप्रतिबं।
धकेन प्रतिबद्धं विद्यमानमप्यविद्यमानमिव सदुदास्ते तया चानुगमनफलं स्वर्गादिकमनुभूय पश्चात्प्रारब्धशेषमु
पभुंक्ते अप्रारब्धमपि कर्म हि विधं फलदानोन्मुखमनुन्मुखं च यदुन्मुखमप्रारब्धं कर्म तदनुगमनेनापनोद्यते आ।
पातित्वेन च अपरयापतिपत्योः स्वर्गसाधनत्वेनोपदिश्यमानानुगमनेन साध्यस्वर्गाद्युपपत्ते पुनास्त्रिविधवानारीतमा
दायम्रियेतयेसत्रवं [illegible]सेन देवमनसि कृत्वा व्यासोप्याह यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः सम्प्राप्तो यातनास्था। ५८
पुनास्येतदप्यनुपपन्नं तत् यस्कृत्तयानायोः मुखमप्रारब्ध कर्मतस्यानिवृत्तिरनुगमनेन न घटती

शोषस्मरणात् इदं चान्वारोहणमनित्यं अन्वारोहणस्य स्वर्गादिफलयुक्तत्वेन काम्यत्वात् अत एव विकल्पमाह विष्णुः मृ
ते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वेति देशान्तरमृतेऽप्येवं ब्राह्मण्यास्तदस्थिभिः सहानुगमनं भवत्येव इतरासां तु अस्याभा
वेऽपि यस्मिन् पादुकादिकं चिह्नं किमपि गृहीत्वा चिह्नाभावेऽपि भवति इत्याकीलस्मृत्युक्तानात् ननु च पतिव्रताया इदमनुगम
नं नित्यमेव तथा च हारीतः आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा मृते म्रियेत या पत्यौ सा साध्वी ज्ञेया पतिव्रता अ
त्र मृते या म्रियेत सा पतिव्रता अतस्तेनाम्रियमाणा पतिव्रतेत्यनेन नित्यत्वं द्योत्यते अत्र अनित्यवर्णनमयुक्तमिति चेत् मै
वं मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिण इति मनुना पतिव्रताया अननुम
तस्यापि अभिहितत्वात् अत्र साध्वीत्यनेन पतिव्रताभिधीयते अस्य या ब्रह्मचर्ये व्यवस्थितेत्यनेनयौनकृत्स्न प्रसक्तेः तथा च
महाभारते भगवान्व्यासः पतिव्रतायाः सत्याः अग्निप्रवेशं दर्शयति नत्वग्निप्रवेशेन पतिव्रतात्वं पतिव्रतात्वं प्रदीप्तं प्र
विवेश हुताशनं तत्र चित्राङ्गदधरं भर्तारं समान्वपश्यतेति न च तस्मात् अहन्यहन्यपराणुः स्वः कामी प्रेयादिति श्रुतिविरोधः
विषयभेदात् श्रुतिर्हि सामान्येन शास्त्राविहितं स्वेच्छामरणं निषेधति स्मृतिस्तु भर्तरि मृते ज्वलनप्रवेशविशेषेण मर
णं विधत्ते अतो विषयभेदान्न विरोधः यथा हि न हिंस्यात्सर्वा भूतानीति सामान्यशास्त्रमग्नीषोमीयं पशुमालभेतेति वि।

म॰
पा॰
५७

साधयेत्स्वयं नियमोदकवह्नीश्चपत्रपुष्पादनादिकाम् सेवतेभर्तुरुच्छिष्टमिष्टमन्नंफलादिकं महाप्रसाद इत्युक्त्वापतिदत्तं प्रा
तीच्छति हारीतः मातृकं पैतृकं चैव यत्र चैव प्रदीयते उलत्रयं पुनात्यत्र भर्तारं यानुगच्छति अयं च सर्वासां स्त्रीणां पतिव्रता
नामगर्भिणीनामबालापत्यानामाचंडालं साधारणो धर्मः अपतिव्रतादीनामनधिकारात् ननु चापतिव्रतादीनामप्य
धिकारोनुगमनेश्रूयते तथा च महाभारते अवमन्य च याः पूर्वं पतिं दुष्टेन चेतसा वर्तन्ते याश्च सततं भर्तॄणां प्रतिकूलभः
भर्तानुमरणं काले याः कुर्वन्ति तथाविधाः कामात्क्रोधाद्भयान्मोहात्सर्वाः पूता भवन्त्युत आदिप्रभृति यासाधीपस्यः प्रि
यपरायणा ऊर्ध्वं गच्छति सा नाम भर्ता [illegible] गतेति नैतत्सारं उत्तमाद्यश्रवणात् सर्वाः पूता भवन्त्युतेति यत्सवमानंक
र्दीनामपि पापक्षयोक्ति किमुत स्नादिसाद्व्यमृत यासांधीनस्याः पापक्षयाः परलोकश्च वियतस्व इति उत्तमलोकप्रा
प्तिविधायकवाक्यशेषत्वेन तत्साधकत्वेनापि चरितार्थत्वात् साधारणधर्मत्वं च भर्तारं यानुगच्छतीत्यविशेषोपादानाद
वगम्यते यानि च ब्राह्मण्यनुगमननिषेधपराणि पैठीनसाङ्गिरःप्रभृतीनां वाक्यानि मृतानुगमनं नास्ति ब्राह्मण्या ब्राह्मण
शासनात् या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् सा स्वर्गमात्मघातेन नात्मानं न पतिं नये देवमादीनि तानि पृथक्चि
चितिविषयाणि पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति अन्यासां चैव नारीणां स्त्रीधर्मोयं परः स्मृतः इत्युशनसा वि

५७

नानुत्क्रोशं हान्निर्गच्छेत् २

तंचेच्छेत्साध्वा स्त्रीवृषदासिका कदाचैर्वर्दितेयात भर्त्तावंऊ पिताहिवा केकवादीत्र सानूनंभवेद्वैनात्र संशयः भर्तुर्विया
सक्तुन्स्त्र्यामिष्टमश्नातिकेवलं ग्रामेणसूकरीवास्याद्दर्भीवाथविष्टिभुक् याज्ञवल्क्यः प्रतिप्रियहितेयुक्ता स्वाचारा
वर्जितेंद्रिया इहकीर्त्तिमवाप्नोतिप्रेत्यचानुत्तमांगतिं शंखः नानुत्तरीयानत्वरितंव्रजेत् नपरपुरुषंसंभाषेतान्य
त्रवणिक् प्रव्रजितवृद्धवैद्येभ्यः ननाभिंदर्शयेत् आगुल्फाद्वासः परिदध्यान्नस्तनौविवृतौकुर्यात् नसहसेदयावृतेन
भर्त्रावंतद्द्वभूत्वाहेष्यात् नगणिकाधूर्त्ताभिसारिणीप्रव्रजिकाप्रेक्षणिकामायामोहकऊहककारुकारिकोडःशीलादि
भिः सहैकत्रतिष्ठेत् संसर्गोहिवासेनदुष्यंतीति अथपंचमसकलस्त्रीधर्मोविवाहादूर्ध्वंवेदितव्यः अथपतिव्रताविशेषध
र्माः तत्रमनुः कन्याविवाहसमयेवाचयेद्गुरितिद्विजः भर्त्तुः सहचरीभूयाज्जीवनाजीवितापिवा भर्त्तादेवोगुरुर्भर्त्ता
धर्मतीर्थव्रतानिच तस्मात्सर्वंपरित्यज्यपतिमेकंसमर्चयेत् भुंक्ते भुंक्तेत्रपतौयातुद्यासीनाचापिवासिते विनिद्रितेवि
निद्रातिप्रथमंपरिबुध्यते अनलंकृतमात्मानंपत्युर्नादर्शयेत्क्वचित् कार्यार्थेप्रोषितेपत्यौसर्वमंडनवर्जिता नचत
न्नामगृह्णीयात्तस्यायुषंविवर्धयेत् पुरुषांतरनामापिनगृह्णातिकदाचन आकृष्टापिनचाक्रोशेत्ताडितापिप्रसी
दति इदंकुरुष्वेतिस्वामिन्नमत्तामितिचक्वचित् आहूताऽगृहकार्याणित्यक्त्वागच्छतिसत्वरं पूजोपकरणंसर्वमनुक्ता।

म. पा. ५८

या म्राशुद्धे संप्रतीसोऽहि महापातकदूषितः मनुः विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः उपचर्यः स्त्रिया भर्ता सततं
देववत्पतिः नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं पतिं सेवते यावत्तेन स्वर्गे महीयते पत्यौ जीवति या स्त्री साऽउपो
षव्रतचारिणी आयुष्यं हरते भर्तुर्नरकं चाधिगच्छति पाणिग्रहस्य साध्वी स्त्री जीवतो वा मृतस्य वा पतिलोकमभीप्सन्ती ना
चरेत्किंचिदप्रियं मृते जीवप्रिया पत्यौ नान्यमुपगच्छति सेह कीर्तिमवाप्नोति मोदते चोमया सह स्कन्दे प्रसुप्तं तु सदा
सीने वसमाने यदृच्छया आतंकेष्वपि कार्येषु पतिं नोत्थापयेत्क्वचित् स्त्रीधर्मिणी त्रिरात्रं तु स्वमुखं नैव दर्शयेत् स्ववा। ५
क्यं श्रावयेन्नापि यावत्स्नाता न शुद्ध्यति [illegible] भर्तृवदनं वीक्षेन्नान्यस्य कस्यचित् अथवा मनसि ध्यात्वा पतिं भानुं विलोक
येत् हरिद्रां कुंकुमं चैव सिंदूरं कज्जलं तथा कूर्पासकं च ताम्बूलं मंगल्याभरणं शुभं केशसंस्कारकबरीकरकर्णविभूष।
णम् भर्तुरायुष्यमिच्छन्ती दूषयेन्न कदाचन न रजकान्नकारुकान्तथा श्रमणयापि च न चडुर्भगयाचापि सा दूती
त्वं कृतं तु सा भर्तृविद्वेषिणी नारीं न संभाषेत कर्हिचित् नैकाकिनी क्वचिद्भूयान्न नग्ना स्नाति वै क्वचित् नोलूखलेन मु।
सलेन वर्द्धन्या दृषदापि यन्त्रकेन देहल्यां न स्त्री चोपविशेत्क्वचित् उन्नाप्रस्रजं वंदयाद्या नारी क्रोधतत्परा सा शुनी जायते ग्रामे।
सृगाली निर्जने वने अपवादा न कर्तव्याः कलहं दूरतस्त्यजेत् गुरूणां सन्निधौ क्वापि नो ब्रूयान्न च वा हसेत् ताडितानाडि।

५८

नक्लिह् तस्माद्यत्नेन रक्षेत्तु भर्त्तव्या मनुरब्रवीत् अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम् विषयेषु तु सज्जन्त्यः संस्थाप्या
आत्मनेव वशे पिता रक्षति कौमारे भर्त्ता रक्षति यौवने पुत्रा रक्षन्ति वार्धक्ये न स्वातन्त्र्यं क्वचित्स्त्रियः सूक्ष्मेभ्योऽपि प्रमादेभ्यः
स्त्रियो रक्ष्या विशेषतः द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः भारते पानं दुर्जनसंसर्गः पत्या च विरहोऽटनं स्वप्नान्यगे
हेवासश्च स्त्रीणां वै दूषणानि षट् नैता रूपं परीक्षन्ते नासां वयसि संस्थितिः सुरूपं वा कुरूपं वा पुमानित्येव भुञ्जते एवं
स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजं परमं यत्नमातिष्ठेत्पुरुषो रक्षणं प्रति शय्यासनमलंकारं कामं क्रोधमनार्जवं द्रो
हभावं कुचर्यं च स्त्रीभ्यो मनुरकल्पयत् [illegible] गुणेन भर्त्त्रा स्त्री प्रयुज्येत यथाविधि तादृग्गुणानुसारेण समुद्रेणेव निम्नगा
षि५ अथ रक्षोपायः न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुं एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुं अर्थस्य संग्रहे चैनां।
व्यये चैव नियोजयेत् शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे अथ स्त्रीकर्त्तव्यधर्माः तत्र मनुः बालया वा युवत्या वा वृद्धया।
वापि योषिता न स्वातन्त्र्येण कर्त्तव्यं किंचित्कार्यं गृहेष्वपि पित्रा भर्त्रा सुतेनापि नेच्छेद्विरहमात्मनः एषां हि विरहेण
स्त्री गर्हिता स्यात्कुलद्वयोः सदा प्रहृष्टया भाव्यं गृहकार्ये च दक्षया सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया याज्ञवल्क्यः
संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी कुर्याः श्वशुरयोः पादवंदनं भर्त्तृतत्परा स्त्रीभिर्भर्त्तृवचः कार्यमेष धर्मः परः स्त्रि

म॰
पा॰
५५

रित्युपलक्षणं अर्थश्च उपयंतेरेणापि मायपरितोषणीया येषु तु अधिवेदननिमित्तेषु कालविशेषः श्रूयते तेषु यावता काले
न तद्दोषनिश्चयो भविता तत्कालं प्रतीक्षते याज्ञवल्क्यः अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम् न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं
प्रकीर्तितम् अधिवेदनिकं अधिवेदनप्रयोजनमलंकरणादि यस्यै पूर्वं विवाहादि स्त्रीधनमलंकारादि न दत्तं तस्यै समं दा
तव्यं पश्चादुह्यमानस्या यावद्दीयते तावदित्यर्थः दत्ते तु पूर्वमेवालंकारादिके दत्ते अर्धं अत्रार्धशब्दो मात्रपरो न तु समांशप
रः पूर्वं यद्दत्तमलंकारादिकं नवोढालंकारान्तरेण चेद्यावता तत्साम्यं भवति तावद्दातव्यमित्यर्थः मनुः अधिविन्ना तु या ना।
री निर्गच्छेद्रुषिता गृहात् सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसन्निधौ याज्ञवल्क्यः अधिविन्ना तु भर्तव्या महदेनोऽन्यथा।
भवेत् यत्रानुकूल्यं दम्पत्योः त्रिवर्गस्तत्र वर्धते मनुः चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या पतिघ्नी च विशेषेण
जुगुप्सितोपगता च या जुङ्गितः प्रतिलोमजः अत्र विशेषमाह याज्ञवल्क्यः हृताधिकारां मलिनां पिंडमात्रोपजीविनीं परि।
भूतामधःशय्यां वासयेद्व्यभिचारिणीं इत्यधिवेदनं अथ स्त्रीधर्मः तत्रादौ तासामवध्यरक्षणीयत्वं प्रदर्श्यते तत्र मनुः प्र
जनार्थं महाभागाः पूजार्हा गृहदीप्तयः स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन उत्पादनमपत्यस्य जातस्य परिपालनं
प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनं अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा दाराधीनस्तथा स्वर्गः पितॄणामात्मनः। ५५

तु यस्मिंतौ लालाटके दृं कान्ता वानीता गुणशालिनी नववधूस्तिसोत्सवैर्नन्दते पूर्वतोभ्युदिते शुक्रे प्रयाया दक्षिणापरे पश्चाद।
भ्युदिते चैव यायात्पूर्वोत्तरे दिशो स्वभवनप्रवेशे देशानां विप्लवे तथा द्वाहे नववध्वा गृहागमने प्रतिशुक्रविचारणा नास्ति
५२ इति द्विरागमनं अथाधिवेदनं तत्र मनुः मद्यपासत्सहत्ता च प्रतिकूला च या भवेत् व्याधिता वाधिवेत्तव्या हिंस्रार्थघ्नी च स
र्वदा मद्यपेति यज्ञपायायाः स्त्रियाः मद्यं तत्पानकर्त्री अभिधीयते असत्सहवृत्ता असाध्वाचारा प्रतिकूला भर्तुरनिष्टकारिणी हिंस्रा
पुत्रदासादिताडनशीला अर्थघ्नी स्वेच्छयाधनादिना अर्थविनाशकारिणी अधिवेदनं भार्यान्तरपरिग्रहः याज्ञवल्क्यः सुरापी
व्याधिता धूर्त्ता वन्ध्यार्थघ्न्यप्रियंवदा स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा धूर्त्ता वदाना स्त्रीप्रसूः स्त्रीमात्रजननी अधिवेदन।
प्रतीक्षणकालो मनुनोक्तः वंध्याष्टमेधिवेद्याब्दे दशमे तु मृतप्रजा एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी अधिवे
त्तव्येति शेषः देवलः अदीकां चैताष्टवर्षाणि भर्त्तातिप्रसवा स्त्रिया दशवंध्या च निंद्या च द्वादश स्त्रीप्रसूयिनीम् ततो वि।
न्देत विधिना पुत्रार्थे धर्मतः स्त्रियं पुत्रलाभात्परलोके नास्ति हि प्रसवाहिते अतिप्रसवा अप्रसवः पुष्परजः तद्योगकालमि।
तिक्रान्ता निंद्या स्वैत्रादियुक्ता प्रसवाः फलानि पुत्राः एकामूढां तु कामार्थमन्यां लब्धुं य इच्छति समर्थस्तोषयित्वार्थैः।
पूर्वोढामपरां वहेत् अष्टदशकालप्रतीक्षो विकल्पो वयः शक्त्यापेक्षया व्यवस्थितो बोद्धव्यः समर्थाः तोषयित्वार्थैरित्यत्रार्थे।

म॰ पा॰ ५४

लभ्येते तत्कालद्रव्ययोः कस्य मुख्यत्वं गौणत्वं वापि वा मुख्यकालमुपाश्रित्य गौणं मुख्यमस्तु साधनं न मुख्यद्रव्यलाभेन गौ

णकालप्रतीक्षणमिति यत्र यथा कथंचित्कर्तव्यं नित्यकर्म विजानतेति तस्यायमभिप्रायः स्वकालप्राप्तस्य कर्मणो मुख्य

द्रव्याभावेन विलोपो न कर्तव्यः अपितु मुख्यकाल एव मुख्यद्रव्याभावेपि प्रतिनिधिद्रव्येण कर्म निवर्तनीयमिति अतो वा

चनमंत्रेणासंवत्सरं तु मासतिथ्यादिकालविशेषो विहितानि कर्माणि स्वकालातिक्रमे कालांतरे कर्तुं न युज्यंते अपितु

तदतिक्रमप्रायश्चित्तमेव कुर्यात् यस्त्वागौणकाले तु ष्टानं दृश्यते तत्तच्छिष्टगर्हापनिर्हारायस्य मनःपरितोषाय चेति सर्वमन

वद्यं इति मुख्यगौणकालनिर्णयः अथ [illegible]प्राप्त द्विरागमने शुभकालादि तत्र स्वरेश्वरः वैशाखे सुभगा प्रा

भूत धनिनी मार्गे च पुत्रान्विता फाल्गुने प्रियवल्लभा प्रियतमा नित्यं प्रिया पुत्रिणी बं [illegible] निर्धनदुर्भगा विरहिणी स्वे

ह्वेगता निस्वयोनूनं देवतमापि डः स्वमत्तुलं लेभेत्स्ससोमे गता मार्गफाल्गुण वैशाखे शुक्लपक्षे शुभे दिने गुर्वादि

त्यविशुद्धौ स्यात्स्त्रियं पत्नी द्विरागमः बादरायणः नीहारा शुदिनोन्नतादित्ति गुरुत्वास्त्वानूराधाश्विनीप्राज्ञो भास्करवा

रुविलुवरुणः त्वाष्ट्रयमास्ते तिथ्या ऊंभा ज्ञालिगतेरवौ शुभ करे प्राप्ते द्वादये भार्गवे जीवावास्त जिता हिने नववधू समये प्रवेशः

शुभः भर्तुः सोमनगोरवेहिमकरेनास्तंगते भार्गवे सूर्य कीटखटाजगे शुभदिने पक्षे तु कृष्णेतरे हिन्नादिकतिथीतरे

वामित्यर्थः यत्तदुक्तं भवति यदाशक्नुयात्तदाऊर्ध्वमादित्यपर्यवस्थानात्काम्येषु न गौणस्वीकारः नित्यनैमित्तिकेषु यथाशक्नुया
दित्यपर्यवस्थानात् गौणपरिग्रह इति तथा च पैठीनसिः प्रधानसचिवान्यंगानि भवंति न भवंति चेति काम्ये प्रधानसचिवत्व
मितरत्रासचिवत्वे सचिवत्वं महत्वात्प्रधानमिवांगान्यपि मुख्यान्येव न गौणानीत्यर्थः यद्येवं नहि दर्शपौर्णमासयोः पा
र्वणश्राद्धादीनामस्यावश्यादिविहितकालातिक्रमेण तदनंतरं गौणकालकर्तव्यताप्रसक्तेनेति चेन्न अस्तु नाम को नो हा
निर्गौणकालस्वीकारवादिनां एवं [illegible] सिद्धांतोभिधीयते काले हि कर्म विधीयते न कर्मणि कालः यत्स्वेच्छाविनियोगा
ईतदुपादेयं यदुपादेयं तद्विधीयते [illegible] पाकर्तनशक्यः अतएवानुपादेयः पंचकमध्ये मीमांसकैः कालः प
रिगणितः अतः कालोद्देशेन कर्म विधातव्यं तथा च कालो निमित्तं निमित्तभूतकालाभावे धिकाराभावात्कालांतरे कृत
मकृतमिवेति गौणकालग्रहणं नोचितं विहितकालाभावे चाधिकाराभावः सांतपनादिकरणप्रायश्चित्तनिमित्तस्य
स्मिन्सूत्रप्रतिपादितं लौगाक्षिरपि गौणस्यापरिग्राह्यत्वमाह गणितात् ज्ञायते कालः काले तिष्ठंति देवताः वदंत्येकाकृ
तिः काले न काले लब्धकादयः यत्तु मंडनमिश्रैरभिहितं गौणकालेपि कर्तव्यं गौणोप्यत्र हि मुख्यो भवेदिति यत्तु दिवोदिता
निकर्माणि स्यादिता यत्र गौणं कालाभ्यनुज्ञानं वाचनिकं तद्विषयं अतएव मंडनमिश्राः मुख्यकाले हि मुख्यं वेत्साधनं नैव

म॰ पा॰ ५६

पूर्वकर्मानुष्ठानेनहिनस्वीकर्त्तुमुचितः तथाहिपूर्वकर्मतावत्स्वकालात्प्रच्युतंविनष्टप्रायंतदुत्तरकर्मकालेक्रियमाणंतस्मादुत्तर
कर्मकालेक्रियमाणात्तस्मादुत्तरकर्मण्यसमापयति ततश्चस्वकालाद्विच्युतंतदपिप्रनष्टरूपंभवति तदपिउत्तरकर्मकालेयदि।
क्रियेत नहिकिंचिन्नष्टसमाधानमात्रंप्रसज्येतेतिचेत् बाढमेवंउत्तरकर्मकालेपूर्वोत्तरयोःकर्मणोरवकाशोस्तीदमुच्यते॥
नपुनरसतीतिनदोषः एवोस्मिन्नेवविचार्यते किमयंगौणकालः सर्वेषांनित्यनैमित्तिकानांसर्वाण्यपियेषुस्वकाला।
तिक्रमेगौणकालेकर्त्तव्यानीति आवश्यकेषुनित्यनैमित्तिकेषुयथाशक्त्यात्तयाउर्यादिसमभिधानात् विहितागाभा
वेतत्स्मरणप्रतिनिधिग्रहणस्यमुख्यासत्वान्स्वकालातिक्रमेगौणकालोग्राह्यः तथाचमण्डनमिश्रः मुख्येकालेयदा।
वश्यंकर्मकर्त्तुंचशक्यते गौणकालेपि[illegible]कर्त्तव्यंगौणोप्यत्रेदृशोभवेदिति ईदृशःमुख्यकालस्यदृशः अत्रापिविशेषस्तेनो।
क्तः गौणेष्वेतेषुकालेषुकर्म[illegible]समाचरेत् निष्कृतिंप्रायश्चित्तं तथा प्रायश्चित्तमकृत्वावागौणकालेसमाचरे
दिति देशकालयथात्र्यापेक्षयाप्रायश्चित्तकरणमकरणंवेतिव्यवस्था तथास्मृत्यन्तरमपियत्किंचित्कर्त्तव्यंनित्यकर्म।
विज्ञानता नप्राप्तस्यविलोपोस्तिपैत्रकस्यविशेषतः तथा दिवोदितानिकर्माणिप्रमादादकृतानिवै यामिन्याःप्रहरेया
वत्तावत्सर्वाणिकारयेदिति श्राद्धेतुविशेषः संध्यारात्र्योर्नकर्त्तव्यंश्राद्धंखलुविचक्षणैरिति संध्यायांरात्रौचश्राद्धंनकुर्त्ते ५६

संभवाच्च एतदपि प्रतिनिधिपादे निर्णीतं स्मृतिसारे हव्यार्थे गोघृतं ग्राह्यं तदलाभे तु माहिषं आजं वा तदलाभे तु साक्षात्तै
लं ग्रहीष्यते तैलभावे ग्रहीतव्यं तैलवत्ति समुद्भवं तदलाभे तु सस्नेहः कौसुंभः सर्षपोद्भवः वृक्षस्नेहाश्च वा ग्राह्याः पूर्वा
लाभे परः परः तदलाभे यवव्रीहिश्यामाकान्यतमोद्भवं पिष्टमालोड्य तोयेन घृतार्थे योजयेत्सुधीः वृक्षतैले पुन्नागनि
बैरंडोद्भवं स्यात्तेन एषां केषांचिद्दैवयोगाद्विद्यमानप्यसंभवे सर्वत्रान्यमुपादेयं भारद्वाजगृह्ये मतं तान् सोपासनावसथ्याधा
नम् अथ प्रसंगात्सकलनित्यनैमित्तिककर्मयोगिनया मुख्यकालातिक्रमे गौणकालो निरूप्यते ननु को मुख्यः को वा
गौणः उच्यते यो विहितः स मुख्यः यथा होमे श्राद्धादौ प्रातरादिः यस्माद्विहितस्तत्समीपवर्ती उपरितनस्तेष्वेव कर्म
स्वंगत्वं नीयमानः संगवादिकालः स गौणः तदाहुस्त्रिकांडमंडनमिश्राः स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मणः
यद्यागामिक्रियामुख्यकालस्याप्येतदालवत् गौणकालत्वमिच्छन्ति केचित्प्राक्तनकर्मणीति अस्यायमर्थः पूर्वोत्तरयोः
कर्मणोर्मध्ये पूर्वस्य कर्मणः स्वकालादुत्तरयोः कर्मणोर्मध्ये पूर्वस्य कर्मणः स्वकालादुत्तरयोः कालउत्तरकर्मकालावधि
कः स पूर्वकर्मणो गौणः कालः अथवा आगामिक्रियया उत्तरक्रियया यो मुख्यकालस्तस्यापि प्राक्तनकर्मणि पूर्वकर्मणि के
चिद्गौणकालत्वमिच्छन्ति तत्र दृष्टान्तः अन्तरालवदिति यथा पूर्वोत्तरकर्मणि केचिद्गौणकालत्वमिच्छन्ति णोर्मध्यकालः

म. पा. ५२ न

लेसमस्तहोमानयपक्षेण तथाहिवाग्रायवश्राग्रायांर्धमासार्धमासायाग्निहोत्रंजुहुयात्तत्पादौ पर्वणोत्तेसायंचप्रातरेवचचतु
र्दश चतुर्थ्यहीत्यादिनि मस्तडत्रयमेकासमिनस्तस्हाहोमः मस्तस्यांग्नि मार्जनमिति पक्षादौयजनीयेहनि प्रतिपर्वणोत्तेअमा
वस्यादावुपस्तवेअन्वाद्यानादिने अत्रचपक्षांतेसायंकालेचतुर्दशपंचदशवाअगामि दिनपरिगणनेनस्वशाखोक्तप्रका
रेणचतुर्थ्यहीतादीनि हवींषि आदायमस्तात्तमार्जनादिकं विधायमस्तदेवहोमः कर्त्तव्यः देशकालकर्तृदेवताहविषा।
मेकत्वात्तंत्र एवंपक्षादौ यजनीयेहनिप्रातः पतत्त्वगौणकालाश्रयणं पक्षहोमस्यदेवात्कर्मणउत्कर्षेप्रवासादिनिमि
त्तेचवेदितव्यंनसर्वदा एवंचित्पादिदिनार्थमपि निमित्तसद्भावेतंत्रेणहोमोभवति पक्षहोमेविशेषमाह मरीचिः पक्षहो
मानंपौदत्तांगत्वाकस्मान्निवर्तिते [illegible] मेपुनः प्रकुर्वीत भवेच्चनसदोषभाक् पक्षहोमानितिसुपलक्षणं अतोमंत्राण्येव
मेव अत्रचसायंहोमेयदृस्वीकृतं [illegible] तदेवप्रातर्होमेपिनान्यत् यतःसायमुपक्रमः प्रातरपवर्गीयमेकमेव
प्रयोगः एकस्मिंश्चप्रयोगेप्रक्रांतद्रव्यपरित्यागेनद्रव्यांतरस्वीकरणंयुज्यतइति व्रीहियववाक्यमीमांसायाममीमां।
सिमीमांसकैः अथदैवात्सायंहोमगृहीतद्रव्यंप्रातर्होमेनप्राप्येततदातद्द्रव्यप्रतिनिधिभूतंद्रव्यांतरंगृह्णीयात्।
ततत्त्वव्रीह्यादिमध्येअन्यतमद्रव्यं अप्रतिनिधिद्रव्यांतरेप्रकृतिद्रव्यावयवाभावात् प्रतिनिधौप्रकृतिद्रव्यावयव

५२

अतएव स्मृतौ व्रीहिभिर्यजेत यवैर्यजेतेति वेणुयवा वेणुबीजानि आहुतिपरिमाणं च व्रीहीणां च यवानां च शतमाहुतिरिष्य
ते व्रीहिवदेव तण्डुला अपि यद्वा धान्यं च तत्पष्टिराहुतेः परिकीर्त्तितम् तिलानां तत्तदर्धं स्यात्तदर्धं स्यादाहुतस्तत्पावति प्रदे।
शाङ्गुष्ठमध्यो कालिलाग्लिनास्तिष्ठेत्तिनदर्थं देशावापि घृतमाहुतौ भवतीत्यर्थः एवं सायंप्रातस्त्रिसहस्रे होमानि वर्तनीयः हो।
मे कीता वोदाहृताः स्मृतौ अपरे [illegible]तः प्रधानः स्यात्पत्नी पुत्रस्तु कन्यका अन्तिका शिष्यो [illegible]धीत्य भा[illegible] नियमस्तु तायतिः एते।
रेव हुतं यत्तेन हुतं स्वयमेव तत् पत्नी पुत्रैश्च तत्कृगाहिना पर्युत्तरणक्रिया असमवेतं दम्पत्योर्होतव्यं तेन्विगादिना द्वयोरप्य
समवेतं वेद्भवेद्धुतमनर्थकं -- [illegible]धीयजेमानेः ॥ प्रादुर्देशात्यागकालः असन्निधौ तस्पत्नी स्यादुद्देशात्यागकारिका असन्नि
धौ तु पत्न्याः स्यादध्वर्युस्तदनुज्ञया उन्मादे प्रमवे वंतौ उर्वीतानुज्ञया विना नोपवासे प्रवासे सा सत्नी धारयते व्रतं सर्वथाय
जमानो वा स्वजेत्तदा[illegible]तः श्रुतिः अग्निधमने च विशेषादर्शितः कात्यायनेन जुहूर्षंश्च हुते चैव पाणिशूर्पस्फ्यदारुभिः नकु
र्यादग्निधमनं नकुर्याद्व्यजनादिना मुखेनैव धमेदग्निं मुखाद्दोषो ह्यजायतेति तथानाग्निं मुखेनेति वचो लौकिके ज्वलयति
तादिति यदा मुखेनेय[illegible]तदा नलिकादिव्यवधानेन न स्यादिति ज्ञेयं बौधायनः आसायंकर्मणः प्रातरा प्रातः सायंकर्म
णः आहुतिर्नातियेत पार्वणं पार्वणान्तगात् मैत्रायणीयपरिशिष्टेपि अथ यदेहस्मि प्रायात्र भार्या संस्त्वेग्निहोत्रेण तव्य।

मातामहस्य चाविरुद्धकदानादिकर्तृत्वविधिर्नास्तितत्रव्रतलोपो भवतीति गम्यते मातामहश्राद्धाधिका

रेषु लक्षणः मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः तेषां तु पितृवच्छ्राद्धं कुर्युर्दुहितृसूनवः न

ष्यापितरो यत्रै पूज्यंते तत्र मातामहाश्चापि अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत् सर्वत्रापितृश्राद्धे माता

महश्राद्धमपि कार्यमित्यर्थः अत्र केचिदपवादमाह कात्यायनः कर्तृसमन्वितं मुक्त्वा तथान्यः श्रा

द्धषोडशम् प्रत्याब्दिकं च शेषेषु पिण्डाः स्युः षाडिति स्थितिः कर्तृसमन्वितं सपिण्डीकरणं अयं च वि

वेकः यस्तु पुनर्हारी दौहित्रः स नव श्राद्धादिकमपि कुर्यात् इतरस्त्वमावस्यादौ षड्दैवतं कुर्यात् तत्र

मातामहश्राद्धाकरणे प्रत्यवैति न तु सपिण्डीकरणादाविति अथामश्राद्धाधिकारिणः कात्यायनः आप

द्यनग्नौ तीर्थे च प्रवासे पुत्रजन्मनि आमश्राद्धं प्रकुर्वीत भार्यारजसि संक्रमे यस्य यजमानस्य भार्या रज

स्वमती तत्र पाककर्माभावेन नित्यनैमित्तिकश्राद्धेषु मासिकसांवत्सरिकव्यतिरिक्तेषु यजमानस्यामश्राद्धा

धिकारी भवतीत्यर्थः यश्चापरपक्षमध्ये प्रतिपदादिष्वन्यतमे दिने एव श्राद्धं क्रियते तन्नित्यकाम्यत्वेनोभ

पा॰ यात्मकं तथा स[illegible]केवलानीयत्वञ्चानुष्ठीयते अथ च यजमानभार्या रजस्वला तस्य च दिनानं तदेव ब्राह्म
णादिसम्भवः पाककर्त्रंतरासम्भवश्च तदामावस्याश्राद्धवदेवामान्नेन कुर्यात् अथ कामनयानुष्ठीय
ते तदा यदा शक्नुयात्तदा कुर्यादिति श्राद्धस्य एककालानि ष्यन्तौ पंचमहादिषु कार्यं एवं च सकलपक्ष
श्राद्धेषु चम्यादिपक्षश्राद्धे दशम्यादिपक्षे च वेदितव्यं बौधायनः संक्रमे त्वद्विजाभावे प्रवासे पुत्रजन्मनि
हेमश्राद्धं संग्रहे च द्विजः शूद्रस्सदामाचरेत् आमाभावे हेमश्राद्धं संक्रमे ग्रहणाद्यो स्त्वामहेमश्राद्धं पाका
सम्भवे ब्राह्मणासंभवे वासंभवति अत्र शिष्टाचारः प्रमाणं एवं तीर्थश्राद्धे च स्मृत्यन्तु पाकाभावे धिका
रः स्याद्धिम्रादीनां नराधिप अपत्नीनां महाबाहो विदेशगमनादिभिः सदा चैव तं शूद्राणामामश्राद्धं
विदुर्बुधाः आत्मनो देशकालाभ्यां विप्लवे समुपस्थिते आपद्यनग्नौ तीर्थे च प्रवासे पत्न्यसम्भवे च
न्द्रसूर्यग्रहे चैव दद्यादामं विशेषतः [illegible]रिः यावत्स्यात्तावाग्निसंयुक्त उत्पन्नाग्निस्थापि वा आ
मश्राद्धं तथा कुर्याद्धस्ते शौकरणं भवेत् प्रचेताः [illegible]वैव नातकर्माणि चाप्यथ आमश्राद्धं तदा कु १५४

स्व

यो द्विधिपार्वणेनतु स्वपचः स्वयंपचः हु[illegible]तं [illegible] श्राद्धेति द्वे द्विजातीनामामश्राद्धं प्रकीर्तितं आमावा
स्यादिनियतमामसंवत्सरान्ते मासिकमा[illegible]ब्दिकं चैव पक्वान्नेनैव कार्यमिति नियमः शूद्रसर्वत्रामन्न
मेव आमश्राद्धेपि विशेषमाह व्यासः आमं दद्याच्च कौन्तेय यद्यान्नं चतुर्गुणं यानि च द्वैगुण्यविधाय
कानि वचनानि तानि चतुर्गुणदानाशक्तौ ज्ञेयानि चातुर्गुण्यं च पुरुषाहारापेक्षया तथा सिद्धा
न्नोक्तविधिर्यस्मादामश्राद्धेप्यसौ विधिः आवाहनादिस्सर्वस्यात्पिंडदानं च भारत दद्यादन्नं द्विजाति
भ्यः शृतं वाशृतमेव च तेनाग्नौकरणं कुर्यात्पिंडांस्तेनैव निर्वपेत् षट्त्रिंशन्मते आमश्राद्धं यदा कु
र्यात्पिंडदानं कथं भवेत् गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा पिंडदानं भवतीति शेषः आमद्र
व्यग्रहणात् सक्तुपायसेषु यथालाभं व्यवस्था तत्त्वामश्राद्धं हेमश्राद्धं च पार्वणश्राद्धादिकारिणा पा
र्वणश्राद्धवदेव कार्यं यथाङ्गं समाप्तात्रिपिंडं यत्फलं तु प्रयोजनं तन्निवर्तते केषुचिन्मंत्रेषु होमवति अत्र
त एवमरीचि [illegible] आवाहने स्वधाकारे मंत्राक्षैय्यविसर्जने अन्यकर्मण्यनूह्याः स्वामश्राद्धविधिः
ऊ

म. प्र.

१५५

स्मृतः अयमर्थः आवाहने आवाहनमंत्रे उशन्तस्त्वेत्यत्र आवह पितॄन्हविषे अत्तवे इत्यत्र अत्तवे इति पदस्योहः
कार्यः स्वधाकारो नमो वः पितर इष इत्यादिमंत्रे इष इति पदस्थाने आमद्धव्यायेति पदस्योहः विसर्जनमं
त्रे वाजेवतेति मंत्रे तत्र मया तनपथिभिर्देवयानैरित्यत्र मत इति यद्गतऊप्रत्ययस्थाने लोंग्रप्रत्ययोहेनात्र
प्यत्र इत्यूहः कार्यः अन्यकर्मणां विस्तोहस्वरं तत्स्वेन्यादौ नोह इति अथ श्राद्धदेशाः मनुः शुचिं देशं
विविक्तं वा गोमयेनोपलेपयेत् दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत् स्मृतः शुचिरदहदेशांती
र्थदेशं वा अन्यकृताशुचिपरिहारार्थं विविक्तं केशादिरहितं कृत्वा गोमयेनोपलेपयेत् तं देशं तु
खननादिभिर्वा दक्षिणाप्रवणं दक्षिणां दिशं प्रत्युदकादिसर्पणयोग्यं कुर्यादित्यर्थः यत्तु शंखेन हस्ति
सभूनिषेधः कृतः गोगजाश्वादिकृष्टेषु कृत्रिमायां तथा भुवि न कुर्यात् श्राद्धमेतेषु पादुकादिषु
भूमिषु अयं च निषेधः अन्नतीकृतवेदिकादिभूमिषु अयं च निषेधः अन्नतीकृतवेदिकादिविषयः
विस्तुधर्मोत्तरे दक्षिणाप्रवणो देशो तीर्थादौ वा गृहेपि च भूसंस्कारादिसंयुक्तो श्राद्धं कुर्यात्प्रयत्नतः १५५

तीर्थमृषिसेवितं जलं आदिशब्देन ऋषिसेविताश्रमादिपरिग्रहः परकीयप्रदेशेषु पितॄणां निर्वपेत्तु यः
पि२ तद्भूमिस्वामिपितृभिः श्राद्धकर्म विहन्यते परकीयप्रदेशाः परिपरिगृहीतगृहाः न तु तीर्थादयः तेषा
मस्वामिकत्वेन सर्वसाधारणत्वात् तथा च पुराणे स्मर्यते अटव्यः पर्वताः पुण्यानदीतीराणियानि च
सर्वाण्यस्वामिकान्याहुर्न हि तेषु परिग्रहः वनानि गिरयो नद्यस्तीर्थान्यायतनानि च देवखाता
श्च गर्त्ताश्च न स्वामी तेषु विद्यते आयतनानि देवादिसेवितानि गर्त्ताश्च कृत्रिमाः क्षेत्रविशेषाव
ल्लयोन्यादयः यमः रूक्षं क्रिमिहतं क्लिन्नं संकीर्णानिष्टगंधकं देशं त्वनिष्टशब्दं च वर्जयेत् श्राद्ध
कर्मणि अग्निदग्धमस्निग्धं च रूक्षं कर्दमसहितं क्लिन्नं आर्द्रं तूपयुक्तं वस्त्वन्तैराकीर्णं संकीर्णं प्र
तिगंधकमनिष्टगंधकाम्यदेशानाह शंखः वाराणस्यां कुरुक्षेत्रे भृगुतुंगे हिमालये नर्मदाबा
हुवतीरे सर्वमानन्त्यमश्नुते गंगाद्वारे प्रयागे च नैमिषे पुष्करे तथा सन्निहत्यां गयायां च दत्तमक्षय
तां व्रजेत् अन्येपि काम्यदेशाः स्मृतिपुराणेभ्यो ज्ञेयाः अथ श्राद्धकालाः याज्ञवल्क्यः अमावस्याष्टका।

वृद्धिः कृष्णपक्षोयनद्वयं दर्शश्रवणसम्पात्तिर्विषुवत्सूर्यसंक्रमः व्यतीपातोगजच्छायाग्रहणं चन्द्र
सूर्ययोः श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाः प्रकीर्तिताः अमावस्याकृष्णपक्षस्यपंचदशीतिथिः अष्टका
आश्वलायनोक्ताः हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाइतिविश्लेषस्तुत्रयमेवाह अमा
वस्यास्तिस्रोष्टकास्तिस्रोन्वष्टकाः माघीप्रोष्ठपद्यूर्ध्वंकृष्णत्रयोदशीव्रीहियवपाकौचेति एतांस्तुश्रा
द्धकालान्वैनित्यानाहप्रजापतिः विश्लेषस्तुतेदेवपाठांतरे अमावस्यास्तिस्रोष्टकास्तिस्रोन्वष्टकाः
स्तिस्रः पूर्वेद्युः प्रोष्ठपदेहेमंतशिशिरयोरपरपक्षेषुत्रयोदशीव्रीहिभिर्यवैर्वायागइति केचनैतद्धि
ह्लु वचनंमन्यंतेमाघीपौर्णमासीप्रोष्ठपद्यूर्ध्वंकृष्णत्रयोदशीमघात्रयोदशी वृद्धिस्तुवाकैत्रयोद
शीसैव वाडुग्रणो पितृदानायमूलेस्तुरष्टकास्तिस्रएवच कृष्णपक्षेवरिष्ठाहिपूर्वाचेन्द्रीतिभा
ष्यते प्राजापत्याद्वितीयास्यात्तृतीयावैश्वदेविके आद्यापूपैः सदाकार्यामांसैरन्याभवेत्तथा शाकैः का
र्यातृतीयास्याद्देषद्रव्यगतोविधिः पितृदानायमूलेस्तुरितिमूलेप्रधानस्यानष्टमर्थः श्राद्धे

ऐं ष्ठ्यांचप्रथमायांचशाकैस्तुतर्पयेत्पितॄन् मन्त्रापत्यांद्वितीयायांमांसैः शुद्धैश्चतर्पयेत् शुद्धैःप्रशस्तैः वै
श्वदेव्यांतृतीयायांमधुपैश्चयथाक्रमम् वर्षासमघप्रमेशाकैश्चतुर्थ्यामेवसर्वदा अत्रशाकादीनांविक।
ल्पः स्वस्वशाखानुसाराद्विज्ञेयः वृद्धिःपुत्रजन्मादिः कृष्णपक्षःप्रसिद्धः तस्यश्राद्धकालत्वंप्रतिपदाद्यपराह्ण
द्वारेण अयनद्वयंदक्षिणोत्तरात्मकं द्रव्यंश्राद्धार्हंतस्यप्राप्तिर्यस्मिन्काले तथापंक्तिपावनस्यब्राह्मणस्यसंपत्ति
लाभोयत्रसश्राद्धकालः विषुवन्मेषतुलयोःसूर्यसंक्रमः सूर्यस्यराशेराश्यंतरगमनं संक्रांतिग्रहणेनैवायन
विषुवतोरपिग्रहणेसिद्धेपुनरुपादानंफलाधिक्यायोतनार्थं व्यतीपातोयोगविशेषः पारिभाषिकोवा. तथा
वृद्धमनुः श्रवणाश्विधनिष्ठार्द्रानागदैवमस्तके यद्यमारविवारेणव्यतीपातःसउच्यते सर्वत्रमस्तकइतिसं
बध्यते मस्तकेप्रथमपादेयदिचन्द्रःस्यादित्यर्थः यद्वामस्तकेमृगशिरः गजच्छायाहस्तिच्छाया तथाचश्रु
तिःकाठकी एतद्धिदेवपितॄणांचायतनंयाहस्तिच्छाया पारिभाषिकीवा तथाचस्मर्यते यदेन्दुःपितृदैवत्येहं
तश्चैवकरेस्थितः तिथिर्वैश्रवणीयाचगजच्छायेतिसास्मृता पितृदैवत्यंमघाहंसःसूर्यः करोहस्तनक्षत्रं वै।

म. पा.
१५८

श्रवणात्रयोदशीयत्नत्रितययोगेन नगजच्छायेत्यर्थः ग्रहणमुपरागश्चन्द्रसूर्ययोः यदाश्राद्धंप्रतिकाचिःकर्तव्यं
वातिसोपिश्राद्धकालः वर्षाब्दायुगादयोपिवक्ष्यंते एतेश्राद्धकालाः अथामावस्यादिश्राद्धानांवृद्धिश्राद्धव्य
तिरिक्तानामपराह्णःकालस्तास्थत्वादमावस्यायाश्चतुर्दशीप्रतिपद्दिवसोक्तंवाश्राद्धमित्याकांक्षायामपरा
ह्णव्यापित्वाव्यापित्वमुखेनश्राद्धकालोनिरूप्यते तत्रचतदुपयोगित्वेनपक्षान्तरसंसक्तान्वाधानकालः
अन्वाधानंपिण्डपितृयज्ञोदर्शश्राद्धमित्येतत्त्रितयंवाजसनेयव्यतिरिक्तानामेकस्मिन्दिनेकर्तव्यमि
त्येतत्प्रथममुपपादयामः तत्रपर्वकालनिर्णयः पर्वदर्शःपौर्णमासीच अस्मिन्प्रकरणेमध्याह्नशा
खोह्नोद्विधाविभक्तस्यमध्यभागः तदेवावर्तनमित्युच्यते पूर्वाह्णापराह्णशब्दावपिद्विधाविभक्तस्य
पूर्वापरांशौपर्वप्रतिपदोः संधिर्मध्याह्नतः प्राग्भवेत्तदासंधिदिनेयागः तत्पूर्वदिनेन्वाधानं यदा
ह्णोविलः आवर्तनेयदासंधिःपर्वप्रतिपदोर्भवेत् तदहर्यागारभ्येतपरतश्चेत्परेहनि पर्वप्रतिपदोःसं
धिर्वोगावर्तनाद्यदि तस्मिन्नहनियष्टव्यंपूर्वेद्युःस्यादुपक्रमः तदुपक्रमोन्वाधानं मध्याह्नात्परतःसं १५८

यदिनेन्वाधानं परेद्युरिष्टिः तथा च गोभिलः आवर्तनात्परः संधिर्यदिस्तस्मिन्नुपक्रमः परेद्युरिष्टिरि
तेष पर्वद्वयस्य विनिर्णयः मध्याह्नात्प्राक्प्रतिपत्पर्वसंधावपि संधिदिनेन्वाधानमपरेद्युरिष्टिर्वाजसने
यिनां यदाह लौगाक्षिः अपराह्णेथवासायं यदि पर्वसमाप्यते उपोष्य तस्मिन्नहनि श्वोभूते याग
इष्यते आवर्तनादयः संधिर्यद्यन्वाधायतद्दिने परेद्युरिष्टिरित्याहुर्विप्रा वाजसनेयिनः पर्वप्रतिप
त्संधिस्तानोपायमाह कात्यायनः यदेन्दुर्घटिकान्यूनास्तथैवाभ्यधिकास्तयाः ह्रसिम्नातदर्थेषु
वोस्मिह्रासवृद्धी प्रकल्पयेत् लौगाक्षिरपि तिथेः परस्या घटिकास्तयाः स्युर्न्यूनास्तथावाभ्यधि
काश्चतासां अर्धं वियोज्यं च तथा प्रयोज्यं ह्रासे च वृद्धौ प्रथमे दिने स्यात् परस्यास्तिथेः प्रतिपदः पूर्व
तिथ्यपेक्षया न्यूनाधिका घटिकास्तन्मध्ये अर्धं प्रथमदिनपर्वणि वियोज्यं अर्धं पर्वदिनाद्वियोगे अर्धहा
निः पूर्वदिने तेयेत्यर्थः एवं वृद्धावर्धं योज्यमेतदुक्तं भवति सूर्योदयादनेन नरभाविन्योयाः पर्वप्रतिपद्घ
टिकास्तास्त्वेकीकृत्य द्वेधा विभज्यार्धं पूर्वदिने अर्धं परदिने च योज्यमिति यागकालमाह वृद्धशातात
पः पर्वणो यश्चतुर्थांशमाद्याः प्रतिपदस्त्रयः यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः यदा मध्या

म॰ पा॰ ह्नादूर्ध्वं संधिस्तदा तस्मिन्दिनेन्वाधाय परेद्युरिष्टौ क्रियमाणायां कदाचित्प्रतिपच्चतुर्थांशोपि यागकालेभव
१५८ ति तदा च तच्चतुर्थांशस्य वचनांतरैर्निषिद्धत्वात्कथमित्याकांक्षायां शातातपः संधिर्यस्मापराह्णोस्मायागः
प्रातः परेहनि ऊर्ध्वाणः प्रतिपद्भागो चतुर्थोपि न दुष्यति अयमभिप्रायः पर्वणोयश्चतुर्थांशस्यायाः प्र
तिपदस्तुरीय इति एतत्तत्कालसम्भवे निषेधकवचनैश्चतुर्थभागो निषिध्यते उक्तकालासम्भवेस्मिन्वे
वचने च तच्चतुर्थांशोप्यंगत्वेन विधीयत इति ननु यदा मध्याह्नेन समीपवर्तिनि एवं काले वा संधिस्तदा सं
धिदिन एव यागविधानाद्ग्रीष्मादिकाले च मध्याह्नस्य षोडशसप्तदशदण्डात्मकत्वादमावस्यायाः सूर्यो
दयात्प्रागिष्ट्यारम्भविधानात् इष्टेश्चाद्वियामसाध्यत्वात् उपक्रांतस्य कर्मणो विधिमंतरेणामध्ये वि
रामव्यापारानुपपन्नेश्च सेष्टिर्दर्श एव समाप्येत प्रतिपत्प्रविष्टायां यदि वेष्टिः समाप्यते पुनः प्रणीत
कृत्स्नेष्टिः कर्तव्या यागावितमैरिति वचनेनाविरोधः प्रसज्येतेति चेन्नैवं यदा सूर्योदयात्प्रागुक्त
कालस्यारम्भविहितात्क्रमेणेष्टौ क्रियमाणायामिष्टिकालभूतयामद्वयमध्ये प्रतिपद्विद्यमानायाम
पि पादद्वाधिकत्ववशादमायामेव समाप्येतेति तद्विषयत्वादस्य वचनस्य संधिमुभयतो यजेतेत्यादीनामपि १५८

वाक्यानामयमेवविषयेप्रतिपदीष्टिसमाप्तिराहिताग्नेः तस्यातुस्थालीपाकएववेष्टिः सचसूर्योदयाद
नंतमेवारम्भणीयः तथास्वल्पकालसाध्यस्यप्रयोगप्रागभावस्यशास्त्रेविधानान्मध्येविरामासम्भवः वि
रामसंतरेणप्रतिपदिसमापयितुंनशक्यः नह्यशक्यंविदधातिशास्त्रंतस्मात्प्रतिपद्यप्रविष्टायांयदिवे
ष्टिस्समाप्यतइत्येतदनाहिताग्निविषयेनस्पृशति पौर्णमास्यांतुविशेषमाहकात्यायनः संधिश्चे
त्संगवादूर्ध्वमर्वागावर्तनाद्भवेत् सापौर्णमासीविज्ञेयासद्यःकालविधौतिथिरिति तत्रैवान्वाधा
नेतदेवयागस्यार्थः अमावस्यायांविशेषमाहवृद्धशातातपः द्वितीयाचिमुहूर्ताचेत्प्रतिपद्यापरा
ह्णिकी अन्वाधानंचतुर्दश्यांपरतः सोमदर्शनात् एतदप्यावर्तनेततः पूर्ववासंधौ चतुर्दश्याम
न्वाधानविषयं यच्चलौगाक्षिवचनं क्षीणेशशिनोपवस्तव्यस्ययागस्यचतुरोविदुः द्वावंशावुत्सृजेदं
शौयोगेतुव्रतकर्मणीति यागप्रतिपदंश्यांशस्यान्वाधानेचतुर्दश्यांशस्यवर्जनमुक्तंतत्रप्रतिपद
श्चतुर्दश्यांशस्यवर्जनमुक्तंतत्रप्रतिपदश्चतुर्थांशानिषेधस्यव्यवस्थाप्रागदर्शिता चतुर्दश्यास्तुश्रा
वर्तनोत्तरकालपर्वप्रतिपत्संधौनिषेधः यदातुन्वाधानदिनेप्रातर्विस्मरणादिनान्वाधानादिकंनकरो

गं°
पा°
१५९

न्ति तदा समारोपिताग्निश्चेत् तदग्निमवरोप्य मथित्वाग्निश्चेदग्निं विहृत्य भोजनात्प्रागन्वाधानादिकं
कुर्यात् तत्राप्यसम्भवे सायं तत्राप्यसम्भवे यागदिने प्रातः पथिकृदिष्टिं चरुं वा कृत्वा सूर्यस्य काल॰
विधिनान्वाधाय पक्षादियागं कुर्यात् पौर्णमास्यां तु येषां प्रातर्विनां सर्वदा समयः कालविधिर्
नि० न्तु तत्तत्तेषां न पथिकृदिष्टिः येषां सर्वदा समयः कालविध्यनुष्ठानं नास्ति किं तु क्वाचिदेव तत्रानु ;
ष्ठानस्थले तेषां पूर्वोक्त एव विधिः एवं प्रकृतौ यागकालोऽभिहितः अथ विकृतयागस्याभिधीयते त
त्र संग्रहे विपंचदशी मतिपश्चात्तत्र प्रकृतान्वाधानदिने विकृतियागं समाप्यानंतरं प्रकृतेन्वाधानादि
कुर्यात् यदीष्ट्या यदि पशुना यदि सोमेन यजेत सोमावस्यायां पौर्णमास्यां वा यजेत तस्यापलम्ब
न प्रकृतिकालप्राप्तेः सोमस्यामपि पुनरमावस्यादिकालविधानात् यदा मध्याह्ने ततः पूर्वं वा पर्वसंधि
स्तदा संधिदिने प्रकृतयागं तत्रैव कृत्वा परेद्युः प्रकृतियागं कार्यः तथा च कात्यायनः आवर्तना
त्प्रागपि यदि पर्वसंधिः कृत्वा तु तस्मिन्प्रकृतिं विकृत्याः तदेव यागः परतो यदि स्यात्तस्मिन्विकृत्याः प्रकृ
तेः परेद्युरितिः अथान्वाधानपिण्डपितृयज्ञदर्शश्राद्धनामेकाहकर्तव्यतानि दृश्यन्ते तत्र लोगाक्षिः १५९

घु१

पक्षान्तेकर्मनिर्वर्त्यवैश्वदेवं च साग्निकः पिण्डयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः पक्षान्तं कर्मान्वाधानं
पिण्डयज्ञः पिण्डपितृयज्ञः अन्वाहार्यकं दर्शश्राद्धं तथा च स्मृत्यंतरमपि पिण्डयज्ञाहृतादर्शश्राद्धे पिंडा
न्विनिक्षिपेत् पिण्डयज्ञस्य कालस्तु दर्शश्राद्धमवेदिति मनुरपि पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेग्निमा
न् पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् पिंडान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् मा
सानुमासिकं मासि मासि भवं अत एव नित्यपिण्डपितृयज्ञस्यानाहिताग्नेरपि कर्तव्यः आपस्तम्बेनाना
हिताग्नेः पिण्डपितृयज्ञो विधायि वानाहिताग्नेरिति नेनवा केनानग्नेरप्यासि देशात् अतस्त्वाहिताग्नेरा
हिताग्नेश्च द्वयोरप्यन्वाधानपिण्डपितृयज्ञदर्शश्राद्धानि कर्तव्यानि तान्येकस्मिन्दिने पूर्वोक्तवचनबला
न्निष्पाद्यानीति सिद्धं अथापराह्णकालः द्वेधा त्रेधा पंचदशधा वा दिनस्याह्नो भागं विभजति स्कान्दे
आवर्तनात्पूर्वाह्णो ह्यपराह्णस्ततः परः शातातपः पूर्वाह्णो मध्याह्नोपराह्णः पूर्वाह्णो वै देवानां
मध्याह्नो मनुष्याणामपराह्णः पितृणामिति व्यासः मुहूर्तत्रितयं प्रातस्तावानेव च संगवः मध्या
ह्नस्त्रिमुहूर्तः स्यादपराह्णस्ततः परः सायाह्नस्त्रिमुहूर्तश्च सर्वकर्मसु गर्हितः व्यासः रौद्रश्चैत्र

मा. या. २१ अनया सौरं वः स्मृतः सैवित्रश्च अयंतश्च गांधर्वः ऊतपस्तया रौहिणश्च विरिंचश्च विजयो नैन्द्रस्तथा म
१६० हेन्द्रो वरुणश्चैव भगः पंचदश स्मृताः अत्र द्वेधा विभागः शुक्लपक्षे पितृकर्माणि दैविके च प्रास्यः पत
स्य शुक्लपक्षस्य श्राद्धकालत्वकरणे स्फुटीभविष्यति त्रेधा विभागो योऽयमपराह्णः स[illegible]मृतनाहः श्राद्धादौ अ
यमप्यर्थ आह्निककालनिरूपणप्रकरणे ज्ञास्यते पारिशेष्यात् संचधा विभागः पंचदशधा विभागः।
अमावस्याश्राद्धादिषु ग्राह्यः अथामावस्याश्राद्धे पूर्वोक्तस्य विद्धाग्रहणे निर्णयः अमावस्या द्विधा शु
द्धा विद्धा चेति विद्धापि च त्रिविधा अमावस्यायामपराह्णे पिण्डपितृयज्ञ इति अमावस्यासम्बद्धापराह्ण
स्यैवाश्वलायनेन पिण्डपितृयज्ञांगत्वविधानात् ननु चापस्तम्बेनामावास्यायां यदहश्चन्द्रमसं न
पश्यंतीन्दुपक्रम्यापराह्णकालं पिण्डपितृयज्ञांगत्वेन विधायाधिवृक्षसूर्ये वेति कालान्तरमपि विहि
तम[illegible]परा ह्णानुसारेण श्राद्धकालनिर्णयः कथमिति चेत् उच्यते साग्निकस्य जीवत्पितृकस्य
दैवात्पिण्डपितृयज्ञकाले अपराह्णे व्यतिक्रान्ते तस्य दधिवृक्षसूर्योऽपि कालो गौणमिति विधीयते उक्तं चै।
तत्। न केवलं पिण्डपितृयज्ञेऽधिक्रियते न दर्शश्राद्धेऽप्यधिकारः चतुर्दश्यामेवापराह्णसंबद्धा न प्रतिपदि १६०

त्येकः प्रतिपद्येवापराह्णिकीन चतुर्दश्यामितिद्वितीयः उभयत्रापराह्णासंबद्धेतितृतीयः उभयत्रा
पराह्णासंबद्धेतिचतुर्थः तत्रस्मृत्यायामसंशयः यात्तुविद्धाचतुर्थी चतुर्दश्यामेवापराह्णासम्बद्धा
नप्रतिपत्तिसापूर्वैवग्राह्या सर्वैरपितथाचजाबालिः पूर्वाह्णोह्नि चेदमावस्यानपराह्णोभवेद्यदि भू
तविद्धैवसाग्राह्यापितृकार्येषुसर्वदा पूर्वाह्णचेदमावस्यानापराह्णोभवेद्यदीत्यत्रप्रतिपदीतिशेषः
तथाप्रतिपद्यप्यमावस्यासर्वाह्णव्यापिनीयदिभूतविद्धैवसाग्राह्यापित्र्येकर्माणिसर्वदा सर्वाह्णव्या
पित्वपराह्णानव्याप्नोतीत्यर्थः अन्वाधानेपिदर्शपितृयज्ञोपिभूतविद्धायामेव द्वितीयात्रिमुहूर्ताचेति
प्रतिपद्यापराह्णिकीअन्वाधाने चतुर्दश्यामितिवृद्धशातातपस्मरणात् अमावस्यायामपराह्णोपिपिण्ड
पितृयज्ञइति स्मृत्यापिण्डपितृयज्ञस्यैतन्नमेव तथाचाधिवलस्मृत्यापिण्डपितृयज्ञकरणेसंध्यायांवात्रौ
वादर्शश्राद्धंप्रसज्येत तन्नुतिषिद्धं तस्मात्सर्वोप्येवंविषयः स्त्रीकार्यः यदाप्रतिपद्येवापराह्णिकी
नचतुर्दश्यांतदाप्रतिपद्विद्धैव यदाहहारीतः अपराह्णःपितृणांतुयापराह्णानुयायिनी साग्रा॰
ह्यापितृकार्येतुनसर्वाह्णानुयायिनी बौधायनः मध्याह्नात्परतोयत्रचतुर्दश्यनुवर्तते सिनीवा

अ.पा.
१६१

वालीत्वमाज्ञेया पितृकर्माणि निष्फलानि अत्रत्रेधा विभक्तदिनमध्यभागपरो मध्याह्नशब्दः मध्याह्नात्परतः
सायंकालपर्यंतः कार्ष्णाजिनिः भूतविद्धाममावस्यां मोहादज्ञानतोपि वा श्राद्धकर्माणि ये कुर्वंते
षामापत्प्रदीयते मोहो विपरीतज्ञानं अज्ञानमप्रतीतिः अत्रैवान्वाधानं पिंडपितृयज्ञश्च यातू
भयत्रापराह्णसम्बद्धा सा तु त्रिप्रकारा तिथिद्वयोपेता तद्द्वयोपेता साम्योपेता चेति तत्र तिथिद्वय
प्रक्रमेपि पिंडपितृयज्ञेधिकारिणामाहिताग्नीनामौपासनाग्नीनां च भूतविद्धा सत्यप्यधिकारः उक्त
उत्ती न्नानां तथा विधुराणां स्त्रीणां शूद्राणां च प्रतिपन्मिश्रिता तथा च कार्ष्णाजिनिः सिनीवाली द्वि
जैर्ग्राह्या साग्निकैः पितृकर्मणि स्त्रीभिः शूद्रैः कुहूर्ग्राह्या तथा चानग्निकैर्द्विजैः साग्निरौपासना
ग्निवापितस्यापि पिंडपितृयज्ञविधानात् तस्या चापराह्णसाध्यत्वात् तिथिद्वयप्रक्रमे चापराह्णस्प
र्शचतुर्दशीतृतीययामे दर्शप्रतिकानुप्रवेशादपराह्णोऽत्र परदिनापेक्षया पूर्वेदिन एवाधिकामावस्या
संस्पर्शादन्वाधानं विधाय पिंडपितृयज्ञानंतरमन्वाहार्यकं भूतविद्धायमेव कार्यं अनेनैवाभिप्राये
ण बौधायनः चतुर्दशी चतुर्यामे चतुर्दशांशं च तुर्यामे अपराह्णस्पृष्टे अमाग्राणि तेन दृश्यते अ १६१

पित्र्तिथित्वयवशादनुप्रविष्टं दृश्यतेइतितात्पर्यं स्थोभूतेपरेद्युरपराह्णोप्राप्तिपक्षेप्यते तत्रचतुर्दश्यामेवेति
अनग्निकउत्सन्नाग्न्यादयः तेषांचान्वाधानपिण्डपितृयज्ञयोरधिकाराभावात् दर्शश्राद्धं तिथिव व
द्धिप्रक्रमेणश्राद्धंसामस्येचतत्वैषांपरैव यदाहस्पर्वेत्ताः दृष्टचन्द्रासिनीवालीनष्टचन्द्राकुहूर्मता सिनी
वालीकुहूश्चैवश्रन्तेकोपितृकर्मणि स्यातांहियदिमध्याह्नात्श्राद्धंतत्रकथंभवेत् तिथिक्षयेसिनी
वालीतिथिवृद्धौकुहूर्मता साम्येपिचकुहूत्तेयावेददवेदांगदर्शिभिः मध्याह्नात्स्यातां मध्याह्नादुपरि
अपराह्णोभवेतामित्यर्थः अत्रापियत्रापराह्णोधिकस्पर्शस्तत्रैवपिण्डपितृयज्ञः दर्शश्राद्धंचान्वाधान
स्यपिण्डपितृयज्ञस्पूर्वभावित्वेन तत्रैवप्रातरन्वाधानं यदात्वपराह्णाधिकसंस्पर्शवशात्पूर्वविद्धा
यांपरविद्धायांवापिण्डपितृयज्ञदर्शश्राद्धप्राप्तिः अथचपर्वकालनिर्णयवशात्पिण्डपितृयज्ञदर्शश्राद्ध
कालव्यतिक्रमोन्वाधानस्यतदाकर्मद्वयानुरोधेनतत्रत्रयंपिण्डपितृयज्ञदर्शश्राद्धेष्टैवान्वाधानम्
बहूनामनुग्राह्योन्यायपुष्टइतिन्यायेनानेनाकान्वयहृस्यन्याप्यत्वा तथाचपर्वत्रतीयांशेप्रतिपच्चतुर्थांश
पियागानुष्ठानेप्राप्तेनाविरोधः एवंचपंचदशीयांशप्रतिपच्चतुर्थांशेयागानिषेधकवचनोत्तेवविषयत्वलभ

नि· पा·
१६२

तिरिक्तविषयेप्यन्यानि उभयत्रापराह्णसंबंधिनीति चतुर्थः पक्षः सात्र सर्वेषां पक्षे एवं तत्रापराह्णव्यापित्वेपि
कुतपकालसंबंधित्वात् तथा च हारीतः भूतविद्धाप्यमावस्या प्रतिपन्मिश्रितापि वा पित्र्ये कर्मणि विद्वद्भि
र्ग्राह्या कुतपकालिकीति गौतमोपि पूर्वाह्णे चेत्प्रतिपदो भूते सायममा यदि आरभ्य कुतपे श्राद्धं रोहिणीं
नैव लंघयेत् प्रतिपद्यदि पूर्वाह्णे कुतपेनापराह्णे भूते सायंकाल एव नापराह्णे तदा प्रतिपदि कुतपका
लसंबंधित्वात् तत्र कुतपे श्राद्धमारभ्य कुर्यात् रोहिणीं न लंघयेदिति तात्पर्यार्थः कुतो मुहूर्तमारभ्याष्ट प
मो मुहूर्तः आपस्तम्बः प्रकाशं तदेणाह कुतपाद्यान्मुहूर्तांस्त्रीन्यावद्वर्त्तति भास्करः सकालः कुतपस्त
त्र पितृणां दत्तमक्षयमिति ननु पूर्वोक्तपक्षे सूक्तवचनं भूतविद्धापि पित्र्ये पितृयज्ञादिषु ग्रहीतासा न यु
क्ता तत्र चंद्रदर्शनासंभवात् चन्द्रदर्शने चापि पितृयज्ञो विहित आपस्तम्बेन अमावस्यायां यदहश्चन्द्रम
सं न पश्यन्तीति उच्यते अदर्शनं नाम कलात्रयस्य चन्द्रस्य न चक्षुर्व्यापारागोचरत्वं तथा सति उदयादूर्ध्वं
मुहूर्तमात्रचतुर्दश्यामावपि चन्द्रस्य चक्षुर्गोचरत्वात् तत्रापि दर्शपितृयज्ञादि न स्यात् तथा च पराह्णे
पिंडपितृयज्ञादि विधायकवचनाविरोधः प्रसज्येत अतो दर्शनपक्षः त्रयपरः तथा च कात्यायनः १६२

पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यत इति क्षयोपक्रमो भवतीति पित्र्यां स एवाह अष्टमेंशे चतुर्दश्याः क्षी
णो भवति चंद्रमाः अमावास्याष्टमेंशे च पुनः किल भवेदणुः अत्रेन्दुराये प्रहरे वा तिष्ठते चतुर्थभागोनकला
वशिष्टः तदंतमेव क्षयमेति कान्ह एवं ज्योतिःशास्त्रविदो वदंति आग्रहायणीमार्गशीर्षामावस्या आ
द्यप्रहरे अमावस्यायाः तदंते अमावस्यांते अत्र केचिदेवं वर्णयंति आग्रहायणीज्येष्ठामावस्ययोः परेद्युरपरा
ह्णव्यापित्वे पूर्वेद्युस्तु न पराह्णव्यापित्वेपि परेद्युरेव पितृयज्ञादिकमिति तदयुक्तं अपराह्णः पितॄणामिति
श्रुत्याविरोधात् तयामावस्यायास्मायाह्ने पिण्डपितृयज्ञः तथाश्वलायनादिवचनान्नापि विरुध्येत पूर्वेदि
नेतु श्रुत्यादिविरोधः अथ च क्षयोपि सूर्पणीकल्पोपि चतुर्थभागोनकालवशिष्टत्वात् परं तु क्षयशब्दस्य सं
कोचनमात्रमेव वाक्याविरोधापेक्षया च संकोचः श्रेयान् तर्हि ज्योतिःशास्त्रे आग्रहायण्यां ज्येष्ठायां च चंद्र
क्षयं प्रति विशेषोक्तिः किमर्थेति चेदुच्यते अन्यमासेषु द्वितीयायाः आद्यतृतीयमुहूर्ते चरमभागे चंद्रद
र्शनं भवति मार्गशीर्षज्येष्ठयोस्तु तथा नाऽपि किं त्वमावस्याया अष्टमांशे क्षीणत्वात् द्वितीयायाः आद्यतृतीयमुहू
र्तानंतरं चतुर्थपंचमादिमुहूर्ते चन्द्रदर्शनमित्येतत्प्रतिपादनार्थं ज्योतिःशास्त्रस्य कालस्य ह्रस्वत्वादिविष

श्रा॰ पा॰ यत्वात् श्राद्धकर्मविधिप्राधान्याभावात् अयं च संग्रहीतार्थः यत्र पूर्वोक्तरीत्या भूतविद्धाश्राद्धादिभ्यो ग्राह्या तत्र
१६२ स्मृतिविरिक्तविषयाणि भूतविद्धायामन्वाधानापिण्डपितृयज्ञदर्शश्राद्धनिषेधकवाक्यानि यत्र चोक्तरीत्या
प्रतिपन्मिश्रितायामन्वाधानादीनि तत्र स्मृतिविरिक्तविषयाणि प्रतिपद्विद्धायममावस्यायामन्वाधाना
दिनिषेधकवाक्यानीति यत्तु हारीतवचनं कन्यामकरमीनेषु तुलायां मिथुने तथा भूतविद्धैव सर्वेषां
स्यामवति यत्नतद्वृतितद्भूताविषयं अतएव वालिः तुलायां मकरे मीने कन्यायां मिथुने तथा भूतविद्धा व्रते
ग्राह्या शेषेषु प्रतिपद्युतेति अमावस्यायामिवाष्टकामन्वंतरयुगाद्यपरपक्षेपि श्राद्धकालो ज्ञेयः अत्रा
पिण्डपितृयज्ञाभावात्कुतप एव श्राद्धस्योपक्रमः अमावस्यायां वा सायाह्नेपि पिण्डपितृयज्ञानंतरं दर्श
श्राद्धं यानि च शुक्लपक्षश्राद्धानि पौर्णमास्यां वैशाखशुक्लतृतीयादिषु विहितानि तानि तु कुतपकालप्रा
धान्येनानुष्ठेयानि एतदुक्तं भवति यथामावस्यायामपराह्णव्याप्यल्पत्वमहत्त्वाभ्यां निर्णयः एवं कुत
पान्येनानिर्णय इति अनेनैवाभिप्रायेण मार्कण्डेयः शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः कृ
ष्णपक्षापराह्णे तु रोहिणं न तु लंघयेत् अत्र पूर्वाह्णशब्दो द्वेधाविभक्तस्याह्नः पूर्वभागः यद्यप्यत्र सा १६२

मासेन पूर्वाह्णाद्यनुयायित्वस्य पितृकर्मणि विद्वद्भिर्ग्राह्यत्वात् कुतपकालिकेति पितृकर्मणि विद्वद्भिर्ग्राह्यत्वात् कुतप
कालिकेति पितृकर्मांगत्वात् कुतपकालस्य तन्मध्ये एव पूर्वाह्णांतर्भावो ग्राह्यः आवर्तनसान्निध्यकृष्टः का
लः शुक्लपक्षश्चाह्णोपक्रमे गमितार्थः मध्याह्नोपि कुतपः तथा च स्मर्यते ऊं यत्र गोभिः कान्तेन गोपति
स्तापयेन्त्वाणो स कालः कुतपो नाम स्यादत्र प्रदीयतत्क्षयानि अथ सूतानां कालः तत्र मासस्य सौरादिभे
देन भिन्नत्वात् तत्र कोमासो ग्राह्य इत्याकांक्षायां यमः विवाहादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः
आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते स्मार्ते अब्दद्वयेपि वै मासश्चान्द्रः स्यात् पितृकर्मणि यज्ञो
सावनमित्याकृतावाहीः सर्वव्रतेषु च आर्देनत्वत्रेन तत्र साध्यव्रतेष्वित्यर्थः अस्य श्लोकस्यायमर्थः यज्ञादौ
मासंसंवत्सरसाध्ययज्ञव्रतप्रायश्चित्तादिक्रियादिषु मास साध्याः यागाः दर्शपौर्णमासाभ्यां यज्ञेत मासैवे
श्वदेवेन कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीत्यादिवाक्यैर्विहिताः मासमाध्यव्रतानि मासो
पवासादीनि मासमाध्यप्रायश्चित्तक्रियागोष्ठे वसन् ब्रह्मचारी मासमेकं पयोव्रत इत्यादि वचनैर्विहिताः
संवत्सरसाध्याय ज्ञाः गवामयनादिसंज्ञकाः सत्र यागाः संवत्सरेसाध्यानि व्रतानि अग्नसत्तनाश्चीयादि

या॰
१६४

न्यादिष्वातिविहितानि ऋतुः संवत्सरः स्नानदानमोदनेपयः प्रभृतीनां संवत्सरसाध्याः प्रायश्चित्तक्रियांद्वादश
वार्षिकाद्याः श्राद्धिकेसांवत्सरिकेपितृकार्येषु एमासिकश्राद्धादौ अपिशब्दात्तद्व्यतिरिक्तेमांससंवत्सर
साध्यदेवकार्ये तथाचपितामहः दैवेकर्माणिपित्र्येचमासः चान्द्रमसः स्मृतः एषांचमासानां भेदः
सावित्रमतेभिहितः दर्शाद्दर्शश्चान्द्रस्त्रिंशाद्दिवसस्तुसावनोमासः रविसंक्रांतिकश्चैन्द्रः सौरोमासोनि
गद्यतेतत्रैः सावनश्चान्द्रस्तुल्याहिद्दर्शान्तस्त्रिंशतादिनैः एकराशौरवियावत्कालंमासःभास्करः सा
वनायहोरात्रव्यवस्थापिब्रह्मसिद्धांते सावनेस्यादहोरात्रउदयादुदयाद्रवेः सौरंत्रिंशांशराशेषष्ट्यंशभुक्ति
रित्यिष्टाम्भोमासैनत्वं यावताकालेनरविर्देशाषादिराशीनांत्रिंशमंशंभुंक्तेसकालः सौराहोरात्रइत्यर्थः ए
वंप्रासंगिकंपरिसमाप्यप्रकृतमनुसरामः तत्राहहारीतः स्मृत्यंतरे मासपक्षतिथिस्पष्टेयस्मिन्यो
म्रियतेहनि प्रत्यब्दंतुतथाभूतंतत्याहंतस्यतद्विदुरिति तिथिश्चान्द्राहोरात्रः साचयदाशुद्धानदानसं
शयः यदातुविद्वातदायत्रसायान्हेत्रिमुहूर्तव्यापिनीमृततिथिः साग्राह्या तदाहगोविलः घटव्यापि
नीचेत्स्यादस्तंतातह्रस्ययदातिथिः पूर्वविद्वैवकर्तव्यात्रिमुहूर्ताभवेद्यदि सायंत्रिमुहूर्तेत्यर्थः यत्तुकार्ष्णा १६४

जिनिवचनं अस्तमनवेलायां कलामात्रापि या तिथिः सैव प्रत्याब्दिके ज्ञेया नापराह्णहानिदेति तन्मू-
र्वं विद्धा प्रसंसायं कलामात्रापि ग्राह्या किंतु त्रिमुहूर्त्तेति यत्तु दिनांते पंचनाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः
७२ उदये च तथा पित्र्ये दैवे चैवं कर्मणीति तत्तु सायंकालपंचनाडीनां पुण्यत्वं प्रतिपादयति न तु षष्ठनाड्या अ-
पुण्यत्वप्रतिपादनपरं नारदीयपुराणेपि जनने मरणे नृणां तिथिस्तात्कालिकी मता पित्र्ये स्तमयवे-
लायां स्पृष्टा पूर्णा निगद्यते अस्तमयवेलायां सायंकाले मुहूर्त्तत्रययुक्तेत्यर्थः श्रुतिरपि तस्मात्पितृभ्यः
पूर्वेद्युः क्रियत इति तथा पूर्वाह्णो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितॄणामिति त्रिधावि-
भक्तस्याह्नस्तृतीयभागात्मके पराह्णे मुहूर्त्तत्रयव्यापित्वादपराह्णसम्बद्धापि संबद्धापि सा तिथिर्भवति सा
तिथिः सकला ज्ञेया यस्यामस्तमितो रविरिति (सा तिथिः सकला ज्ञेया यस्यामस्तमितो रविरिति) एकदेशव्यापि-
त्वेपि सम्पूर्णत्वमस्तीति कृत्वा उक्तप्रपञ्चोपक्रमः तस्य सकलपितृश्राद्धशेषत्वात् एवं यानि एवं विद्धाश्रा-
द्धानि तानि त्रिमुहूर्त्तविद्धाविषयाणि ज्ञेयानि यदा पूर्वेद्युस्सायंकाले मुहूर्त्तत्रयव्यापिनी तिथिर्वृद्धिवशात्प-
रेद्युरस्तमयगामिनी तदा परेद्युरेव उक्तपास्तमयोस्सम्बधात् तथा च मरीचिः अपराह्णव्यापिनी सा दा।

मा पा
१६५

द्विकस्य यदा तिथिः महतीयत्र तद्दिनं प्रशंसंति महर्षयः यत्र सायंकाले पूर्वेद्युस्त्रिमुहूर्त्तव्यापिनी परेद्युः सायं
कालेपि वर्त्तते न तत्सममयेन तदा पूर्वेद्युः नारदोप्याह दार्शं च पौर्णमासं च पित्र्योः सांवत्सरं दिने पूर्वा-
विद्धमकुर्वाणो नरकं प्रतिपद्यत इति यतः श्रेयो ग्राह्यिकया मृताहतिथेरस्तमयसंबद्धाया एवोपपादकत्वे
हुतं त्वस्तमयवेलायामित्यादिवचनैरतः पूर्वेद्युरेव युक्तं अयं च सामान्यनिर्णयः विशेषस्तु का-
लनिर्णये द्रष्टव्यः एवं षाण्मासिकादिष्वपि ज्ञेयं तेषामपि मृताहतिथिकर्त्तव्यत्वाविशेषात् एकोद्दिष्टे
त्वयं विशेषः मध्याह्नव्यापकः कर्त्तव्य इति तथा च स्मर्यते पूर्वाह्णो दैविकं कार्यमपराह्णे पैतृकं ए-
कोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति यानि च मृताहव्यतिरिक्तापरपाक्षिककाहरणपश्राद्धादीन्ये
कोद्दिष्टानि शास्त्रहतस्यैकोद्दिष्टश्राद्धं च तानि मध्याह्नकालस्य प्रधानत्वात्तत्कालाधिस्पर्शवत्यां प्रतिपदा-
दितिथौ कर्त्तव्यानि तेषां मृतमहेश पक्षस्पृष्टतिथिकर्त्तव्यतानियमस्याभावात् नियमाभावश्च शुक्ल-
पक्षमृतस्यापि तद्दर्शव्यतिरिक्तातिथिमृतस्यापि तत्र श्राद्धकरणात् मृततिथेरेव सायाह्ने त्रिमुहूर्त्तव्या-
पित्वावचनोपात्तत्वात् एवं तत्रैव व्यवस्था यत्रोभयत्र मध्याह्नकालस्पर्शाभावस्तत्र पूर्वेद्युरेव पितृकार्यं १६५

पूर्वविद्धायाः प्रशस्तत्वात् मृताहकालनिर्णयप्रसंगाद्ग्रहणादिनश्राद्धिकप्राप्तौ विशेषोभिधीयते तत्र यदाग्र
हणादिने श्राद्धं सांवत्सरिकं प्राप्तं तदान्नासम्भवे आमेन आमासम्भवे हेम्ना वा कुर्यात् यदाह गोविलः
दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थिते अन्नेनासम्भवे हेम्ना कुर्यादामेन वा सुतः अत्र दर्शरवि
पितृसुतशब्दाः प्रदर्शनार्थः न्यायस्य समानत्वात् अतश्चन्द्रग्रहणेप्यावश्यकसपिण्डाद्युद्देशेन श्रा
द्धाधिकारिणा आमश्राद्धादि कर्तव्यं एवं मासिकेपि ज्ञेयं एवं च श्राद्धविवेके द्विजातीनामामश्राद्धं प्रकी
र्तितं अमावस्यादिनियतं मासि सांवत्सराहते इति मासिकाब्दिकविषये योयमामश्राद्धनिषेधः स ग्र
हणव्यतिरिक्तविषयः मृताहे प्राप्ते यस्य भार्या रजस्वला सतास्मिन्नेव दिने अन्नेनैव श्राद्धं कुर्यात् ना
मेनान्यकालांतरे वा यस्त्वस्वस्थं तत्र श्राद्धिके समनुप्राप्ते यस्य भार्या रजस्वला पंचमेहनि तत्कुर्यात् श्राद्धं त
मैतहति तदुक्तं प्रत्याब्दिके अपुत्रा पत्नी स्वयमेव कर्त्री यदि रजस्वलाभावे तद्विषयमेतद्वचनं अपु
त्रा तु यदा भार्या संप्राप्ते भर्तुराब्दिके रजस्वला भवेत्सा तु कुर्यात्तत्पंचमेहनि इति गोतमस्मरणात् अथ
मृताहापरिज्ञाने कालः तत्र बृहस्पतिः न ज्ञायते मृताहश्चेत्प्रमीते प्रोषिते सति मासश्चेत्प्रतिविज्ञात

श्रे पा
१६६

स्तदर्शः स्यान्मृताहनि। मृताहनि मृतदिने यत्कर्तव्यं तन्मृतिज्ञातदर्शे विज्ञाते तत्स्यामावास्यायां कर्तव्यमि-
त्यर्थः यदा मासो न विज्ञातो विज्ञातं दिनमेव तु तदा मार्गशीर्षे मासि माघे वा तद्दिनं भवेत् दिनमासौ न
विज्ञातौ मरणस्य यदा पुनः प्रस्थानदिनमासौ तु ग्राह्यौ पूर्वोक्तया दिशा अत्र दिनशब्दस्तिथिपरः मा-
रीचिः श्राद्धविघ्ने समुत्पन्ने त्वविज्ञाते मृताहनि कुर्यादन्नेन तत्कृष्णायामेकादश्यां विधुक्षये श्राद्ध
विघ्ने प्रमादादिना सांवत्सरिकमासिकविघ्ने तत्तिथ्यतिक्रमे जाते तदनंतरभाविकृष्णैकादश्यां दर्शे वा कार्यमि-
त्यर्थः आशौचेन सूतिकादिना श्राद्धविघ्ने समुत्पन्ने सति आशौचे व्यतीते कार्यं तत्र प्रकरणेन तदनंत-
रभाविकृष्णैकादश्यां दर्शे वा कार्यम् तथा च ऋष्यशृंगः देवात्पितॄणां श्राद्धे तु आशौचं जायते यदि आ-
शौचे तु व्यतिक्रान्ते तेभ्यः श्राद्धं प्रदीयते यच्च स्मृत्यंतरे उदह्याच्चेत्प्रमुच्येत केन चित्सूतकादिना सूतका-
नंतरं कुर्यात्तु तत्सल दहरेव वेति एतच्च सूतकानंतरं मासादि दिना प्रकरणो मासांतरे तदह्नोपि कालशति
प्रदर्शनात् अतस्तदहरेकादशी दर्शश्चेति गौणकालः । अथामश्राद्धकालनिर्णयः तत्रात्मनो देशका-
लानां विप्लवे समुपस्थिते आमश्राद्धं द्विजैः कार्यं शूद्रेण तु सदैव हीति द्विजस्य देशकालविप्लवादिषु श्राद्ध १६६

स्यात्सर्वदामश्राद्धाधिकारः एतदुक्तं भवति शूद्रस्यामश्राद्धं नित्यं द्विजानां नैमित्तिकमिति नित्यत्वं चैव
भार्यारतः शुचिर्भृत्यभर्ता श्राद्धक्रियापरः इत्यादिवचनैः शूद्रस्य श्राद्धाधिकारः एतदुक्तं भवति शूद्रस्याम
श्राद्धं नित्यं द्विजानां नैमित्तिकमिति नित्यत्वं चैव भार्यारतः शुचिर्भृत्यभर्ता श्राद्धक्रियापरः इत्यादिवचनैः
शूद्रस्य श्राद्धाधिकारे सत्यपि स्वमंत्रेणानपक्वं भोजयेद्द्विजान् शूद्रोपि कदाचन भोजयन्नत्यवायी स्यान्न
च तस्य फलं भवेदिति ब्राह्मणभोजने निषिद्धे कथं न हि श्राद्धप्रयोगः इत्यपेक्षायां शूद्रः कुर्यान्नदावहीत्यने
नामान्नगुणोपि विधीयते अथवा ब्राह्मणभोजने निषिद्धे अर्थाद्भोजनोपयुक्तं सन्निहितमामान्नमेव
प्राप्तमिति गुणस्यामान्नस्य प्राप्तत्वादनूद्यते शूद्रः कुर्यात्सदैव हीति अतः शूद्रस्यामश्राद्धं नित्यं अर्थो
च्यते ब्राह्मणभोजनं निषिद्धं निषेधश्च प्राप्तिपूर्वकः प्राप्तिश्च विधिपूर्विका एवं विधिनिषेधयोः शास्त्रग
म्यत्वात् षोडशीग्रहणाग्रहणवद्विकल्पः तथा च पक्वभोजनं पक्वे आमान्नमिति मिति एवं नित्यत्वेपि न नित्यत्वं २
द्वे आमश्राद्धं तु सर्वाह्णतः इति शातातपवचनं शूद्रकर्तृके नित्यत्वे द्विजकर्तृके चानित्यत्वे आमश्राद्धे सर्वा
ह्णकालस्यांगत्वं बोधयितुं नालं नित्यानित्यसंयोगविरोधात् तस्मादनित्ये द्विजकर्तृके वा तिष्ठतो नित्यं त
ंतत्सारं गगतः प्राप्तस्यैकालंजं भक्षणादिनिषिद्धत्वे ते यदि रागतः प्राप्तावपि विकल्पः कलंजभक्षणमपि विकल्प्येत तस्मात्साधूक्तं शूद्रस्यामश्रा
द्धं नित्यमिति २ वि

अ॰ पा॰
१६८

श्राद्धांगभूतापराह्णसंबंधत्वादपराह्णेकर्त्तव्यं अनेनैवाभिप्रायेण शातातपेनोक्तं मध्याह्नात्परतोयस्तु
कुतपः समुदाहृतः आममात्रेण तत्रैव पितॄणां दत्तमक्षयमिति अतः स्पष्टोपराह्णोद्विजः पूर्वाह्णो एवं
व्यवस्थायां क्रियमाणायां शातातपवचनयोर्वैयर्थ्यं विरोधोपि परिहृतं स्यात् यत्त्वमावस्यायां पिं
ण्डपितृयज्ञाधिकारीद्विजस्तस्यापि पिण्डपितृयज्ञकालानुरोधेनापि पिण्डान्वाहार्यकामश्राद्धमपरा
ह्णएवनपूर्वाह्णे एवं च यत्कैश्चिदुक्तं शूद्रोप्यपराह्णेकुर्यादिति तच्चिन्त्यं तत्र यथा न एवं वर्णयंति
शूद्रकर्तृकामश्राद्धे पूर्वाह्णः कालो विधीयते पूर्वा सा हि निमित्तद्विजकर्तृकामश्राद्धेत्वतिदेशात्
पूर्वाह्णकालप्राप्तिरिति तदयुक्तं शूद्रकर्तृकनित्यामश्राद्धे सामान्यतः प्राप्तापराह्णकालपरित्या
गः अप्राप्तपूर्वाह्णस्वीकारः द्विजकर्तृकनित्यामश्राद्धेत्वतिदेशात् पूर्वाह्णातिदेशः पूर्वाह्णस्वी
कारइतिव्यापारत्रयं अस्माकं तु नित्यद्विजकर्तृकामश्राद्धे पूर्वाह्णकालस्योपदेशात् एव स्वीकार
इतिमहल्लाघवं तस्मादस्मदुक्तरीतिरेवानुसरणीया एतच्च यस्मिन्दिने मावस्यादिश्राद्धं विहितं त
त्रैव पूर्वाह्णो यदा तिथेर्दिनद्वये समसंबंधस्तदा कुतपकालएवन्यूनाधिकसंबंधवशान्निर्णयः कुत १६८

म·पा·
१५३
मैवेशएपयोतनार्थं दैविकेत्युनित्यश्राद्धवत् अत एव दैविकमित्यनुहत्तौ पारस्करः तन्नित्यश्राद्धवत्कुर्याद्वाद
शणादिश्रुयन्त्वतश्शति गच्छन्देशांतरमिति तीर्थयात्रार्थं देशांतरगमनसमये यात्रांकृत्वा पुनर्गृहप्रवेशोतिज्ञेयं
सर्पिषासर्पिः प्रयानकेन तथाशरीरोपचये शरीरोपचयनिमित्तसाधनादिप्रयोगकाले अयाधिकारि
णः तत्रशौचलवके पुत्रार्थाधिकारिणोनिरूपिताः साम्प्रतंकेषुचित्कर्मविशेषेषुकेषांचनाधिकारोनि
रूप्यते तत्रविष्णुपुराणोपराशरः सर्वाः क्रियामध्यमाम्नातयाचैवोत्तराः क्रियाः त्रिप्रकाराः क्रियाह्ये
तास्तासांभेदांश्शृणुष्वमे आहाराद्द्वादशाहाम्नमध्येयाः स्युःक्रियामताः सर्वास्तामध्यमामासिमासैको
द्दिष्टसंज्ञताः प्रेतेपितृत्वमापन्नेसपिंडीकरणादनु क्रियंतेयाः क्रियाः पित्र्याः प्रोच्यंतेतेनृपोत्तम पितृमा
ध्यमध्याम्नपुत्राद्यैरेवचोत्तराः दौहित्रैर्वानरश्रेष्ठकार्यास्तत्तनयैस्तथेति सर्वाः क्रियामध्यमाम्नकर्ग
व्याख्यार्थः पुत्राद्यैर्भ्रातृसंतानैः पुत्रः पौत्रः प्रपौत्रो वा तद्भ्रातृसंततिर्वा ततेनैवोक्तत्वात् दौहित्रैस्तु भविष्य
त्पुराणोविशेषः यथाव्रतस्योपिसुतः पितुः ऊर्ध्वंक्रियान्तपउदकायमहावाहो दौहित्रोपितथार्हति एवंच १५३

देवान्मुद्दिश्यप्रयच्छाद्धंतत्तद्दैविकमुच्यते हविष्येणविशिष्टेनसप्तम्यादिष्वयन्ततः गच्छन्देशान्तरंयत्तुश्रा
द्धंकुर्यात्तुसर्पिषा यात्रार्थमितितत्प्रोक्तंप्रवेशेनचसंशयः शरीरोपचयेश्राद्धंमर्थोपचयएवच पुष्ट्यर्थ
मेतद्विज्ञेयंमौपचायिकमुच्यते श्राद्धंपुत्रजन्मविवाहादि निमित्तेनावश्यएकेनैकोद्दिष्टेनापन्नेसैवनत्तु
ल्यंशेषमंगजातंभवति सपिण्डीकरणस्योभयात्मकत्वात् एकोद्दिष्टंस्त्रियाश्चापि एकोद्दिष्टंसपिं^
ण्डीकरणंउभयात्मकस्यैकदेशेनातिदेशः क्रियतेचपर्वणीवत् अथपर्वसंक्रान्त्यादि गोष्ठीश्राद्धं श्रा
द्धंगोष्ठ्यांक्रियमाणायांतत्प्रसंगाद्यच्छ्राद्धंतद्गोष्ठीश्राद्धं कल्पतरौ गोष्ठीश्राद्धकर्तृसमुदायःसम्य
त्त्वार्थमिति संपच्छ्राद्धंसामग्रीतयायत्तुस्वेनतद्वै अयमर्थः बहूनांविड्पांकेनापिनिमित्तेनयुगप
त्तीर्थश्राद्धादिकेकर्तव्यतयाप्राप्तेदेशकालादिवशात् पृथक्पाकाद्यसंभवेसंभूयश्राद्धसामग्री
संपादनेनयच्छ्राद्धंक्रियतेतद्गोष्ठीश्राद्धमिति निषेककालेत्यादि एतच्चश्रौतस्मार्तकर्मोपलक्षण
एतच्चश्राद्धंश्राद्धंतत्कार्यं कर्मांगंश्राद्धंवक्तव्यमिति पारस्करवचनात् कर्मांगसंज्ञाकरणमकरणे

पा॰ १५३

धानत्वाभावात् तथाच शातातपः नित्यो विसृष्टः प्रत्यहं यद्दद्यादन्नादिनाहृते स्वभर्तृपितृमात्राद्यस्तु नित्यः संयतः
स्मृतेति अथ श्राद्धभेदाः विश्वामित्रः नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनं पार्वणं चेति विज्ञेयं गोष्ठ्यां शुद्ध्य
र्थमष्टमम् कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतं यात्रास्वेकादशं ज्ञेयं पुष्ट्यर्थं द्वादशं स्मृतमिति एतल्लक्षणा
नि च भविष्यपुराणे अहन्यहनि यच्छ्राद्धं तन्नित्यमिति कीर्तितम् वैश्वदेवविहीनं तदशक्तावुदकेन च एको
द्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते तदप्यदैवं कर्तव्यमयुग्मान्भोजयेद्द्विजान् कामाय विहितं काम्यमभिप्रेता
र्थसिद्धये पार्वणेन विधानेन तदप्युक्तं खगाधिप वृद्धौ यत्क्रियते श्राद्धं वृद्धिश्राद्धं तदुच्यते सर्वं प्रदक्षिणं।
कार्यं पूर्वाह्णे चोपवीतिना गन्धोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्
ये समाना इति द्वाभ्यामेतज्ज्ञेयं सपिण्डनं नित्येन तुल्यं शेषं स्यादेकोद्दिष्टं स्त्रिया अपि अमावास्यायां यत्क्रि
यते तत्पार्वणमिति स्मृतं क्रियते वा पर्वणि यत्तत्पार्वणमिति स्थितिः गोष्ठ्यां यत्क्रियते श्राद्धं गोष्ठीश्राद्धं
तदुच्यते बहूनां विदुषां सम्यक् सुखार्थं पितृतृप्तये क्रियते शुद्धये यद्धि ब्राह्मणानां तु भोजनं शुद्ध्यर्थमिति
तत्प्रोक्तं वैनतेय मनीषिभिः निषेककाले सोमे च सीमन्तोन्नयने तथा ज्ञेयं पुंसवने चैवं श्राद्धं कर्माङ्गमेव हि १५३

नस्यपराह्णः श्रेयानिति श्राद्धमितिशब्दोवाचकोयस्यतत्कर्मश्राद्धशब्दं तस्मिन्कर्मणि देवताः पितरो वसु
रुद्रादित्यरूपाः ब्राह्मणा आहवनीयस्थानेभवंतीत्यर्थः एतदुक्तंभवति पित्रुद्देशेनत्यक्तस्यद्रव्यस्यब्राह्मणस्वी
करणंयदेतावद्विशिष्टंश्राद्धस्यप्रधानंरूपमिति अत्रपितृदेवताकेकर्मणिमुख्यः श्राद्धशब्दः यथानित्याग्निहो
त्रेग्निहोत्रशब्दः दैवश्राद्धादिगौणःप्रयोगः सचतद्धर्मप्राप्त्यर्थः यथाकुंडपायिनामयनेमासमग्निहोत्रंजु
होतीत्यग्निहोत्रशब्दप्रयोगः सचतद्धर्मप्राप्त्यर्थः अग्नीषोमीयंपशुमालभतेत्यत्रधर्मप्राप्त्यर्थः अग्नीषोमी
यंपशुमालभेतेत्यत्रयथाग्निषोमयोर्मिलित्वैवैकदेवतातथात्रापिपित्रादीनांनमिलितानांदेवतात्वंअपितुप्रत्ये
कमेव पित्रेपितामहायप्रपितामहायेति विभक्तादिभिः पृथक्पृथक्चतुर्थ्येकवचनांतत्वेननिर्देशात् यत्रापितृ
भ्योदद्यादित्यादौचतुर्थीबहुवचननिर्देशः सचाभिधानसौकर्यायैकविभक्त्यंतत्वेननिर्देशोगर्गाभोज्यंतामि
तिवत् यथागर्गाः प्रत्येकमेवभोज्या एवंपितरोपिप्रत्येकमेव तस्मान्नव्यासज्यवृत्तिदेवतात्वमपितुप्रत्येक
मेवतथानसपत्नीकस्यापिपित्रादेर्देवतात्वमपितुप्रत्येकमेवतथानसपत्नीकस्यापिपित्रादेर्देवतात्वंप्राप
कप्रमाणाभावात् स्वभर्तृपिंडांशेनैवपत्नीनांतृप्तिविधानात् भर्तृप्राधान्यंपत्नीनामप्राधान्यमितिसमप्रा-

श्रा भिन्नस्पृष्टानि कृतानि च प्रत्यहं तानोद्दिष्टानि ग्रन्थविभिः कृतानीति ज्ञातान्यपि शुद्धानीत्यर्थः इति मदनपारि
१५९ जाते ऽथ श्राद्धे नाम षष्ठः स्तबकः ६ दशाहादिरूपकालापगमेनऽलव्यापिनी शुद्धिरुक्ता तदनंतरं श्राद्ध
विधेः क्रमप्राप्तत्वेपि शुद्धिप्रसंगात्पूर्वकस्तबके द्रव्यशुद्धिर्निरूपिता साम्प्रतं प्रासंगिकं सारित्यपरिसमाप्य
क्रमप्राप्तश्राद्धविधिरेव प्रतन्यते तत्रादौ श्राद्धमाहिमा याज्ञवल्क्यः आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं
सुखानि च प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः मार्कण्डेये तान्सर्वान्यजमाने ये श्राद्धेऽयायथा
विधि समाप्यायय तेवत्स येन येन स्थ एवतत् अन्नप्रकिरणं यच्च मनुष्यैः क्रियते भुवि तेन तृप्तिमुपा
यांति ये पिशाचत्वमागताः यदंबुस्नानवस्त्रोत्थं भूमौ पतति पुत्रक तेन ये तरुतां प्राप्तास्तेषां तृप्तिः प्रजा
यते यास्तु स्नुकाणिकाः पतंति धरणीतले ताभिराप्यायनं तेषां ये देवत्वमुपागताः ये चादंताःऽ
लेजाताः क्रियायोग्या ह्यसंस्कृताः विपन्नास्तेन विकिरसंमार्जनजलाशिनः भुक्त्वा चाचमनतोयं यज्ज
लं यच्चांघ्रिसेचने ब्राह्मणानां तथैवान्नेन तेन तृप्तिं प्रयाति वै तेनानेकेऽकुलेतत्रतत्र योन्यंतरं गताः
प्रयांत्याप्यायनं वत्स सम्यक् श्राद्धक्रियावताम् अथ श्राद्धस्वरूपं तत्रापस्तम्बः अथैतन्मनुः श्राद्धश
ब्दं कर्म प्रोवाच प्रजानिःश्रेयस तत्र पितरो देवता ब्राह्मणास्त्वाहवनीयार्थे मासि मासि कार्यं अपरप १५९

अपक्वभोजनानंतरममृतापिधानमसीति अनग्निकरणार्थं या आपोग्रहं तेनाः मधुपर्कादि ह्युच्छिष्टलं मंत्रो
च्चारणविषयं बृहस्पतिः याहोम्शुची ब्राह्मणानामजाश्वस्य मुखं शुचिः गवां पृष्ठानि मध्यानि सर्वगात्रा
णियोषितां उपहृतिबहिर्ब्राह्मणपदस्पृष्टं वस्तु शुद्धमित्यर्थः एवंच ब्राह्मणव्यतिरिक्तचरणस्पर्शो दोषा
वहस्तुक्तं अदृष्टास्सततधारावातोद्धूताश्च रेणवः स्त्रियो वृद्धाश्च बालाश्च न दुष्यंति कदाचन षड्विंशन्म
ते तांबूले च फले चैव भुक्तस्नेहावशिष्टके दंतलग्नस्य संस्पर्शो नोच्छिष्टस्तु भवेन्नरः दंतलग्नेत्तु विशेषो
भोजनप्रकरणाभिहितः त्वग्भिः पत्रैर्मूलफलैः पुष्पैस्तृणैः काष्ठमयैस्तथा सुगंधिभिस्तथा द्रव्यैर्नोच्छिष्ट
स्तु भवेन्नरः याज्ञवल्क्यः मुखजा विप्रुषो मेध्यास्तथाचमनबिन्दवः श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा
ततः शुचिः मुखजा विप्रुषः श्लेष्मबिंदवो मुखान्निर्गता आचमनप्रापका नभवंति अत्र विशेषमाह॥
गौतमः न मुख्या विप्रुष उच्छिष्टं कुर्वंति न चेदंगे निपतंतीति बृहस्पतिः शालेक्षुयंत्राकरकारुहस्ता गोदोहनी
यंत्रविनिस्सृतानि बालैश्च स्त्रीभिरनुष्ठितानि प्रत्यक्षदृष्टानि शुचीनि तानि यंत्रविनिस्सृतानीक्षु
साहीनि बालैः स्त्रीभिश्चकृतानि रथ्याप्रसर्पणादिभिर्निमित्तैर्यं चाचमनप्राप्तिरस्ति तत्राचमनमकृत्वा
यान्यन्यवस्तुस्पर्शपाकादीनि कृतानि प्रत्यक्षतो दृष्टान्यपि शुद्धानि स्वल्पोपहतिस्तु तैः कालस्तथा स्त्री

म·पा·
१५०

यानिखिद्भ्यतिरिक्ता रत्नोनिषिद्धेतरं त्रीणि देवाः पवित्राणिब्राह्मणानामकल्पयत् अदृष्टमद्भिर्निर्णिक्तं
यच्चवाचाप्रशस्यते एतस्योपघातसन्देहेनेयं शंकः नारीणांचैवतत्यानाशक्तानांस्तनांमुखे रत्नौप्र
स्रवणेवृद्धेमृगयायांसदाशुचिः यमः मुखतोगौरमेध्यात्तमेध्योजोमुखतस्तथा पृष्ठतोगौरजःस्कंधेस
र्वतोश्वःशुचिस्तथा अदृष्टंकांचनेगावःस्त्रीमुखंजनपंत्वरम् नदूषयंतिविद्वांसोयज्ञेषुचमसंतथा कां
स्यनस्यालंकरणीभूतस्यस्वेदादिदोषाभावप्रतिपादनपरंउच्छिष्टाशुचपहतस्पर्शाभिधानात् आकराःशु
चयः सर्वेशकुनिःफलपातने श्वामृगग्रहणेमेध्यःस्त्रीमुखेषुचवारुणी आकराःस्वाकरेतराः आक
राःशुचयःसर्वेवर्जयित्वासुराकरमितिपैठीनसिस्मरणात् ब्राह्मणाभार्यायाश्चापिमूढायाःपीतमद्याया
बुद्धिपूर्वकंगंधरसास्वादनवर्जंमुखंरतिसंसर्गेशुद्धमेवेत्यर्थः दधिसर्पिःपयःक्षौद्रभाण्डदोषोनविद्यते मा
रुतश्चैवदर्वीचमार्जारश्चसदाशुचिः मार्जारस्यस्पर्शेशुद्धमेवेत्यर्थः दधिसर्पिषिश्चाचितंकर्मकालाद
न्यत्रतत्स्नानविधानात् अत्रिः मधुपर्केचसोमेचअप्सुप्राणाहुतीषुच नोच्छिष्टस्यभवेद्दोषस्त्वत्रेश्चवचनंयथा १५०

मामनंति स्पर्शे सचैलं स्नानमेव स्यादिति अयमर्थः स्त्रीयशय्याभ्यलाभे शुद्धेन कम्बलादिना अंतरवकीर्यशय्या
दिकं मंतर्थायोपयोक्तव्यम् यतः पतितादेः शय्यादिस्पर्शे सचैलस्नानं विधीयत इति एतच्च बलात्पतितादिशय्या
यादिस्वीकारमात्रमौवेदितव्यम् रजकादिस्पृष्टिः अथ शुद्ध्यपवादः तत्र मनुः नित्यं शुद्धः कारुहस्तो यश्च प
ण्यं प्रसारितं ब्रह्मचारिगतं भैक्षं नित्यं मेध्यमिति स्थितिः ब्रह्मचारीति विहितभिक्षाहर्तॄणामुपलक्षणा
र्थः भिक्षाहर्तृमात्राधिकारिणामाह मनुः सांतानिकं यक्ष्यमाणमध्वगं सर्ववेदसम् गुर्वर्थं पितृमात्रर्थं स्व
ध्यायार्थ्युपतापिनः नवैतान्स्नातकान्विद्याद्ब्राह्मणान्धर्मभिक्षुकान् संतानप्रयोजनः सांतानिकः अर
त्नसर्वस्वस्सार्ववेदाः रोगोपतापी यावता च प्रसर्पणादिरूपेणौवोपघातेन विनाभैक्षं न सिध्यति तन्मात्रो
पवादो द्रष्टव्यः तथाश्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत् क्रव्याद्भिश्च हतस्यान्यैश्चंडालाद्यैश्च दस्युभि
र्व्याधचौरादयः दस्यवो लुब्धकाः मक्षिका विप्रुषश्छाया गौरश्वः सूर्यरश्मयः रजो भूर्वायुरग्निश्च स्प
र्शे मेध्यानि निर्दिशेत् मक्षिकाग्रहणमनिवर्तनीयस्पर्शादीनामुपलक्षणार्थं विप्रुषः अविज्ञाताकाराः छा

म॰प्रा॰ तेषु विशोधनं आपस्तम्बः उपानः श्लेष्मविण्मूत्रं स्त्रीरजो मद्यमेव च एभिर्विदूषिते कूपे उद्धृत्यानां षष्टिमुद्धरे
१५८ त् विष्णुः जलाशयेषु चाल्पेषु स्थावरेषु महीतले कूपवत्कथिता शुद्धिर्महत्सु च न दूषणं स्थावरेषु प्रवा
हवत्सितेषु शातातपः अन्त्यैरपि कृते कूपे सेतौ वाप्यादिके तथा तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते
यमः चण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम् गोमूत्रयावकाहारस्त्रिरात्रेणैव शुध्यति तथा नदीवे
गेन शुध्यति देवलः भूमीनां रंजनात् शुद्धिः भूमिस्थचर्मकोशाः रंजनेकषायद्रव्येण शोधनं यमः प्रपास्व
रण्ये घटं यन्त्रकूपे द्रोण्यां जले कोशाग्रगतास्तथापः ऋतेप्यस्पृश्यान्न दूषयेयमाङ्गिरापङ्क्तिं कां दृष्ट्वा न वा पिबेत तत्
अयमर्थः यद्यपि शूद्रव्यतिरिक्तब्राह्मणादिवर्णासंबंधिप्रपादि तथापि तद्गतं जलं धर्मार्थं यमानमनापदि
न पेयं आपदि तु पेयं पिबेद्रण्यगतं प्रपादि द्रोणीश्वरमादिमयी जलपात्री सर्वसाधारणी कोशो दृतिः अ
नाना वेमाहिषाश्च ब्राह्मण्यश्च प्रसूतिका दशरात्रेण शुध्यन्ति भूमिस्थं च नवोदकम् आसनं शयनं वस्त्रं जाया
पत्यं कमण्डलुः शुचीन्यात्मन एतानि परेषामशुचीनि च हारीतः स्नानुपनीतोपस्पृश्यं तर्पयमाण्यामनादिस १४८

(७०)

बृहस्पतिः भूमिष्ठमुदकं मेध्यं वैतृष्ण्यं यत्र गोर्भवेत् अव्याप्तं चेदमध्येन तद्वद्देवशिलागतं अपि गंधरसोपेतं विमलाः
ष्टष्ठिर्दीगताः अत्नीणाश्चैव गोपानादापः शुद्धिकराः स्मृताः उद्धृतावामशास्ताः स्युः शुद्धैः पात्रैर्यथाविधि प
केराघोषितास्तास्तत्तजेदापः समुद्धृताः . नारइति सर्वनाम्ना गोत्ताम्निमात्रपर्यास्ता अल्पा एवापः परामृश्यन्ते अ
तो व हृदकात्तटाकादेरुद्धृतानां राजघोषितानां न दोषः तटाकादेरुद्धृतास्वपि आपो राजावघोषितोदकां तादेव
अशुद्धा एव अत्तोभ्यासितटाकानि नदीवापीसरांसि च चंडालाद्यशुचिस्पर्शे तीर्थतः परिवर्जयेत् तीर्थमशु
द्धकावनत्तरणामार्गः बृहस्पतिः मृतपंचनखात्कूपादत्यन्तोपहतात्तथा अपः समुद्धरेत्सर्वाः शेषं वस्त्रेण शोध
येत् वह्निप्रज्वालनं कृत्वा कूपे पक्वेष्टकाचिते पंचगव्यं न्यसेत्पश्चान्नवतोयसमुद्भवे हारीतः वापीकूपतटा
केषु मानुषं शीर्यते यदि अस्थिचर्मविनिर्मुक्तो दूषितं च खरादिभिः उद्धृत्य तज्जलं सर्वं शोधनं परिमार्जनं
अस्थिचर्मादिनिर्मुक्ते ष्विरकालवसनेन विशीर्णे वित्यर्थः देवलः उद्धरेदुदकं सर्वं पंचपिंडान्समुद्धरेत्तथा अचिर
काले पद्याते स्वल्ये पद्याते पि हारीतः घटानांशतमुद्धृत्य पंचगव्यं क्षिपेत्ततः श्वभिः श्वपाकचाण्डालैर्दूषि

म॰पा॰ त्रिदिनेमार्जनमनुलेपनमाप्यर्थंमार्जनमनुलेपनमाप्यर्थं मार्जनमनुलेपंचसर्वत्रसमुच्चीयते यमः खननात्स्मरणाद्दाहा
१५८ दद्भिर्वर्षणाल्लेपनात् गोभिराक्रमणात्कालाद्भूमिःशुद्ध्यतिसप्तभिः एतैश्चपूर्वोक्तैर्हेतुभिः पुनःपुनर्दुष्टभूवि
षयेसमस्तशुद्धिहेतवः अन्यत्रव्यस्तंयथायोग्यंतथा गोचर्ममात्रशुद्धिंदर्गोः शोधयतिपातितः सम्मूढमसम्मू
ढंवायज्ञलेपैर्निर्दिश्यते यत्रैकादशगावउपविशंतितावान्भूभागोगोचर्म गोःपृथिव्याःसम्मूढंकृतसमार्जनं अ
ष्टवागोपुच्छसंवेपवात् भुविपातितउदकविंदुर्गोचर्ममात्रंशोधयति गोपुच्छस्पर्शायित्वात्तेनोदकेनसेकेकृते
एकैकबिंदुनैतावतीभूःशुद्धाभवतीत्यर्थः संवर्तः गृहशुद्धिंप्रवक्ष्यामिअंतस्थशवदूषणात् प्रोत्सृज्यमृन्मयं
भांडंसिद्धमन्नंतथैवच गृहादपास्यतत्सर्वंगोमयेनोपलेपयेत् गोमयेनोपलिप्याथछागेनाघ्रापयेद्बुधः
ब्राह्मणैर्मंत्रपूतैश्चहिरण्यकुशवारिणा सर्वंगभ्युक्षयेद्वेश्मततःशुध्येदसंशयम् बौधायनः घनायाभूमेरु
पघातउपलेपनमसुषिरायाःकर्षणंक्लिन्नायामेध्यमाहृत्यप्रच्छादनम्ऊर्ध्वंशावोपघातेभिन्नितस्तांगोसूर्यरश्मिप्र
वेशोग्निज्वालाभिमर्षणंवा क्लिन्नाकृमिकीटाद्याक्रांतानामाच्छादयेत् मृदंमेध्यामाहृत्येत्यर्थः आसन्न १५८

तथा देवलः यत्र प्रसूयते नारी म्रियते दह्यतेऽथवा चंडालाध्युषितं यत्र यत्र मूत्रादिसंगतिः एवं कश्मलभूयि
ष्ठा भूरमेध्या प्रकीर्तिता श्वसूकरखरोष्ट्राद्यैर्मलिना भवेत् एवंविधायापि भूमौ द्विप्रकारमाह स एव पंचधा।
वा चतुर्धा वा भूमिर्मेध्या विशुध्यति यत्र मनुष्यदाहो यत्र चंडालैरध्युषितं एवममेध्या भूः पंचधा निर्दहन
गंधार्द्रतापनयनखननमकालविक्रमणासेकोल्लेखनैः शुध्यति यत्र मनुष्या जायंते म्रियंते विष्ठादिसंगतिः।
वीतस्य दहनं विना सर्वैर्जलैः पंचभिरेव शुद्धिः उष्ट्रादिना त्रिधा द्विधा शुद्धं तेमलिनैः यथा श्वसूकराद्यैः
शुनकैर्मिलित्वा वा चिरकालमधिवासिताया उष्ट्राया त्रवास्त्रिभिर्गोक्रमणासेकोल्लेखनैः उष्ट्रग्रामकुक्कु
टादिभिश्चिरकालमधिवासितायामलिनाया भुवः उल्लेखनेनैकेन शुद्धिः अत एव याज्ञवल्क्यः भूशुद्धि
र्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा सेकादुल्लेखनाल्लेपाद्गृहं मार्जनलेपनात् मार्जनं संमार्जन्या
तृणादीनामपसारणं दाहस्तृणकाष्ठाद्यैः कालः गंधलेपादिक्षयो यावता भवति सेको वर्षणेनद्भि
र्गोमूत्रपयोदकैर्वा उल्लेखनं खननं तक्षणं वा लेपनं गोमयादिभिः अत्र भूग्रहणेनैव सिद्धे पुनर्गृहग्रहणं प्र

म॰पा॰ पायसंक्षीरंतथैव॰ व्रतसोयउः मृद्भाण्डस्थितंतक्रंतथामधुनदुष्यति यमः आममांसंघृतंक्षौद्रंस्नेहाश्चफ
१४७ लसंभवाः म्लेच्छभाण्डस्थिताद्दुष्यन्निष्क्रांताश्शुचयः स्मृताः एतच्चाकस्मभाण्डविषयंस्वनाकरेपिद्रोणाधि
कापपसेवनसमर्थघृतादिविषयमपि ततोन्यूनस्यदेशकालाद्यपेक्षयाप्लवनादिनाशुचिर्भवति यदा
हबौधायनः देशंकालंतथात्मानंद्रव्यंद्रव्यप्रयोजनम् उपपत्तिमवस्थांचज्ञात्वाशौचंप्रकल्पयेदिति एवं
मातपः गोकुलेकुण्डशालायांतैलचक्रेक्षुयंत्रयोः अमीमांस्यानिशौचानिस्त्रीषुबालातुरेषुच कुण्डशा
लायज्ञशाला शंखः निर्यासानांगुडानांचलवणानांतथैवच कुसुम्भकुङ्कुमानांचऊर्णाकार्पासयोस्तथा
वा॰४ प्रोक्षणात्कथिताशुद्धिरित्याहभगवान्यमः निर्यासादिग्रहणंतयः स्वल्पपरिमाणविषयं बहूनांबौ
धायनोक्तं बहूनांकुसुम्भकार्पासगुडलवणानांसर्पिषांकठिनीभूतानांचंडालादिस्पर्शेप्रोक्षणेनैव
शुद्धिः स्वल्पत्वेपरित्यागः तत्रापिदेशकालाद्यपेक्षयापरित्यागः उच्छिष्टेनतुसंस्पृष्टे द्रव्यहस्तः
कथंचन अनिधायैवतद्द्रव्यमाचांतश्शुचितामियात् इतिसिद्धंतुशुद्धिः अथभूम्यादेः त्रिधाचशोध्याभूः १४७

हुतशेषान्नमात्रं यत्तु लालस्पृष्टं भवेत् होमोदकेनाभ्युक्ष्येदाज्यतेनोद्धुनाथवा अग्निज्वालोपर्शसंस्पर्शात्तु वर्णा
मधुसर्पिषा विप्राणां ब्रह्मघोषेण तुतं भोज्यं च तत् भवेत् द्रोणः षट्पंचाशाद्धिकं पलशतद्वयम् यस्य
जन्मदंतिनो तेऽन्नमेकाह्निकं पक्वं स्वकाकाद्युपघातितम् केशकीटावपन्नं च तद्रूपेवं विष्णुद्धाति की
तस्याविविधाधिर्ष्टुरुषएवमनीषिभिरिति तल्पशयनविषयं वशिष्ठः देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु
च काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विवर्जयेत् तन्मात्रमन्नमुद्धृत्य शेषं संस्कारमर्हति देवद्रोणी देवयात्रा
पृतक्रुद्धहणं वहून्नकार्यप्रदर्शनार्थं प्रकृतेषु प्रस्तुतेषु वश्यंभाविसर्वोत्सवेषु संस्कारमपि स एवाह द्र
वाणां प्लावनेनैव घनानां प्रोक्षणेन च चक्षुरागो यस्तु स्वसंस्पृष्टमन्नं तच्छुचितामियात् घनाः पर्पटकाद
४६।२ यः द्रवाणां प्लावं जलेनैवैतेषां शुद्धिर्वीर ... यदाह शंखः द्रवाणां घृततैलानां प्लावनं गोरसस्य च
भाण्डात्प्लावयेद् निम्बाकमूलफलानि च अपाणासम्भवे सजातीयद्रव्यप्लावनेनवाशुद्धिः तथा
घृतदधिपयस्तक्राणामाकरभाण्डस्थितानामदोषः तथा आधारदोषे तु नयेत्पात्रात्पात्रान्तरं द्रवं घृतं च

म॰पा॰ यायनः असंस्कृतायांभूमौन्यस्तानांतृणानांप्रक्षालनंपरोक्षाहृतानामभ्युक्षणंएवंद्रव्यसमिधाम् असंस्कृ
१८६ तायांमयाद्युपहतायां भैक्षप्रभृतौद्वार्याणांद्रव्यसमिधांयज्ञियत्वेनप्रसिद्धफलादीनानितिनपामार्गादि
समिधांविस्तरः मतार्णांतृणकाष्ठानांपवमिष्टाण्डालवायसैः स्पर्शनेविहितंशौचंसोमसूर्यांशुमारुतैः
तथापोत्ताणेनमस्तकमितिच व्यासः रथ्याकर्दमतोयानिनावःपथितृणानिच मारुतेनैवशुद्ध्यन्ति ।
पक्वेष्टकाचितानिच इतिधान्यादिशौचम् अथसिद्धान्नादेः तत्रमनुः पक्षिजग्धंगवाघ्रातमवधूतम
वक्षुतम् दूषितंकेशकीटैश्चमृत्प्रक्षेपेणशुद्ध्यति भक्ष्यपक्षिजग्धविषयमेतत् यस्यपरिवासोवह्नि
तपक्षिभिरुच्छिष्टोच्छिष्टपतत्रैर्वाश्ववदुत्तंयस्योपरिक्षुतंमज्जनृणांमुद्रकभस्मनोरपिमदर्शनार्थं तथा
चयाज्ञवल्क्यः सलिलंभस्ममृद्वापिप्रक्षेप्तव्यंविशुद्धये इति यच्चपाकानन्तरंकेशकीटाद्यैर्दूषितंस्या दिभि३
त्तस्यापिमृदादिप्रक्षेपेणशुद्धिः यच्चकेशकीटाद्यैस्सहपक्वंतत्तत्त्यागित्याज्यमेव अनेनैवाभिप्रायेण
गौतमः नित्यमभोज्यंकेशकीटावपन्नमिति पराशरः पक्वंद्रोणाधिकंन्ननैकाकष्याद्युपहतातिं ग्रासमात्र १८६

ष्ठिकरणमन्याभिमर्शनं अवगाहनं प्रक्षालनं अत्रमोक्षणादीनि सर्वाणि सर्वं च दोषाल्पत्वमहत्वापेक्षया
योज्यानि नयथासंखं ब्रीह्यादितंडुलानां फलीकृतानां विमर्शनेन प्रोक्षणेन च शुद्धिः विमर्शनमल्पानां
बहूनां प्रोक्षणं खंडनेन शुक्लीकृतानि रक्तत्वदर्शनाद्यत्र तंडुलाः फलीकृताइत्युच्यंते विमर्शनं पाणिभ्यां
निर्मलीकरणं श्यामीधान्यानां कोशीधान्यानां मुद्गादीनामनेकपुरुषोद्धार्याणां निघर्षणं विमर्दनं ततोल्पा
नां दलनेन अनेकपुरुषोद्धार्याणां प्रोक्षणेन यत्र तंडुलांस्तु परित्यज्योदितितद्दत्तंताल्पपरिमाणविष
यं आदिपुराणे गृहदाहे समुत्पन्ने दग्धे च पशुमात्रके अभोज्यमन्नं ततो ब्रीहिधान्यद्रव्यस्य संग्रहः मृण्मये
नाववद्धानामयोनुविचातिष्ठताम् यवमाषतिलादीनां सदोषं मनुरब्रवीत् ततः संक्रमणे गनौस्थान
स्थाने च दह्यते नच प्राणिवधो यत्र केवलं गृहदीपनम् तद्द्रव्याणि सर्वाणि गृह्णीयादविचारयन्
पत्रपुष्पफलानां विष्किरावधूतानां प्रक्षालनमभ्युक्षणमित्येके पर्णानामद्भिः प्रक्षालनं सकृदपयु
क्तानामुत्सर्गः विष्किरणामजाकृतादयः अवधूतं पादावकीर्णं विष्किरावधूतानामिति सर्वत्रान्वेति बो

म·पा·
१८५

नामेस्पृष्टे पुनःप्रक्षाल्यपादौचाचम्यप्रयतोभवति वस्त्रसंहितस्यैवनाभेरूर्ध्वस्पर्शी अवगाहः अथस्नानोत्प्रक्षा
लनमितिविवेकः प्रचेताः चैलानामुपहतानामुत्स्वेदनंगंधलेपापनयनं तन्मात्रच्छेदनंवानवानांवासमाम
मुक्षणादिति उत्स्वेदनंक्षालनं नवानांयंत्राणामुत्तीर्णानां शंखलिखितौ अहतानांप्रोक्षणमिति अह
तंयंत्रनिर्मुक्तं शंखः शयनासनयानानांसंहतवत्शौचे संहतवद्राशीभूतद्रव्यवत् अनेनप्रोक्षणात् शुद्धि
रित्युक्तंभवति अंगिरास्तुशयनादीनामपिसंहतवाच्यमाह शयनासनयानानिरोमबंधानियानिच वस्त्रा
णितानिसर्वाणिसंहतानिप्रचक्षते इतिवस्त्रविधिः अथधान्यादेः तत्रबौधायनः ब्रीहयः प्रोक्षणादद्भिः
शाकमूलफलानिच तन्मात्रस्यापहारादानिस्तुषीकरणेनवा विष्णुः नासिद्धस्यान्नस्ययन्मात्रमुपहतं
तेतन्मात्रमुत्सृज्यशेषस्यखण्डनप्रक्षालनेकुर्यात् अल्पद्रव्यविषयमेतत् बहूनांतुकश्यपोक्तंद्रष्टव्यं प्रो
क्षणपर्यग्निकरणाहनैर्ब्रीहियवगोधूमानांविसर्गप्रोक्षणैः फलीकृतानांनिर्वर्षणदलनप्रोक्षणैः शामी
धान्यानामिति अस्यार्थः अनेकपुरुषोद्धृतानांब्रीहिगोधूमानांप्रोक्षणपर्यग्निकरणावगाहनैः शुद्धिः पर्य ५४५

वशा२

६६

तिऊषरंस्तद्विशेषः तत्सहितेनोदकेन गोमूत्रेण वाविकं कौशिकं स्याति ऊर्णामयमाविकं कोशप्रभवं तसरीपट्टा
मे २ दि कौशिकं वल्कलतंतुकृतं तस्य पटम् श्रीफलं बिल्वं पर्वतच्छागलोमकृतः कुतपः अरिष्टफलं केनकं अतसी
सूत्रनिर्मितं क्षौमं एतत्प्रायिकोपयाने प्यन्योपयाते प्रोक्षणमेव द्रव्याविनाशेनैव शुद्धेर्दिष्टत्वात् तेषां क्षालना
सहत्वाच्च अतएव देवलः और्णकौशेयकुतपपट्टक्षौमदुकूलजाः अल्पशौचा भवंत्येते शोषणप्रोक्षणादि
भिः तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः तूलिकामुपधानं च पुष्परक्ताम्बरं तथा शोषयित्वात
तः किंचित्करैः संमार्जयेन्मुहुः पश्चात्तु वारिणा प्रोक्ष्य विनियुंजीत कर्मणि तान्यप्यतिमलिष्ठानि यथाव
त्परिशोधयेदिति तूलिकोपधाने चोर्णादिमये ऊर्णादिनिर्मितानामेव प्रक्षालनेन सर्वद्रव्यनाशात् पुष्परक्त
ग्रहणं प्रक्षालनेन सर्वद्रव्यनाशात् पुष्परक्तग्रहणं प्रक्षालनासहहारिद्रादिरक्तस्यापि प्रदर्शनार्थम् एत
दुक्तं भवति यत्कुसुम्भादिना रक्तं क्षालनापहृतरागरूपशोषणादिना शुद्ध्येत् यच्च मांजिष्ठादिकं क्षालनेनावि
नष्टपतितत्प्रक्षालनेनैव नान्यरूपशोषणमात्रेण आपस्तम्बः श्वनोपहतं चैलमवगाहेत प्रक्षाल्य वाग्नादिशमयि

मा न्मात्रमेवच शृगालश्वानगर्दभादिविकारो वैदलं स्पृष्टादि यच्छूर्पादि दारुवस्त्रधान्यवासः प्रभृतीनि राशीकृतानि
पा॰ चण्डालादिभिः स्पृष्टानि तत्रापि स्पृष्टान्यल्पानि अस्पृष्टानि च स्पृष्टापेक्षयाधिकानि तत्र स्पृष्टमुद्धृत्य त
१६ स्योक्तप्रक्षालनादिभिः शुद्धिः कार्या अवशिष्टस्य प्रोक्षणाच्छुद्धिः अनेनैवाभिप्रायेण याज्ञवल्क्यः प्रोक्ष
णं संहतानां च बहूनां धान्यवाससाम् तथा सत्यन्तरमपि वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे ताव
त्य५ न्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति शेषस्य प्रोक्षणविधानादुद्धृतस्य प्रोक्षणादिभिः शुद्धिरिति गम्यते य
दा तु बहूनि राशीकृतानि सर्वाण्यपि स्पृष्टानि तदा प्रोक्षणादेव शुद्धिः यदा पुनः स्पृष्टानि बहूनि अ
ल्पानि त्वस्पृष्टानि तदा सर्वेषामपि प्रक्षालनमेव यदाह मनुः अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवास
साम् प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते राशिगतत्वपुरुषत्वयाश्रयाभावात् हूर्ध्वं वेदितव्यं अनेको
द्धार्यं दारुशिलाभूमिसमेऽपि बौधायनेन नैकोद्धार्यस्यैव द्रव्यान्तरस्यास्य शौचं न दर्शनात् याज्ञवल्क्यः
सोषरोदकगोमूत्रैः शुध्यत्याविककौशिकं सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथा सगौरसर्षपैः क्षौममि १४४

नपायेनहस्तानांलेपयुक्तावयवापनयनेनशुद्धिः फलशंखुवांनारिकेरादिफलसंभूतानांप्रक्षालनेनानप
मृद्वलेपानांगोवालैर्घर्षणेनशुद्धिः यज्ञपात्राणांस्रुवादीनांप्रक्षालनादिभिः कृतशौचानांदर्भैर्दशाप
विशेषेणवाकर्मांगत्वसिद्ध्यर्थंहस्तेनमार्जनंकार्यंततोयज्ञकर्माणिविनियोजनीयइत्यर्थः हारीतशाता
तपौसंहृतानांतुपात्राणांयद्येकमुपहन्यते तस्यैवशोधनंप्रोक्तंनतुतत्स्पृष्टिनामपि शंखः मलसंयो
गजंतज्ज्ञंयस्ययेनोपहन्यते तस्यतत्शोधनंप्रोक्तंसामान्यंद्रव्यशुद्धिकृत् यस्यशोध्यस्यद्रव्यस्योच्छिष्टसं
योगजंतज्ज्ञंस्वभावजंवामलंयेनभस्मादिनोदकसहितेनोपहन्यतेतस्यतच्छोधकंभवतीत्यर्थः इतितैज
सादिपात्रादिशौचं अथवस्त्रादेः तत्रयमः यदिमूत्रपुरीषाभ्यांरेतसारुधिरेणवा चैलंसमुपहन्येतप्र
क्षिः प्रक्षालयेत्तुतम् यदम्भसानशुद्धेतुवस्त्रंचोपहतंदृढं छेदनंतस्यदातव्योवायन्मात्रमुपहन्यते प
तच्छेदादिनाशुद्ध्यापादनमतंतामाप्योत्तमवस्त्रविषयंछिन्नदशयोरपिपरित्यागविधानात् दरिद्रस्य
तवतत्तमेवपाणिच्छेदादिनाशुद्धिः व्यासः वस्त्रंमृदम्भसाशुद्ध्येद्द्रव्यैर्दलमेवच रज्ज्वादिकंचापिदृष्टंपाजेन

म.षा.
१५३

तिकेवलेनजलेनतत् मूत्रोच्छिष्टानिशोध्यानित्रिधातानांल्लवारिभिः अत्रद्ध्यात्रित्वात्रिधात्रिप्रकारमार्जनंशा
न्तितयेनदशाहमासोमार्जनविधान् गवाघ्रातेषुकांस्येषुमूत्रोच्छिष्टेषुवापुनः दशाभिर्भस्माभिःशुद्धिःमृत्का॰
कोपहतेषुच एतत्त्रिभस्माभिःशोधनं मृत्काकायुपहतौभूमौसप्तरात्रखननान्तरं तथा सूतिकासविएामूत्र
रजस्वलाहतानिच प्रक्षेप्यानितानग्नौयथयावत्सहेदपि यद्भवंयावदग्निप्रक्षेपंसहतेयावदग्निप्रक्षे
पेणानश्यतितावदित्यर्थः बौधायनः तैजसानांमूत्राद्युपघातेपुनःकरणंगोमूत्रेवासप्तरात्रेप॰ नि
वासनं लेपनिर्हरणाशक्तौपुनःकारणं अन्यथागोमूत्रेवासइतिव्यवस्था अंगिराः गंडूषंपादशौचंच
यःकुर्यात्कांस्यभाजने षण्मासंभुविनिक्षिप्यपुनराकरमादिशेत् पुनराकरंपुनःकरणं लोहानां
दहनाच्छुद्धिर्भस्मनामोमयेनवा दहनालेखनाद्वापिशैलानामम्भसापिवा काष्ठानांतक्षणाच्छुद्धि
र्मृण्मयजलेनापि याज्ञवल्क्यः तक्षणंदारुशृंगानांगोवालैःफलसंभुवां मार्जनंयज्ञपात्राणांगोवा
लैःफलसंभुवां मार्जनंयज्ञपात्राणांपाणिनायज्ञकर्मणि उच्छिष्टस्नेहादिलिप्तानामतेषांमृद्गरकैर्लेपा १५३

सानामल्पकालोपहतानेयवचूर्णादिभिर्मार्जनंशुद्धिहेतुः कांस्यस्यतयान श्वपितृतापनंमार्जनंचशुद्धापा
दकमित्यर्थः प्रतिमार्जनमुदकप्रक्षालनमावर्त्तते द्विजातिभुक्तोच्छिष्टसंस्पर्शेतुसएव वृहस्पतिस्त्रविशेषांचै
दशहत्तंमार्जनाच्छुचिः चतुर्थेनतुयज्ञेचतुर्भिस्तुप्रमार्जनं अग्नौप्रक्षिप्यशटहस्तीयाद्दस्तौप्रक्षाल्य
यत्नतः गोघ्रेणेणतुसंस्पृष्टंतत्पात्रंशुचितामियात् आपस्तम्बः गवाघ्रातानिकांस्यानिशूद्रोच्छिष्टानि
यानिच मणिमुक्ताप्रवालानिशुद्धिःप्रक्षालनेनतु एतदल्पोपहतविषयं मृण्मयानामल्पोपहतौ
याज्ञवल्क्यः पुनः पाकान्महीमयामिति मयायुपहतौपरित्यागएव तथाचमनुः मद्यैर्मूत्रपुरी
प्र षैर्वाष्टीवनैःपूयशोणितैःसंस्पृष्टंनैवशुध्येतपुनःपाकेनमृण्मयमिति स्मरणंतत्रभस्मनाशुध्यतेकांस्यं
त्वयायत्रालिप्यते सुरामूत्रपुरीषैस्तुशुध्यतेतापलेखनैः सुरादिग्रहणं शुक्रशोणितादीनामप्युप
लक्षणार्थं तथाताम्रमेमन्लेनशुध्येत्तनचेदामिषलपनं आमिषेणातुयद्लिप्तंपुनर्दाहेनशुध्यति आदिपु
राणे सुवर्णरूप्यशंखवाश्मशुक्तिरत्नमयानिच कांस्यायस्ताम्ररैत्यानित्रपुसीसमयानिच निर्लेपानिचशुद्ध्यं

म॰ धा॰ न सहितेन शुद्धिरित्यर्थः बौधायनः तैजसानां मूत्रपुरीषशुक्रासृक्कुणपमद्यैरत्यंतवासितानामावर्तनं अ
१५२ ल्पसंसर्गेतु परिलेखनं स्पर्शमात्रोपघाते तु सप्तकृत्वो भस्मना परिमार्जनं अतैजसानामेवंभूतानामुत्सर्गः
अग्निसंयोगेन द्रवीकरणमावर्त्तनं भस्मना परिमार्जनं कांस्ये नियतं यच्च याज्ञवल्क्येन सौवर्णराजताब्जा
नामित्युपक्रम्य वारिणा शुद्धिरिष्यत इति केवलोदकमेवोपात्तं तदपि मृदादिसहितमेव वारि शुद्धिहेतुरिति
ज्ञेयं अत्र विशेषमाह हारीतः अकांचनरजतशंखशुक्तीनां तृणवर्जनस्नेहवैवर्ण्योपहतानां यवगो
धूमकलायमाषमसूरमुद्गगोमयचूर्णैः ‥ ‥ अम्ललवणाभ्यां ताम्राणां भस्मना कांस्यानां शाणतैल
सिकताघर्षणैः कार्ष्णायसानां शिलावद्घर्षणमार्जनैर्मणिमयानामिति शाणं लोहतदसाधनं तत्तृण
वर्जनं तत्तृणं याच्ञकर्षणं स्नेहवैवर्ण्योपहता उच्छिष्टादिस्नेहेन विवर्णा यया भवति तयोपहता इत्यर्थः यवा
दिचूर्णानामेकार्थत्वाद्विकल्पः उदकस्य तु सर्वत्र शोधनद्रव्यैः सह समुच्चयः एवं च सूतिकोच्छिष्टभा
ण्डस्य ब्राह्मणगृहेतस्य च त्रिः सप्तमार्जनाच्छुद्धिर्न तु कांस्यस्य तापनं सूतिकोच्छिष्टादिभिः कांस्यव्यतिरिक्ततैज १४२

१५३

वस्त्रैहपात्राणि उष्णेनवारिणा चरुः स्रुग्वेयाचमसस्थाली स्रुक् जुह्वादि स्रुवः प्रसिद्धः सस्नेहपात्राणिप्राशि
त्रहूवोलूखलादीनिलेपसहितानिचंर्वादीनिवारिणोष्णेनशुद्ध्यन्ति सौवर्णादीनांलेपरहितानामेवपूर्वोक्ताशुद्धिः
तथाचमनुः निर्लेपंकांचनंभाण्डमद्भिरेवविशुद्ध्यति अब्जमश्ममयंचैवराजतंचानुपस्कृतं उपस्कृतमु
त्कीर्णरेखाद्युपेतं तदन्यदनुपस्कृतं देवादिरेखानेकशून्यमत्युच्छिष्टाद्यस्थानरहितमित्यर्थः काकस्तुरेख
चितपात्रस्यशुद्धं तस्मात् पाल्वः कांस्यादिकानितुरेखावच्छेदनिर्लिखेः स्थापदस्तुरेखावमृष्टंपात्रंनशुध्यतीति निर्ले
खनंधारैर्नरुपरितनावयवापकर्षणम् तक्षणमितियावत् यत्नापमलस्त्रेनोक्तं गवाघ्रातानिकांस्यानिशूद्रो
च्छिष्टानियानिच शुद्ध्यन्तिदशभिःक्षारैःश्वकाकोपहतानिच एतत्स्वल्पोपहतविषयं अत्रचक्षाराणांभ
स्म एवंसर्वत्रन्यूनाधिकशौचकल्पनान्यूनाधिकोपहतिविषयत्वेनव्यवस्थापनीयाः उष्णेनवारिणाशुद्ध्य
तीत्यनुवृत्तौ याज्ञवल्क्यः स्फ्यशूर्पाजिनधान्यानांमुसलोलूखलानसां स्फ्याकाष्ठकोद्धरिकायज्ञाणाम्
अनःशकटं अत्रतुनराजिनग्रहणंयज्ञाङ्गाजिनप्राप्त्यर्थम् एतेषामुष्णेनवारिणावक्ष्यमाणानामुदादिपात्राणामे

म॰ पा॰
१५१

लदानजलं तु ॥ इति स्तबकः पंचमस्तासीदामोदाहृष्टपण्डितभ्रमरः मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृ
तिः प्राशीलं प्रायाद्यं जगति सरणावलोकनिपये चिरं चित्तेनैषां मुकुरतलभूते स्थितिमिया दिदृक्षासारण्यप्र
वरमुनिशिष्यस्य भाणिति इति श्रीमदनपालपंडितपारिजातनकटारमल्लोपाधिविरुद्धराजीविराजमानमानसानि
वेयं मदनपारिजाताभिधीये पंचमः स्तबकः अथ दशाहादिरूपकालापगमनेनाशौचस्तबकेऽनुक्तत्वादपि
नीशुद्धिरुक्ता तदनंतरमिह स्तबके द्रव्यशुद्धिरभिधीयते तत्र याज्ञवल्क्यः सौवर्णराजताब्जानामूर्ध्वपा
त्रग्रहाश्मनां शाकरज्जुमूलफलवासोविदलचर्मणां पात्राणां चमसानां च वारिणा शुद्धिरिष्यते अ रिद्द
ब्जं शंखशुक्तिमुक्ताफलादिः ऊर्ध्वपात्रं यज्ञियोलूखलादिः ग्रहाः ऐन्द्रवायवादयः अश्मा दृषदादिः मूल ध्या४
मांसकादिः विदलं वेणुदलादिः विदलग्रहणं तद्विकाराणां छत्रादीनामुपलक्षणार्थं चर्मजादीनां
तद्विकाराणां वस्त्रादीनामुपलक्षणार्थम् पात्राणि प्रोक्षिण्यादीनि स्नेहरहितानि चमसा होतृचमसा
दयः एषां लेपरहितानां स्पृष्टानामुच्छिष्टस्पर्शमात्रे वारिणा शुद्धिः प्रक्षालनात् शुद्धिः तथा च हस्तकस्तु। १५१

१६२

असत्यपैतृमेधिकासंस्कालनियमस्तज्ज्ञातमरणादिनसमसांवत्सरिककालनियमसंपद्धिसेयः सचमासद्मक
र्णोविहस्यते एवंपैतृमेधिकेकृतेयदिजीवन्नागच्छेत्तदातंघृतकुंभेस्थापयित्वाशुभलग्नेऽस्यापाजातक
र्मादिभिश्चूडाकरणांतैःसंस्कृत्यपुनरुपनयनविधानेनोपनीयमातृचनपर्वतेद्वादशाहमथवात्रिरात्रं
वाव्रतंकारयित्वासमावर्तनानंतरंपूर्वास्थितांभार्यांतमावेश्यांवोद्वहेत् ततस्थसोऽग्रयस्पाद्युष्मतेपुरोडा ८४
शमष्टाकपालंकुर्यादितिविहितामाष्टिमायुष्मतींकृत्वायथाधानेकुस्तदाव्रात्यस्तोमेनेष्ट्वातथैन्द्राग्ने
नपशुनाचेष्ट्वाग्न्याग्नीनादध्यात् यदाहवृद्धमनुः जीवन्यदिसमागच्छेद्घृतकुंभेनियोजितं उत्पाट्य
स्थापयित्वातुजातकर्मादिकारयेत् द्वादशाहंव्रतंकुर्यात्त्रिरात्रमथवास्यतु स्नात्वोद्वहेत्तांभार्यामन्यांवात
दभावतः अग्नीनाधायविधिवद्व्रात्यस्तोममेववायजेत् अथैन्द्राग्नेनपशुनागिरिंगत्वाचतत्रतु इष्टिमा
युष्मतींकुर्यादीप्सितांश्चक्रतून्सततइति आहिताग्नेर्यत्रपुरोडाशः स्तोत्रेणाहिताग्नेश्चरुः तथाचाप
प्रायश्चित्तौ एवमाहिताग्नेः पुरोडाशः तएवानाहिताग्नेश्चरवइति इतिमदनपारिजातेमदनाद्वितिपा

म·प्रा·
विमुक्तानाशौचमध्यतइति पितृव्यतिरिक्तसपिंडविषयेणतत्रंतंत्रस्यावश्यकसमाप्तिदर्शनार्थेनपुनःपितृविषयेपि
नियमार्थमिति भवतुवापितृविषयेपिनियामकं तथाप्यस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नतुइत्यनेनन्यायेनशि
ष्टाचाराद्दृष्टतेनापित्रोस्तुयावदशौचमित्यनेनगौतमवचनेनगालववचनेनवाप्यैइति पित्राशौचमध्येदर्शयातेपि त२
यावदशौचंपिंडादिकंदद्यात् इतरेषांतुदर्शावधिकमेवोत्तरतंत्रसमापनमितिविवेकः अथवाद्यत्रसवीजि
पितृविषयंदत्तकादिपुत्राणांप्रतिग्रहीत्रादिमातापितृविषयंदत्तकादिपुत्राणांप्रतिग्रहीत्रादिमातापि
तृविषयंदत्तकादिपुत्राणांप्रतिग्रहीत्रादिमातापितृविषयंगालववचनं गौतमवचनंतुऔरसपुत्रिका
पुत्रमातापितृविषयं अथवाऔरसादीनांसर्वेषामपिसमानत्वपितृविषयेआपदनापत्कल्पाश्रयणेनव्यव
स्थाविज्ञेयं अथदेशांतरगतस्यजीवद्वार्त्तानाकर्णनेनत्रपितृविषयेजातूकर्ण्यः पितरप्रोषितोयस्यन
वार्त्तानैववागतिऊर्ध्वंपंचदशाद्वर्षात्कृत्वातत्प्रतिरूपकंकुर्यात्तस्यचसंस्कारंयथोक्तविधिनाततः पितृव्य
तिरिक्तविषयेबृहस्पतिः यस्यनश्रूयतेवार्त्तायावद्द्वादशवत्सरं कुशपुत्रकदाहेनतस्यस्यादवधारणं ॥ १४०

अग्निप्रभृतिकाष्ठशेषंलब्ध्वाद्यैनैवास्तुत्वादनसमर्थेननिर्मथ्यंकृत्वा अग्निमुत्पाद्यतेनाग्निनादहेत् अरण्य
दिकाष्ठशेषालाभेदग्धशेषकाष्ठसंबंधीयोमथितोग्निस्तेन तस्याप्यभावेप्युपादिपेदित्यर्थः एवमनाहि
ताग्नेरपिन्यायस्यसमानत्वात् अयंतुविशेषः अरण्यभावात्तन्मन्त्राभावइति अथदशाहमध्येदर्शपाते तत्रभवि
ष्यत्पुराणे महत्तराशौचतंत्रस्तुयादिदर्शप्रपद्यते समाप्यचोदकंपिण्डान्स्नानमात्रेसमाचरेत् अशौच समा
प्तिपर्यंतमितिशेषः ऋष्यशृङ्गः अशौचमंतरादर्शोयदिस्यात्सर्ववर्णिनां समाप्तिंप्रेतमंत्रस्यकुर्यादित्याहगौ
तमः पैठीनसिः आद्यादावेवकर्तव्याप्रेतपिंडोदकक्रिया द्विवैन्दवेतुर्वाणाः पुनःश्राद्धंसमश्नुते द्विवै
न्दवेन्दद्वये एकःप्राचीनःक्षीणचन्द्रः अपरोवृद्धिमान् एवंसामान्येनमातापित्रविषयेदर्श पिण्डोद
कदानादितंत्रसमाप्तिप्रसक्तौप्लेषगौतमः अंतर्दशाहेदर्शश्चेत्तत्रसर्वंसमापयेत् पित्रोस्तुयावदाशौ
चंदद्यात्पिण्डंजलांजलीन् पित्रोरितिविशेषः यत्रापित्रोरशौचमध्येयदिदर्शः समापयेत् तावत्तैवोत्तरं
त्रपर्यवसेत् महागुरमितिगालववचनं तस्यन्वयमर्थः पित्राशौचमध्येदर्शपातेसमाप्तिरुत्तरतंत्रस्योचिता

म॰पा॰ नोद्वितीयस्त्र्यहांताछुद्धिरिति अमुमेवाभिप्रायंप्रकटयनद्वितीयस्त्र्यहांतमप्याह गौतमः रात्रिशेषेसति
१२० द्वाभ्यांप्रभातेतिसृभिस्तथा रात्रिमात्रावशेषेणपूर्वाशौचशेषेणशुद्धिः अपितुतद्दिनंतरंद्वाभ्यांरात्रिभ्यां प्र
भातेवाशेयाम्प्रिमयामेजननादिसन्निपातेतिसृभिः शुद्धिर्नपूर्वशेषेणैव शातातपः रात्रिशेषेद्व्यहाच्छुद्धि^ रात्रिभिः ३
शेषशेषेशुचिस्त्र्यहात् रयंचशुद्धिः सूतिकामग्निदंचाहित्वेतरसपिंडानांसूतिकामग्निदंहित्वेत्यत्रसंग्र
हेस्मरणात् शातातपः अंतर्दशाहेजननात्पश्चान्मरणंयदि प्रेतशुद्धिरेवकर्तव्यापिंडदानेस्ववंधुभिः प्रा स्मा५
रब्धेप्रेतपिंडहेतमध्येचेज्जननंभवेत् तथैवाशौचपिंडांस्तुशेषान्दद्याद्यथाविधि एवमेवशावाशौ
चसन्निपातेपि प्रजापतिः अशौचेतुसमुत्पन्नेपुत्रजन्मयदाभवेत् कर्तुस्तात्कालिकीशुद्धिःपूर्वाशौचेन
शुद्ध्यति जातकर्मादिकर्माणितात्कालिकीशुद्धिः अथदहनकालेऽग्निनाशेतत्रयमः यजमानेचिताद्
ढेपात्रन्यासेतत्याहृते वर्षाद्यभिहितेचाग्नौततःशृद्धामियाज्ञिकाः शेषंलब्ध्वावदग्धेननिमंत्रंतत्रका
रयेत् शेषालाभेतयाकुर्याद्दग्धशेषस्यवापुनः अस्थपासंनिशेषांतमादौयास्तान्समंत्रंयथैः शेषंलब्ध्वा^ १३९

नस्यवासन्निपाते पूर्वशौचशेषेण शुद्धिं न तत्रापतितस्य च तथा च याज्ञवल्क्यः अंतरा जन्ममरणे शेषाहो
भिर्विशुद्ध्यति स्वल्पाशौचमध्ये दीर्घाशौचसन्निपाते पूर्वशेषेण न शुद्धिः यदाहोशनाः स्वल्पाशौचस्य
मध्ये तु दीर्घाशौचं भवेद्यदि न पूर्वेणा विशुद्धिः स्यात्स्वकालेनैव शुध्यति अपरो विशेषश्चांगिरसाभिहितः
सूतके मृतके चेत्स्यान्मृतके त्वथ सूतके तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकं तथा मातर्यग्रे प्रमी
तायामशुद्धौ म्रियते पिता पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीं पितुः शेषेणेति पित्राशौच
कालेनैव शुद्धिर्न मात्राशौचशेषेणेत्यर्थः पित्राशौचकालमध्ये माता यदि म्रियेत तदा पित्राशौचसम
नंतरं मातुः पक्षिणीं कुर्यादिति तात्पर्यं ब्रह्मपुराणे आद्यभागद्वये यावत्सूतकस्य तु सूतके द्वितीये पति
तेकायात्सूतकाच्छुद्धिरिष्यते अत ऊर्ध्वं द्वितीयात्तु सूतकांतात् शुचिः स्मृतः एवमेव विचार्यं स्या
न्मृतके सूतकांतरे अस्यार्थः सूतकस्य संबंधि चरमहोरात्रस्य यदाद्यभागद्वयं दिवसस्य च तथ्या बाह्यभा
गं यद्द्वभागात्मकं तत्र द्वितीये सूतके पतिते आद्यात्सूतकाच्छुद्धिः अत ऊर्ध्वमस्तमयानंतरं सूतकांतरपा

शु॰ प्र॰ नानुगन्तव्यो न शूद्रेण द्विजात्कश्चित् अनुगम्यानमसित्वा स्पृष्ट्वाग्निं घृतमश्य कृत्स्नशुचिः इयं च
१३ स्नानादिजन्याशुद्धिः समानोत्कृष्टजातीयानुगमने ब्राह्मणेन क्षत्रियेणानुगमने कृते वासिष्ठेनो
क्तं मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमशौचं अस्निग्धे त्वहोरात्रं शवानुगमने चैवमिति एवमित्यनेना
होरात्रमतिदिश्यते वैश्यानुगमने पक्षिणी परिकल्पनीया क्षत्रियापेक्षया न्यूनत्वात् शूद्रापेक्षया
धिकत्वात् ब्राह्मणस्य शूद्रानुगमने पराशरः प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः अनुगच्छे
न्नीयमानं स त्रिरात्रेण शुध्यति त्रिरात्रे तु ततश्चीर्णे नदीं गत्वा समुद्रगाम् प्राणायामशतं कृत्वा घृ
तं प्राश्य विशुध्यति अनेनैव न्यायेन क्षत्रियस्य वैश्यशूद्रयोरनुगमने क्रमेणैकाहः पक्षिणी वैश्य
स्य शूद्रानुगमने एकाहः इत्यनुसंधेयं शंखः क्षुद्रपादोऽसपिण्डस्य प्रेतालंकरणे कृते अज्ञानादुपवा
सः स्यादशक्तौ स्नानमिष्यते पारस्करः मृतस्य बान्धवैः सार्धं कृत्वा तु परिदेवनं वर्जयेत्तदहोरात्रं दा
नश्राद्धादिकर्म च अथ शौचसन्निपाते निर्णयः तत्र यस्याशौचस्य यावत्कालः तन्मध्यतनसमस्तान् १३८

महीपतीनां नाशौचं हतानां विद्युतान यथा गोब्राह्मणार्थे संग्रामे यस्य चेच्छति भूमिपः राज्ञा
मशौचभावस्तत्साधारणप्रजापालनशान्तिकपौष्टिकादि नित्यनैमित्तिकादिस्तत्र पूर्वोक्तैव
व्यवस्था यस्य च मंत्रिपुरोहितादेरनन्यसाध्यमंत्राभिचारादिविषये राजा इच्छति तेन न तद्विष
ये शौचं न कार्यं सूपकारादीनामप्यनन्यसाध्येकर्मणि सद्यः शौचं यदाह प्रचेताः कार
वः शिल्पिनो वैद्या दासीदासास्तथैव च कारवः सूपकारादयः शिल्पिनश्चित्रनिर्णेजकाश्चित्र
कादयः एतेषां च स्वीयस्वीयासाधारणकर्मसु एव सद्यः नान्यत्र तथा च विष्णुः न राज्ञां रा
जकर्मणि न व्रतिनां व्रते न सत्रिणां सत्रे न कारूणां कारुकर्मणि शातातपः सूलकर्मकराः
शूद्रा दासीदासास्तथैव च स्नाने शरीरसंस्कारे गृहकर्मण्यदूषिताः एतदापद्विषयं त
था सद्यः स्पर्शो गर्भदासो भर्तृदासस्त्वब्राह्मणः चिकित्सको यत्कुरुते तदन्येन न शक्यते
तस्माच्चिकित्सकः स्पर्शे शुद्धो भवति नित्यशः प्रथमान्त्यामनाशौचं तत्र याज्ञवल्क्यः ब्राह्मणे

म॰ पा॰ प्रतिलोमाश्रितानां तु न शौचाभाव एव एतच्च सन्निधाने असन्निधौ तु विशेषः अनौरसेषु पुत्रेषु जातेषु च
१३१ मृतेषु च परपूर्वासु भार्यासु प्रसूतासु मृतासु च त्रिरात्रमित्यनुवर्तते परः पूर्वपतिर्यासां भा
र्याणां ताः परपूर्वाः एवंविधाः स्वैरिण्यो या यमाश्रितास्तस्यापि त्रिरात्रमित्यर्थः भार्यापुत्रशब्दयोः
संबंधिशब्दत्वात् यस्य च भार्या यस्य च पुत्रं तस्यैवाशौचं सपिण्डानां तु सद्यः शौचं तथा च प्रजाप
तिः अन्याश्रितेषु दारेषु परपत्नीसुतेषु च गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्पिता एत
च्च सन्निधाने असन्निधाने तु पूर्वोक्त एकाहः गोत्रिणः स्नानशुद्धाः स्युरिति यत्र पितुस्त्रिरात्रा
न्नाशौचं तत्र सपिण्डानां स्नानाच्छुद्धिः यत्र तु पितुस्त्रिरात्रं तत्र सपिण्डानामेकाहः अत एव मरीचिः
सूतके मृतके चैव त्रिरात्रं परपूर्वयोः एकाहस्तु सपिण्डानां त्रिरात्रं यत्र वै पितुः स्वदेशे राजनि मृ
ते मनुः प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः ज्योतिषा सह वर्तत इति सज्योतिः अह्नि चे
दस्तमनपर्यन्तं रात्रौ चेदुदयपर्यन्तमित्यर्थः राज्ञो विषयाविशेषेः शौचाभावमाह याज्ञवल्क्यः म १३७

त्रैमातामातामहीयादि विदेशस्थसमीप्यादिषु स्नानाच्छुद्धिः तथाह वृद्धवसिष्ठः भगिन्यां संस्कृता
यां तु भ्रातर्यपि च संस्कृते मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते शालके तत्सुते चैव सद्यः स्नानेन
शुध्यति अत्र भ्रात्रपेक्षया भगिन्या तदपेक्षया तत्सुतस्य पूर्वोक्तनीत्या निर्दशाद्यमरणे ज्ञेयं तथा सन्नि
धाने ग्रामेश्वरे कुलपतौ श्रोत्रिये च तपस्विनि शिष्ये पंचत्वमापन्ने शुचिर्नक्षत्रदर्शनात् अत्र शिष्य
श्रोत्रियादिर्गुणो दिवा चेत् शौचमापन्नाति तदा नक्षत्रदर्शनाच्छुद्धिः वसिष्ठः असपिण्डे स्ववेश्म
नि मृते एकरात्रं वृद्धवसिष्ठः ग्राममध्यगतो यावच्छवस्तिष्ठति कस्यचित् ग्रामस्य तावदशौचं निर्ग
तेषु चितामियात् अनेनैव न्यायेन नगरेपि स्वस्ववीथ्यां यावच्छवस्तिष्ठति तावदशौचमिति ज्ञेयं उक्त
प्रकारेणान्येपि गुरुलघुशौचकल्प्याः सन्निधिविदेशस्थापेक्षया गुणवदगुणापेक्षया चार्य
वस्थापनीयाः अथ दत्तकजादिषु याज्ञवल्क्यः अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च अहोरात्रमि
त्यनुवर्तते अनौरसेषु क्षेत्रदत्तकादिषु जातेषु मृतेषु च प्रतिलोमव्यतिरिक्तमन्यमाश्रिता अन्यगताः

म. पा.
१२८

यात्वेः ह्विश्रुतवृत्तोयाज्ञवल्क्यः गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च गुरूपाध्यायः एवंग्रा
मनिवासिनः सन्निहितश्रोत्रियस्यैतदशौचं तथाचाश्वलायनः एकाहंसब्रह्मचारिणिसमा
नग्रामीणे च श्रोत्रिय इति सब्रह्मचारी एकाचार्योपनीतः आचार्यविषयेमनुः त्रिरात्रमाहुर
शौचमाचार्येसंस्थितेसति तस्यपुत्रेचपत्न्यांचदिवारात्रमितिस्थितिः सन्निहितगुणवच्छ्रोत्रि
यसन्निहितमातुलादिष्ठपरमेमनुरेव श्रोत्रियेतूपसंपन्नेत्रिरात्रमशुचिर्भवेत् मातुलेपक्षिणीं
रात्रिंशिष्यर्त्विग्बान्धवेषु च उपसंपन्नोमैत्र्यादियुक्तोगुणयुक्तोवा बृहस्पतिः अहंमातामह
ह्याचार्यश्रोत्रियेष्वशुचिर्भवेत् बृहस्पतेनाः संस्थितेपक्षिणीरात्रिंदौहित्रेभगिनीसुते संस्कृ
तेतुस्त्रिरात्रंस्यादितिधर्मोव्यवस्थितः पित्रोरुपरमेस्त्रीणामूढानांतुकथंभवेत् त्रिरात्रेणैव
शुद्धिःस्यादित्याहभगवान्यमः श्वश्रूश्वशुरयोश्च भगिन्यांचमातुलान्यांचमातुले पित्रोःस्वा
सवितृष्वसृपक्षिणींनिर्दयोन्निशि तथामातुलेश्वशुरेमित्रेगुरौगुर्वङ्गनासुच अशौचंपक्षिणींरा १३६
त्रिं

न चैव वयोवस्याशौचवत्सर्ववर्णसाधारणं तथा चव्याघ्रपदः तुल्ये वयसि सर्वेषामतिक्रांते तथै
व च उपनीते तु विषमं तस्मिन्नेवातिकालजं अयमर्थः जन्मप्रभृति उपनयनात् अर्वाचीने व
यसि यदाशौचं तत्सर्वेषां ब्राह्मणानां तुल्यं यच्च दशाहादिकेऽतिक्रांते तदपि तुल्यं उपनीते
परमेवस्याह्यादशोन्यादिरूपेण विषमं तस्मिन्नेवोपनीतोपरमण्वातिकालजमतिक्रांताशौचं
भवति न पुनर्वयोवस्याशौचातिक्रमः इति अथ प्रोषितमृतदाहविधिस्तदाशौचं च प्रोषितादि
मृतशरीरालाभे तदस्थिभिः प्रतिकृतिं कृत्वा अस्थ्नामप्यलाभे सत्वग्रहोक्तप्रकारेण पर्णशरैः प्रति
कृतिं कृत्वा दाहः कार्यः तत्राहिताग्निर्यदि प्रोषितमृतस्तदा दशाहं द्वादशाहादिकमेवाशौचं भ
वति तदाह वासिष्ठः आहिताग्निश्चेत्प्रवसन्म्रियेत पुनः संस्कारं कृत्वा शववच्छौचमिति
अनाहिताग्नेस्त्रिरात्रं हुपिष्टेजसंमिश्रे दग्धव्यस्त्वनयाग्निना असौ स्वर्गाय लोकाय स्वाहेत्य
नाम सर्वांधवैः एवं पर्णशरं दग्ध्वा त्रिरात्रमशुचिर्भवेदिति स्मरणात् अथोपाध्यायाद्युपरमे तत्र मति

म. पा. १३५

पैठीनसिः पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् दशाह

मिति द्वादशाहस्याप्युपलक्षणं सूतकी भवेदित्यनेन प्रथमकार्यकर्तव्यतां दर्शयति सापत्नमातरि तु विशे

षो दक्षेणोक्तः पितृपत्न्यामपेतायां मातृवर्ज्यं द्विजोत्तमः संवत्सरे व्यतीतेपि त्रिरात्रमशुचिर्भवेत् एत

च्च वक्ष्यमाणदेशान्तरलक्षणरहितदेशान्तरस्थमृतौ देशान्तरमृते तु सपिण्डे मासत्रयादर्वागपि स

द्यः शौचं देशान्तरमृतं श्रुत्वा क्लीबे वैखानसे यतौ मृते स्नानेन शुध्यन्ति गर्भस्रावे च गोत्रिण इति स्म

रणात् देशान्तरलक्षणमाह बृहन्मनुः महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः वाचो यत्र विभिद्यन्ते

तद्देशान्तरमुच्यते बृहस्पतिः देशान्तरं वदन्त्येके षष्टियोजनमायतं चत्वारिंशद्वदन्त्यन्ये त्रिंशदन्ये त

थैव च अत्र च देशाचारतो व्यवस्था स्मृत्यर्थसमनन्तरंव्याख्यास्त्रीपुरुषयोः परस्परत्वेवं सवर्णाशौचमे

वेति ग्रन्थकारः प्रामस्तवान् देशान्तरे कालान्तरे च हीनवर्णायां मातुः सपत्न्यां मरणोत्तु पुत्रसावित्र

ं हीनवर्णासपत्नीपुत्रस्यैवं संवत्सरेतीतेपि सपत्न्योः परस्परं चैवमिति अतिक्रान्ताशौचमुपनीतोपरमेव १३५

शौचं तत्रानिर्दशाजननश्रवणेपितुः सचैलस्नानाच्छुद्धिः यदाह मनुः निर्दशं ज्ञातिमरणं श्रु
त्वा पुत्रस्य [illegible] जन्म च सवासा जलमाप्लुत्य शुद्धो भवति मानवः पुत्र इति संबंधसूतके समस्ताति
तरे व स्नाने सपिण्डानां दशाहादिके व्यतीते सूतकं नास्त्येव अत एव देवलः नाशुद्धिः प्रसवाशौ
चे व्यतीते पुदिनेष्वपि प्रोषितमरणेपि याज्ञवल्क्यः प्रोषिते कालदेशः स्यादिति देशांतरमपि।
एर्डमरणे क्षत्रियाद्याशौचकालेवानतिक्रांते दशरात्रादिशेषं यावदशौचं भवति नश्रवणप्रभृति
पुनर्दशाहादिकमित्यर्थः दशाहयनंतरं मासत्रयेपर्यंतं त्रिरात्रं ततः षण्मासपर्यंतं पाक्षिणी
ततो नवमादर्वागेकाहः ततः संवत्सरपर्यंतं स्नानोदकदानाभ्यामेव शुद्धिः संवत्सरानंतरं स्नाने
नेति विवेकः यदाह वृद्धवसिष्ठः मासत्रये त्रिरात्रं स्यात्षण्मासे पक्षिणी तथा अहं स्तु नवमाद
र्वाग् ऊर्ध्वं स्नानेन शुध्यति स्नानेन सहचरितमुदकदानमप्यापादितपति मनुः संवत्सरे व्यतीते।
तु स्पृष्ट्वैवापो विशुध्यति स्पृष्ट्वा स्नात्वेत्यर्थः अन्यानि यानि विरुद्धवचनानि पूर्वोक्तविषयमतएव

अं॰
प॰
१३४

षु षड्भिस्त्रिभिस्तथैकेन क्षत्रविट्शूद्रयोनिषु विप्रः क्षत्रियस्य विट्शूद्रेषु षड्रात्रत्रिरात्राभ्यां वैश्यस्य
शूद्रे सपिण्डेषु षड्रात्रेण शुद्धिः हीनवर्णानां तूत्कृष्टेषु सपिण्डेषु जातेषु मृतेषु वा तदाशौचापगमो शु
द्धिः बौधायनोऽनुगमनापद्विषयं हारीतायुक्तं त्वापद्विषयमिति व्यवस्था एतेषां तु सापिण्ड्यं प्रक
रणाभिहितत्वात् आपदो विशेषश्चापस्तम्बेनोक्तः क्षत्रविट्शूद्रजातीनां तत्र मृतस्तकसूतके तेषां
तु पैतृकं शौचं विभक्तानां तु मातृजात्यभिहितमित्यर्थः प्रतिलोमानां तु सूतकादिकं नास्त्येव प्र
तिलोमास्तु धर्महीना इति स्मरणात् मृतशरीरोत्सर्गवत् मलापकर्षणार्थं शौचं कुर्यात् अथ समानो
दकशौचं तत्र मनुः दशाहं शावमाशौचं सपिण्डेषु विधीयते जननेऽप्येवमेव स्यान्निपुणां शुद्धिमि
च्छतां जन्मन्येकोदकानां तु त्रिरात्राः शुद्धिरिष्यते एकोदकः समानोदकः ते च सप्तमपुरुषादूर्ध्व
भाविनः समानोदकभावानुवृत्तिश्च यावज्जन्मनाम्नोर्विज्ञानं तथा च मनुः सपिण्डता तु पुरुषे स
प्तमे विनिवर्तते समानोदकभावस्तु जन्मनाम्नोरवेदने निवर्तत इत्यन्वयः अथ प्रोषितमरणे जनने वा १३४

ज्ञातं अपक्वं तंडुलादिकं चान्नं सूतकप्रसक्तादेव ग्राह्यं नान्यस्मात् तथा चांगिराः अन्नं सूतकप्रसक्तानामा
ममन्नं तु न गर्हितं भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु पयः पिबेत् अत्र मद्यस्त्वातिरिक्तो दनादिविषये पक्व
शब्दः इतरनामसमीचिवचनेनविरोधात् व्रतादिप्रारब्धे सत्यपि आशौचे सूतकादि भवति न दातृत्व
न्माशौचे सूतकाभावः व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकमि
ति विष्णुस्मरणात् सूतकमिति मृतकस्याप्युपलक्षणं प्रारम्भश्च तेनोक्तः प्रारम्भो वरणं यज्ञे संक
ल्पो व्रतसत्रयोः नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया प्रारम्भाभावेपि कन्यायाश्चाथायत्वे स
१ न्निहितलग्नान्तराभावे च विष्णुनैवाभ्यनुज्ञा दत्ता अनारम्भाविशुद्ध्यर्थं कूष्माण्डैर्जुहुयाद्घृतं गां द
द्यात्तं च गाव्याशीत ततः शुद्ध्यासि सूतकी कूष्माण्डैः कूष्माण्डमंत्रैः अथानुलोमविजातीयसपिंडाशौ
चे तत्र बौधायनः तत्र विट्शूद्रजातीयाये स्युर्विप्रस्य बांधवाः तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्य
ते तेषामशौचे तत्र जातिजननादिनिमित्तं शौचे हारीतः दशाहाच्छुद्ध्यते विप्रो जन्महानौ स्वयोनि

म·पा·
६३

भोजननिवृत्तिः यदान्नदातृज्ञानेनभोक्तान्नदापिभोक्तुरेववचनाद्दोषः नदातुर्भोजननिमि
त्तोदोषः सूतकान्नभोजयितृत्वदोषोस्त्येव अयंचभोजयितृत्वनिमित्तोदोषः सूतकेमृत
केचविहितप्रथमादिदिनवर्ज्याद्यादिव्यतिरिक्ताकालेविज्ञेयः तत्कालेविहितत्वात् ब्र
ह्मपुराणे अपिदातृगृहीत्रोश्चसूतकेमृतकेथवा अविज्ञातेनदोषःस्याच्छ्राद्धादिषुकदाच
न विज्ञातेभोक्तुरेवस्यात्प्रायश्चित्तादिकंक्रमात् बृहस्पतिः विवाहोत्सवयज्ञेषुत्वंतरामृतसू
तके पूर्वसंकल्पितार्थेषुनदोषःपरिकीर्तितः षट्त्रिंशन्मते विवाहोत्सवयज्ञेषुत्वंतरामृत
सूतके परैरन्नंनदातव्यंभोक्तव्यंचद्विजोत्तमैः भुंजानेषुतुविप्रेष्वंतरामृतसूतके अन्यगे
होदकाशांताः सर्वेतेशुचयः स्मृताः मरीचिः लवणेमधुमांसेचपुष्पमूलफलेषुच शा
ककाष्ठतृणेष्वप्सुदधिसर्पिपयःसुच तिलौषधाजिनेचैवपक्वापक्वेस्वयंग्रहः पण्येषुचैव
सर्वेषुनाशौचंमृतसूतके स्वयंग्रहः स्वाम्यनुज्ञातोग्रहणीयादित्यर्थः पक्वापक्वइतिपक्वंभक्ष्य

स्नानदानश्राद्धादौन दोषः तथा च वृद्धवसिष्ठः चन्द्रसूर्यग्रहे स्नायान्मृतके सूतके ऽपि वा
अस्नायीमृत्युमाप्नोति स्नायीमृत्युं न विन्दति तथा मृतके सूतके चैव न दोषो राहुदर्श
ने तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते इति सूतके मृतके वा सज्जल्पानां तु दोषः
सूतके न तु जलस्यान्नस्य दोषो मनुरब्रवीत् इति तेनैवोक्तवान् अत्र विशेषः षड्विंशन्मते
उभाभ्यामपरिज्ञाते सूतके नैव दोषकृत् एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेत् उभा
भ्यां दातृभोक्तृभ्यां यद्यपि दाता सूतकादि परिज्ञानेनास्ति ज्ञातस्यैव जननादेर्निमित्तत्वा
त् तथा दातृपरिज्ञानमंतरेण केवलभोक्तृज्ञाने ऽपि वचनाद्भोजने दोषो भोक्तुरेव उपपत्ति
श्च दातृज्ञाने सूतकादिप्राप्तौ निमित्ते भोक्तृसंने भोजननिहतौ निमित्ते सूतकादि
स्वरूपानिष्पत्तिरेकोंशः तज्ज्ञानं चापरः एतदुभयं वसिष्ठनिमित्तं एवं च निमित्तैकदेशस्य
प्रसवादेर्भोक्तृज्ञातत्वादेकदेशाविभावितयायेनान्यस्यापि संभाव्यमानत्वात्केवलभोक्तृज्ञानेऽपि

स॰ ते अशौचमध्ये हि तेन ब्रह्मचारिणामपि शौचे न होतव्यमिति गम्यते बृहस्पतिः सूतके मृतके चैव
पा॰ न शक्तौ श्राद्धभोजने प्रवासादिनिमित्तेषु हावयेत् न तु हापयेत् अग्निसाध्यानेपि वैश्वदेवस्य
१३२ निवृत्तिस्तथा पंचयज्ञादीनामपि तथा च संवर्तः विप्रो दशाहमासीत वैश्वदेवविवर्जितः प वि॰
चयज्ञविधानं तु न कुर्यान्मृत्युजन्मनोरिति एवं चोक्तानित्यनैमित्तिकव्यतिरेकेण तु येषां नि
त्यनैमित्तिकानामपि निवृत्तिः यत्तु नन्दान प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते इति
तत्काम्यहोमाभिप्रायं वैश्वदेवाभिप्रायं च संध्यादिविषये विज्ञानेश्वर एव सर्वकालमुपस्था
नं संध्ययोः पार्थिवेष्यते अन्यत्र सूतकाशौचार्तिमात्तुरभीतितः सूतके अशौचे च संध्याया
न स्वरूपतः परित्यागः सूतके मृतके चैव संध्याकर्म समाचरेत् मनसोच्चारयेन्मंत्रान्प्राणा
यामवृते द्विज इति अंगजाप्रलोप[illegible]स्तु सावित्रीं तु श्चार्यकार्यः इति तथा च पैठीनसिः सूतके
सावित्र्यांचांजलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यादिति सूतकादौ यह्नोजाते १३२

वः॰ काम्यानांतुसर्वथानिवृत्तिः वितानोग्नीनांविस्तारस्त्रेताग्निः तत्रक्रियमानानिनित्या
ग्निहोत्रादीनिवैतानानितानिवर्जयित्वानित्यानिविनिवर्त्तेरन्नित्ययंनिषेधोनित्याग्निहोत्रादि
षुनिवर्त्तेइत्यर्थः अतःस्वयमेवकुर्यात् शालाग्निरदह्याग्निस्तत्संबंधानांसायंप्रातर्होमस्था
लीपाकादीनांपाक्षिकीवर्त्तव्यताकरणमकरणंवाशास्त्रस्येत्यर्थः यदाचकर्मणामस्वीकारः त
दाश्वसपिंडाएतानिकुर्युः अन्येनामपिंडेनैतानिकारयेदित्यर्थः तत्रापिस्वद्रव्यत्यागात्म
केप्रधानंस्वयमेवकुर्यात् तस्यानन्यानिष्पाद्यत्वात् प्रलक्षः संध्यामिष्टिंचरुंहोमंयावज्जी
वंसमाचरेत् नत्यजेत्सूतकेवापित्यजन्गच्छेदधोद्विजः इष्टिराहिताग्नेर्दर्शपूर्णमासात्मि
काचरुरनाहिताग्नेःस्थालीपाकादिरूपः जातकर्मणि सूतकेतुसम्प्राप्तेस्मार्त्तेकर्मकथं
भवेत् पिंडयज्ञंचरुंहोममसगोत्रेणकारयेत् पिंडयज्ञःपिंडपितृयज्ञः चरुश्रपणा
कर्माश्वशुर्यादिकस्थालीपाकः असगोत्रः असपिंडः सपिंडनिषेधस्याशौचनिमित्तत्वा

मं·
पा·
१३१

क्रमेणात्तु अस्थिसंचयने कृते एव चत्वाशौचत्रिभागाः अह्निन्नेत्वस्थिसंचयनाभाव इति तात्पर्यं तथा च स्मर्यते अस्थिसंचयनादूर्ध्वमंगस्पर्शो न दुष्यतीति एतदुपनीतविषयं अनुपनीते त्वस्थिसंचयनमंतरेणास्वाशौचत्रिभागास्त्र एव तथाह देवलः स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः शूद्रविट्क्षत्रविप्राणां यथाशास्त्रप्रबोधितमिति कर्मानधिकारलक्षणं त्वाशौचं स्वस्ववर्णाशौचकालाजंतं स्नानादिभिरपगच्छति एतच्चाशौचापादितागतेः संस्कारादिनप्रभृति अनाहिताग्नेस्तु मरणादिनप्रभृति अस्थिसंचयनेनूभयोरपि संस्कारादिनप्रभृतीति विवेकः तथा चांगिराः अनग्निमतउत्क्रांते सापनेः संस्कारकर्मणा इति पैठीनसिरपि अनग्निमत उत्क्रांते नेवशौचादि द्विजातिषु दाहादग्निमतो विद्याद्विदेशस्थमृतेतथेति पैठीनसिरपि साग्निकस्य दाहप्रभृतेवाशौचादीनि तत्तुत्रादीनामासंस्कारात्संध्यादिकर्मलोपो नास्ति अशौचे नित्यनैमित्तिकानांनत्तुपसंग्रहाः अतो वैतानानां स्मार्तानां च कर्मणां प्रतिप्रसवे पि निमित्तकस्यापि प्रतिप्रस १३१

गायां भास्करस्य देशे मातापित्रोर्मृते अन्यथा तु चैव सोमे च वपनं सम्यक्स्मृतमिति देवलः
दशमेह्नि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत् तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि चेति प्रथमा
दिने शुक्लं तत्तीर्थस्यापि शुद्ध्यर्थं दशमादिनेऽपि वपनं कर्तव्यं दशमदिनमिति सूतकांतोपलक्ष
णं अंते च वासस्त्यागस्तस्यैव स्मरणात् सूतकांतकर्तव्यवासस्त्यागसाहचर्यात्केशश्मश्र्वादीनां
त्यागोऽपि सूतकांते कर्तव्यः अस्थिसंचयनादिनमपि वैकल्पिकं तत्र संवर्तः प्रथमेह्नि तृतीये वा
सप्तमे नवमे तथा अस्थिसंचयादिनमपि वै कार्यं दिने तज्ज्ञैत्रजैस्सह विष्णुः चतुर्थे दिवसे
स्थिसंचयनं कुर्यात्तेषां च गंगाम्भसि प्रक्षेपः तथा द्वितीये त्वस्थिसंचय इति अत्र स्वस्वगृह्यानुसा
रेण व्यवस्था अस्थिसंचयनदिवसे चयनदिवसे च श्मशानवासिदेवतोद्देशेन स्नानं कर्त
व्यं अस्पृश्यत्वलक्षणाशौचनिवृत्तेः कालनियममाह देवलः दशाहादित्रिभागेन कृ
ते संचयने क्रमात् अंगस्पर्शनमिच्छंति वर्णानां तत्त्वदर्शिनः त्रिचतुःपंचदशाभिः स्पर्शनावर्णाः

न° पा°
१३०

केतस्मनन्तरं द्व्यहस्यकाहे वित् इति स्मरणात् त्रिरात्रामिति मातापित्रव्यतिरिक्तविषयं अशौचविना

नियमविशेषो याज्ञवल्क्येन दर्शितः क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक्क्षितौ क्रीताशनाः

अयाचित[illegible]याशना वा भवेयुरिति नियमाद्याचिताद्यभावे नशनं सिद्धं दिनत्रयपर्यन्तमयं

नियमः [illegible]वसिष्ठः गृहान्व्रजित्वा त्र्यहमत्वे अहमनस्नन्तस्त आसीरन् क्रीतोत्पन्नेन वा वर्ते

रन्निति अशौचविनाशयनायत्तणामयः प्रस्तव त्र्यहमस्तरहस्य उच्यते मनुः अक्षारलवणान्नाः स्यु

र्निमज्जेयुश्च ते त्र्यहं मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षिताविति गौतमः अधःशय्या

सनिनो ब्रह्मचारिणः सर्व इति तथा वपनं द्वः एवानुभाविभिः सर्वैः सपिण्डैः पुत्रैश्चैव वृद्धास्व स्वदे

शाचारानुसारेण प्रथमदिनप्रभृतिषु विषमदिनेष्वथवा समदिनेष्वपि श्राद्धप्रदानात्पूर्वं

कर्तव्यं यदाह पैठीनसिः अनुभाविनां च परिवापनमिति अनुभाविनोऽल्पवयसः सपिण्डाः

पुत्राश्च तथा द्वितीयेहनि कर्तव्यं क्षुरकर्म प्रयत्नतः तृतीये पंचमे वापि सप्तमे वा प्रदानतः तथा रामे°
१३०

दूर्वर्णाश्चेदनुक्रमं निर्हरति उक्तश्चेन्नीचं तत्र निर्हरणीयाशौचदिनैः शुद्धिः ब्राह्मणश्चेच्छूद्रं
निर्हरति तदा मासेन शुद्धिः शूद्रश्चेद्ब्राह्मणं तदा दशाभिर्दिनैर्विस्पनेन प्रकारेणानुसंधेयम्
ब्रह्मपुराणे ब्राह्मणस्त्वन्यवर्णानां नकारेणानुसंधेयम् ब्रह्मपुराणे ब्राह्मणस्त्वन्यवर्णा
नां न करोति [illegible] कदाचन कामान्मोहाद्भयाल्लोभात्कृत्वा तज्जातितां व्रजेत् पुत्राः कुर्वीतिवि
प्रायन्नत्रैविट [illegible]ध्योनयः सुताः शोभ्यः पुत्रेभ्यो न करोति कदाचन राज्ञे मृते सपिण्डे तु निरपत्ये
पुरोहिताः मंत्री वा न दशौचं तु चीर्त्वा पश्यन्करोति सः अनपत्ये अविद्यमानसपिण्डे च राजनि
मृते सति तत्पुरोहितः तस्मै राज्ञे श्राद्धं कुर्यात् तत्र पुत्राशौचं चीर्त्वेत्यर्थः शवस्पर्शनिमित्तं तु
शौचं स्पर्शवत एव तत्र ज्ञात्यादीनां तद्व्याणां वा तथा याचारीया अशौचं यस्य संस्पर्शाद्दाप्यते
गृहमेधिनः क्रियास्तस्य न लुप्यन्ते गृह्याणां च न तद्भवेत् क्रिया वैतानोपासनाख्याः गृह्या १०२
णां गृहे भवानां अतिक्रान्ताशौचे प्येवमेव अतिक्रान्ते दशाहे तु पश्चाज्जानाति चेद्गृही त्रिरात्रं सूत

शु॰पा॰ १२८ प्रतिशेषुः समालभ्य हत्वा स्मृतिपदं शौनैः धर्मार्थं प्रेतनिर्हरणादिकं कुर्वतामपि स्नानोत्तरं प्रा
णानायम्य निम्बपत्रदशनप्रभृति सद्य एव शौनं कर्मकरणेन सद्यः शुद्धिः यतः स एवाह प्रवे
शनादिकं कर्म प्रेतसंस्पर्शिनामपि इच्छतां तत्क्षणाच्छुद्धिं परेषां स्नानसम्भवात् पराशरः अ
नाथब्राह्मणं प्रेतं ये वहन्ति द्विजातयः पदे पदे यज्ञफलमानुपूर्व्याल्लभन्ति ते न तेषामशुभं किं
चित्पापं वा शुभकर्मणाम् जलावगाहनात्तेषां सद्यः शौचं विधीयते यस्तु स्नेहादिवशान्निर्हृ
त्य तदन्नमश्नाति तद्गृहे च निवसति तस्य दशाहाच्छुद्धिः यस्तु निर्हरणादिकमेव करोति न त
द्गृहवासं न तदन्नभोजनं स त्वेकाहात् यथाह मनुः असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्
विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् यदन्नमत्ति तेषां तु दशाहेनैव शुध्यति अनदन्न
न्नमह्नैव न चेत्तस्मिन् गृहे वसेत् एतच्च सजातीयविषयं विजातीयविषये तु गौतमेनोक्तो विशेषः
अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत् पूर्वो वावरं तत्र शौचोक्तमशौचमिति उपस्पर्शनं निर्हरणं ही राम: १२९

दक्षिणाभिः समर्चयेत् एवं हुतमंत्रविप्रं हिरण्येन समर्चयेत् गोवासस्त्रेणां भूम्यां च प्रेतं तं मनसा स्म
रन् ततस्तिलाम्भो विप्रास्तु हस्तैर्दर्भसमन्वितैः दिव्ये पुण्योः पूर्वं तन्नामगोत्रयो निवेद्य च हविर्गंध
तिलाम्भस्तु ततस्ते दद्युः समाहिताः मित्रभृत्यजनैः सार्द्धं पश्चाद्भुंजीत वाग्यतः भविष्यत्पुराणे स
वर्णोत्तरानिष्पन्नं नागं कृत्वा तथैव गाम् व्यासाद्दत्वा विधिवत् पितृणां पुरमाप्नुयादिति उद
कादिदानानंतरं कर्तव्यमाह याज्ञवल्क्यः कृतोदकान्समुत्तीर्णान्मृदुशाड्वलसंस्थितान् स्नाता
नपवदेयुस्तानितिहासैः पुरातनैः अपवदेयुः बोधयेयुः इतिहासस्वरूपं च मानुष्ये कदलीस्तंब
निस्सारे सारमार्गणं करोति यः स संमूढो जलबुद्बुदसंनिभ इति तथा न रोदितव्यं ॰॰ मपि त्वास
हपवं ॰॰ श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतोऽवशः अतो न रोदितव्यं हि क्रियाः कार्याः स्वश
क्तितः इति इतिहासश्रवणानंतरं किं कर्तव्यमि… आह इति संश्रुत्य गच्छेयुर्गृहं बालपुरः स
राः विदश्यान्निम्बपत्राणि नियता द्वारि वेश्मनः आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान्

पंचविष्णुनाम्भिर्हितं एकादशीं समासाद्य शुक्लपक्षस्य वै तिथिं विष्णुं समर्चयेद्देवं यमं वैवस्वतं तत
था दद्यात् पिंडं घृताभ्यक्तान्दर्भे मधुसंयुतान् तिलमिश्रांश्च दद्याद्वै संयतो दक्षिणामुखः
विष्णुर्वै समासाद्य नद्यं संगमे ततः क्षिपेत् नामगोत्रग्रहं तत्र पुष्पैरभ्यर्चनं ततः धूपदीप
प्रदानं च भक्ष्यभोज्यं तथापरं निमंत्रयेत विप्रान्वै पंच सप्त वापि वा विधानपः सम्यग्दान्वै
र्जे लोकपन्नान्समाहितान् अपरेह्नि संप्राप्ते मध्यान्हे समुपोषितः विष्णोरभ्यर्चनं कृत्वा वि
प्रांस्तानुपवेशयेत् उदङ्मुखान्यथाज्येष्ठं पितृरूपमनुस्मरन् मनो निवेश्य विष्णौ वै सर्वं कु
र्यादतन्द्रितः आवाहनादिकं न्यासं दैवपूर्वं नदाचरेत् स्नांस्तानानतो विप्रान्संपूज्य यथा
विधिः हविष्यं चान्नेनैव तिलादिसहितेन वा पंचपिंडान्प्रदद्याच्च देवं रूपमनुस्मरन्
प्रथमं विष्णवे दद्याद्ब्रह्मणे च शिवाय च यमाय सानुचराय च तुर्यं पिंडमुत्सृजेत् मृतस्य
कीर्तयन्नाम गोत्रपूर्वं मतः परं विष्णोर्नाम समुद्दिश्य नैवं पंचमं पिंडं क्षिपेत् विष्णुना चक्षुषा विधिव

ह्मणाद्दत्तानां चण्डालानां तथैव च ॥ ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदेहिकम् ॥ अत्रापरं
विशेषमाह पराशरः ॥ चण्डालेनश्वपाकेन गोभिर्विप्रैर्हतो यदि ॥ आहिताग्निर्मृतो विप्रो विशे
षेनात्मघातकः ॥ दहेत्तं ब्राह्मणं विप्रो लोकाग्नौ मंत्रवर्जितं ॥ दग्धास्थीनि पुनर्गृह्य क्षी
रेणक्षालयेत्ततः ॥ स्वेनाग्निना स्वमंत्रेण पृथगेतत्पुनर्दहेत ॥ संवत्सरार्वाक्पापिनत्यापात्म २८
मारेणाद्दुत्पणाधिकं प्रायश्चित्तं विधाय नारायणवलिं च कृत्वा और्ध्वदेहिकं कार्यं आत्म
घातिनस्त्वेन संवत्सरानंतरमौर्ध्वदेहिकादिलोपप्रसंगात्तेन त्र नारायणवलिं कृत्वा तथा
च स्मृत्यां याज्ञवल्क्यछागलेयौ ॥ नारायणबलिः कार्यो लोकगर्हाभयान्नरैः ॥ तथा तेषां भ
वेच्छौचं नान्यथेत्यब्रवीद्यमः ॥ नारायणवलौ कृते और्ध्वदेहिककरणे शुद्धिर्भवतीत्यर्थः ॥
सर्पहतेतु विशेषः ॥ संवत्सरे यावत्पंचमां नागपूजां विधाय तदनंतरं नारायणवलिं कृत्वा
सौवर्णं नागं प्रत्यग्रां गां च व्यासोद्दिष्टेन ब्राह्मणाय दत्वौर्ध्वदेहिकं कुर्यात ॥ नारायणवलिस्तु

सं॰
पा॰
२२१

थनारीणांसर्ववर्णेषुसर्वदा अशौचंस्यात्ग्रहं तेषांवज्रानलहतेषुच वाराणस्यांस्वयंयस्तुप्रत्या।
ख्यातभिषक्क्रियः प्रणवंतारकंब्रह्मेनान्यथाकस्यचित्क्वचित् विवेन्द्रियविमुक्तस्यास्वव्यापार
दामस्यच प्रायश्चित्तमनुज्ञातमग्निपातोमहापथः
धर्मार्जनासमर्थस्यकर्तुःपापांकितस्यच प्रायश्चि
त्तमनुज्ञातंतीर्थेप्राणविमोचनं धर्मार्जनासमर्थे
स्यद्वादशवार्षिकादिरूपप्रायश्चित्तासमर्थस्य एवं
शास्त्राविहितमार्गेणामृतानांचचण्डालादिहता
नांचसंवत्सरादूर्ध्वमौर्ध्वदैहिकार्यं तथाषट्त्रिं
शन्मते गोत्रा

१२७

द्विपूर्वं प्रेत्यैकाग्न्यादिकरणे अवृद्धिपूर्वके तु संवर्त्तः एषामन्यतमं प्रेतं यो वहेत दहेत वा करो
दकं क्रियां कृत्वा कृच्छ्रं सांतपनं चरेत् यस्त्वहमेनादिभिः मांसं भेद्याहारस्त्रिषवणं च त
पापकरणाद्यादिभोजनादिकं चाभिहितं तद्यमाख्यविषयदेशकालाद्यनुसारेण योजनीयम्
यस्तु वृद्धादिलुप्तमभिषक्क्रियस्तस्यात्महननमप्यनुज्ञातं आदिपुराणादिषु वृद्धः शौचस्म
तेर्लुप्तः प्रत्याख्यातभिषक्क्रियः आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः तस्य त्रिरा
त्रमशौचं स्मृतेर्लुप्तः प्रत्याख्यातद्वितीयेऽह्न्यस्थिसंचयः तृतीये तूदकं दत्वा चतुर्थे श्राद्धमाद
रात् प्रयागवटशाखायां देहत्यागं करोति वा स्वयं देहविनाशस्य काले प्राप्ते महामतिः उत्त
मान्प्राप्नुयाल्लोकान्नात्मघाती भवेत्क्वचित् एतेषामधिकारस्तु सर्वेषां सर्वजंतुषु नराणाम

स॰पा॰
९२

हेतिकस्मैकामाहुतिमग्नौजुहुयुः पितृयज्ञार्थमपिवैश्वदेवबलिहरणशिष्टादन्नात्प्राचीनावीतिनादक्षिणतोग्नेः
पितृतीर्थेनपितृभ्यःस्वधास्त्वितिबलिंहरेयन्भूतयज्ञार्थेवैश्वदेवशिष्टादन्नाद्देवान्नरतोदेवतीर्थेनबलिमुपहरे
युर्भूतेभ्योनमइति मनुष्ययज्ञार्थमतिथिंभोजयेयुः अतिथ्यभावेसंकल्पितंदद्युरिति एवंविधान्यन्यान्य
पिविरुद्धवचनानिग्रंथगौरवभयान्नलिखितानि तत्रचसर्वत्रयथाशाखंयथाव्यवस्थाइतिपंचयज्ञःस्वरूप
निर्णयः अथनित्यश्राद्धं मनुना दद्यादहरहःश्राद्धमितिनित्यश्राद्धंविधायवैश्वदेवमसिद्धंगृह्योग्नौवि
धिपूर्वकमित्यादिनापश्चाद्वैश्वदेवविधानात्प्रथमंनित्यश्राद्धंपश्चाद्वैश्वदेवइतिकेचित् अत्रापिपक्षेएषां
तुनित्यश्राद्धमेवपंचयज्ञांतःपातित्वेनतेषांस्वशाखानुसारेणक्रमः केचनवैश्वदेवानंतरंकुर्वंति पाठक्र
मप्राबल्यात्नित्यश्राद्धविषयेमार्कंडेयपुराणे कुर्यादहरहःश्राद्धमन्नाद्येनोदकेनवा पितॄनुद्दिश्यविप्रांस्तुभो
जयेद्विप्रमेवचेति अत्रविशेषमाह॰ प्रचेताः नामंत्रणंनहोमश्चनावाहनविसर्जने नपिंडदानंनस्वा
त्रित्यकुर्याद्द्विजोत्तमः उपवेशनासनंदत्वासंस्पृश्यकुसुमादिभिः निर्दिष्टंभोजयित्वातुकिंचिद्दत्वाविसर्जे ९२

स्वधास्त्वितिपोबलिर्दीयतेसपितृयज्ञइत्यर्थः तथाचबह्वृचंगृह्येदेवपितृमनुष्यभूतब्रह्मयज्ञाः अथश्चत्वार
एववैश्वदेवंबलिकर्मचेत्याहुः अथवाप्ययागीतिबौधायनोपि अग्नयेस्वाहेत्यादिषडाहुतीर्जुहोतिएषवैश्व
देवः संतिष्ठतेधर्मायस्वाहेत्यादिनमोरुद्रायपशुपतयइत्यादिभिर्बलिहरणंबलावाहरत्येनंतस्मात्तिष्ठते देवेभ्यः
स्वाहेत्यग्नौजुहोत्येषदेवयज्ञः संतिष्ठते पितृनुद्दिश्यैकंब्राह्मणंभोजयेदपिवादक्षिणाग्रान्दर्भानास्तीर्य
तेषुपिंडंददातिपितृभ्यःस्वधास्त्वित्यपिवाएषपितृयज्ञःसंतिष्ठते उत्तरेणाग्निंशुचौदेशेप्रागग्रान्द
र्भानास्तीर्यगंधपुष्पधूपदीपैरलंकृत्यबलिमुपहरति भूतेभ्योनमइतिभूतेभ्यस्तद्भूतयज्ञः संतिष्ठतेम
नुष्ययज्ञार्थमतिथिंभोजयेदपिवाहंतकारंब्राह्मणेभ्योददातिमनुष्येभ्योहंतेति हंतकारंब्राह्मणेभ्योदद
तिमनुष्येभ्योहंतेति हंतकारंयथामात्रदादानासमर्थस्यकार्ष्णाजिनिः भिक्षांवापुष्कलमग्रमितिपर्या
यो भिक्षादद्विणांचमनुनाभिहितं ग्रासमात्रंभवेद्भिक्षाचाग्रंग्रासचतुष्टयम् अग्रंचतुर्गुणीकृत्यहंतका
रोभिधीयतेइति आपस्तंबपरिशिष्टेपिवैश्वदेवबलिहरणानंतरमग्रंदत्वादेवयज्ञार्थमुद्धृतान्नाद्देवेभ्यःस्वा

म-पा०
८१

तवं अथनित्यश्राद्धंपंचमहायज्ञानांस्वरूपाणि तत्रयमः पंचसूनागृहस्थस्यवर्त्ततेहरहः सदा खण्डनीपेषणी
चुल्लीजलकुम्भउपस्करः एतानिवाहनविप्रोवध्यतेवैमुहुर्मुहुः एतेषांपावनार्थायपंचयज्ञाःप्रकीर्त्तिताः
सूनाहिंसास्थानं खण्डनीमुसलादि पोषणीदृषदादि चुल्लीपाकस्थानंजलकुम्भंउदकदानं उपस्करः
भृङ्गादिवध्यते पापेनयुज्यतेइत्यर्थः नचखण्ड्यादिनिमित्तश्रवणेननैमित्तिकंवापेपंचमहायज्ञानां
पंचयज्ञविधानंतुगृहीनित्यंनहापयेदितिपुंस्त्वेननित्यत्वाभिधानात् तेचयज्ञाः कश्यपोक्तायाय
मः ब्रह्मयज्ञोदेवयज्ञःपितृयज्ञस्तथैवच भूतयज्ञोनृयज्ञश्चपंचयज्ञाःप्रकीर्त्तिताः एतल्लक्षणमा
ह० मनुः अध्यापनंब्रह्मयज्ञःपितृयज्ञस्तुतर्पणम् होमोदैवोबलिर्भौतोनृयज्ञोतिथिपूजनम् अध्या
पनमध्ययनंतर्पणंपितृतर्पणंपितृःश्राद्धयामितियावत् यतःसएवाह स्वाध्यायेनर्चयेतर्षींहोमोदैवा
न्यथाविधि पितॄञ्छ्राद्धेननॄनन्नैर्भूतानिबलिकर्मभिरिति पितृयज्ञेविकल्पमाह० कात्यायनः श्राद्धंवापि
तृयज्ञःविकल्पमाह० स्यात्पित्र्योबलिरप्यपिचेतिनित्यश्राद्धंवापितृयज्ञः अथैवावैश्वदेवमध्येपितृभ्यः ८१

जातपुष्पाणां दानं देवे विवर्जयेत् ककराख्यस्य पुष्पाणि तथा दा[illegible]य हंसि च कुरंटजं चार्कं न च देयं जनार्द
ने ककरः करीरः करीरः करीरः शाल्मलीच शिरीषंच बृहती गिरिमल्लिका सर्जकं चैव कूष्माण्डकां च
नारंगं च वर्जयेत् अथ शिवे वर्ज्यानि प्रासाददीपिकायां जपाबंधूकसिंधूरं तथा त्रैसिंधिके शुभे दमंतीकेतकी
यूथीमालतीकुटटानि च कुसुम्भं चाम्रसारं च प्रमादेनापि नार्पयेत् बदरीसर्जपत्री च तथा च कुमुदद्वयं
अतिपक्वान्यपक्वानि पतितानि विवर्जयेत् आघ्राणान्यपगंधीनि मकोटं चोग्रगंधिमत् अशुद्धपात्रपा
णपङ्कवासोभिः कुत्सितात्मभिः आनीतं नार्पयेच्छम्भोः प्रमादादपि दोषकृत् देवीपुराणे शिवे विवर्जयेत्कुन्द
गुल्मं तं च हरेस्सदा देवी चैवार्कमंदारावादित्येन गरं तथा विष्णुरहस्ये न शुष्कैः पूजयेद्विष्णुं कुसुमैर्न महीग
तैः न विशीर्णदलैः शुक्लैः नैवाशुभविकाशितैः आशुभविकाशितैर्वर्णैः लाठिकासितैः तथा जलपर्यु
षितं त्याज्यं पत्राणि कुसुमानि च तुलस्यगस्तिविल्वानि गांगं वारि न दुष्यति स्नानं कृत्वा तु यः कश्चित्
पुष्पं चिन्वति वै द्विजः देवतास्तं न गृह्णन्ति भस्मीभवति दारुवत् एतत्समध्याह्नस्नानानंतरं वेदितव्यः

स्व२

म॰पा॰ ८०

नेहरेः पल्लवान्यपितेषांतुप्राप्तान्यर्चो विधौहरेः व्रीहधानामभावेनबर्हिषाचार्चयेद्धरिम् अपराधसहस्राणि
अपराधशतानिच पद्मेनैकेनदेवेशमभ्यर्च्यकमलापतिम् वर्षायुतसहस्रस्यपापस्यकुरुतेक्षयं अगस्तिद्रु
मसंभूतैःकुसुमैरसितैःसितैः येर्चयंतिचदेवेशंतैःप्राप्तंपरमंपदम् सुवर्णकेतकीपत्रंयोददातिज
नार्दने कोटिजन्मार्जितंपापंदहतेगरुडध्वजः सकृत्कदम्बपुष्पाणिहेलयाहरिरर्चितः सप्तजन्मानिदेवर्षेन
स्यलक्ष्मीनहरगाः कुंभीपुष्पंतुदेवर्षेयःप्रयच्छतिकेशवे सुवर्णपलपात्रंतुपुष्पेपुष्पेभवेत्मुने गरुडपुराणे
धात्रीफलेनयत्पुण्यंजयंत्यासमुपोषणे खगेन्द्रयल्लभेन्मर्त्यस्तुलसीपूजनेनतत् यथाकथंचिद्दाहन्यकुसुमैः
पूजयेद्धरिम् नाकपृष्ठमवाप्नोतिनात्रकार्याविचारणात् स्कंदपुराणे विष्णुमूर्द्धिस्थितंपुष्पंशिरसायोवहे
न्नरः अपर्युषितपापःस्याद्यावद्युगचतुष्टयम् पुष्पाभावेतुपत्राणिदेयानिचसुरार्चने पत्राभावेपयो
देयंतेनपुण्यमवाप्नुते वर्ज्यानिचविष्णुधर्मेभिहितानि उग्रगंधीन्यगंधानिकुसुमानिनदापयेत् अन्या
यतनजातानिकारटकीनितथैवच रक्तान्यकालजातानि [illegible] चैत्यवृक्षोद्भवानिच श्मशान १८

चविसर्जयेत् स्नानेवस्त्रेचनैवेद्येदद्यादाचमनीयकमिति एवमितरेषामपिब्रह्मादीनांपूजनंकार्यं तत्तत्प्रकाशकैः
वैदिकैर्मंत्रैः तदप्राप्तौतत्तन्नामधेयमंत्रैर्नमोंतैः पूजयेत् अथवावेदाविरुद्धस्वस्वदीक्षानुसारेणवादेवतार्च
नेन पूजयेत् इतिदेवार्चनम् अथपूजापुष्पाणि तत्रनारसिंहपुराणे पुष्पैरन्यसमुद्भूतैः पत्रैर्वागिरिसंभवैः अ
पर्युषितैर्निःछिद्रैः प्रोक्षितैर्जंतुवर्जितैः आत्मारामोद्भवैर्वापि पुष्पैःसंपूजयेद्धरिम् हरिमित्युपलक्षणम्
शमीपुष्पंबिल्वपत्रंचंपकंतगरंतथा करवीरंतथाश्वेतपालाशंकुशपुष्पकम् वनमालाप्यशोकंच
सेवंतीकुब्जमालती त्रिसंध्यंचतथाश्वेतंकुन्दंचपाटलपत्रिकम् मल्लिकाचैवजातीचसर्वपुष्पाद्विशिष्यते
जातीपुष्पसहस्रेणयच्छेन्मालांतुशोभनम् विष्णवेविधिवद्भक्त्यातस्यपुण्यफलंशृणु कल्पकोटिसहस्रा
णिकल्पकोटिशतानिच वसेद्विष्णुपुरेश्रीमान्विष्णुतुल्यपराक्रमः पत्राण्यपि अपामार्गंभृंगराजंशमी
पत्रंचखादिरम् [illegible]कुशपत्रंचरुमनंमरुवकंतथा ततःश्रेष्ठंबिल्वपत्रंततस्तुतुलसीवरा एतेषांचय
थालाभंपत्रैर्यश्चार्चयेद्धरिम् सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते येषांनसंतिपुष्पाणिप्रशस्तान्यपिच

म॰पा॰
८९

योगयाज्ञवल्क्यः देवानामर्चनं कुर्याद्ब्रह्मादीनामतन्द्रितः विष्णुर्ब्रह्मा च रुद्रश्च विष्णुर्देवो दिवाकरः तस्मात्
पूज्यतमो नान्य[illegible]महमन्ये जनार्दनात् दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव च अर्चितं स्याज्जगदि
दं तेन सर्वं चराचरम् अप्सु ग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृ
तं आनुष्टुभस्य सूक्तस्य त्रिष्टुब्वं तस्य देवता पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः प्रथमां विन्य
सेद्वामे द्वितीयां दक्षिणे करे तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत् पंचमीं वामजानौ च षष्ठीं वै
दक्षिणे न्यसेत् ^ नवमीं नाभिमध्ये च दशमीं हृदये तथा एकादशीं कण्ठदेशे वामबाहौ ततः परम्
त्रयोदशीं दक्षिणे तु आस्यदेशे चतुर्दशीम् अक्ष्णोः पंचदशीं चैव षोडशीं मूर्ध्नि विन्यसेत् एवं न्यासवि
धिं कृत्वा पश्चाद्यागं समारभेत् आद्ययावाहयेद्देवमृचा तु पुरुषोत्तमम् द्वितीययासनं दद्यात्पाद्यं चैव तृ
तीयया अर्घ्यश्चतुर्थ्या दातव्यः पंचम्याचमनीयकं ^ पुष्पं दशम्या दातव्यमेकादश्या तु धूपकम् द्वादश्या
दीपकं दद्यात् त्रयोदश्या निवेदनम् चतुर्दश्या नमस्कारं पंचदश्या प्रदक्षिणम् अर्चयित्वा तु देवेशं षोडश्या

सप्तमीं वामकुक्षौ च त्वष्टमीं दक्षिणे न्यसेत् ५

षष्ठ्या स्नानं प्रदातव्यं सप्तम्या वस्त्रमेव च यज्ञोप
वीतमष्टम्या नवम्या तु विलेपनम् २

८९

त्वागृहंव्रजेत् तथानृसिंहपुराणे ततोर्घ्यंभानवेदद्यात्तिलपुष्पजलान्वितम् उत्थाप्यमूर्धपर्यंतंहंसःशुचि
षदृचंस्मरन् जलदेवान्नमस्कृत्यततोगच्छेद्गृहंबुधः पौरुषेणतुसूक्तेनततोविष्णुंसमर्चयेत् हारीतः ऊर्ध्वंतु
देवतापूजांजपयज्ञादनंतरम् जपयज्ञःब्रह्मयज्ञः मरीचिः विधायदेवतापूजांप्रातर्होमादनंतरम् अत्रपूर्वा
ह्णोदेवतार्चनेमुख्यःकालः पूर्वाह्णएवकुर्वीतदेवतानांचपूजनमितिएवकारस्मरणात् मध्याह्निकानंतर
कालोपिमुख्यसदृशः तथाचकूर्मपुराणे पौरुषेणतुसूक्तेनततोविष्णुंसमर्चयेत् वैश्वदेवंततःकुर्या
द्बलिकर्मतथैवचेति तथाऊर्ध्वंतुदेवतापूजांजपयज्ञादनंतरमिति ब्रह्मयज्ञानंतरंकालस्याप्युपादाना
त् यदाप्रातरेवब्रह्मयज्ञंहोमानंतरंकरोतितदापूर्वाह्णएव अथतर्पणात्पूर्वकालेकरोति तदातर्प
णानंतरमेव जलदेवतानमस्कारानंतरंगृहंगत्वाविष्णुपूजायानृसिंहपुराणोविधानात् पूजयेद्दे
वतानिगमदर्शिनाः ब्राह्मणंविष्णुमीशंचसूर्यमग्निंगणाधिपं दुर्गांसरस्वतींलक्ष्मींगौरींचानित्यमर्च
येत् पद्मपुराणे आदित्यंगणनाथंचदेवींरुद्रंयथाक्रमम् नारायणंविशुद्धाख्यमंतेचकुलदेवताः

नामयइति अथयमतर्पणं तत्रस्कन्दपुराणे कृष्णपक्षचतुर्दश्यामंगारकदिनेयदा तदास्नात्वाशुभेतोयतर्पयेद्य
मनामभिः वृद्धमनुः यांकांचित्सरितंप्राप्यकृष्णपक्षेचतुर्दशीम् यमुनांचविशेषेणनियतोनियतेन्द्रियः यमा
यधर्मराजायमृत्यवेचांतकायच वैवस्वतायकालायसर्वप्राणहरायच औडुम्बरायदध्नायनीलायपरमेष्ठिने
वृकोदरायचित्रायचित्रगुप्तायवैनमः इतितर्पयेदितिशेषः यमायनमः यमंतर्पयामीतिप्रयोगः ग्रंथ्वासे
पितृपक्षत्रयोदश्यांचतुर्दश्यांच यमायधर्मराजायमृत्यवेचांतकायच वैवस्वतायकालायसर्वभूतक्षयाय।
चेत्येभिश्चप्रतिनमस्कारमंत्रैः सप्तोदकांजलीन्दद्यात्सर्वपापैःप्रमुच्यतइति वृद्धमनुः एकैकस्यतिलैर्मि
श्रांस्त्रीन्दद्याज्जलांजलीन् तथादीपोत्सवचतुर्दश्यांकार्यंचयमतर्पणं अपरोपिविशेषः स्कंदपुराणे
दक्षिणाभिमुखोर्भूत्वातिलैःसव्यंसमाहितैः देवतीर्थेनदेवत्वात्तिलैःप्रीताधिपोयतइति इतियमतर्पणं
अथदेवतार्चनम् एवंतर्पणानंतरंसूर्यायार्घ्यंनिवेद्यजलदेवान्नमस्कृत्याचम्याभ्युस्यगृहंगत्वाविस्वा।
दिग्दृजांकुर्यात् योगीयाज्ञवल्क्यः ततःसूर्यमुपस्थायसम्यगाचम्यचस्वयम् अभ्युक्ष्यासमादायसंयमा ८८

माचरेत् उक्तं तिलतर्पणस्यकाविदयवादोमरीचिनोक्तः सप्तम्यां रविवारे च गृहे जन्मदिने तथा भृत्यपुत्रक-
कलत्रार्थी न कुर्यात्तिलतर्पणम् तथा पक्षयोरुभयो राजन्सप्तम्यां निशि संध्ययोः विद्यापुत्रकलत्रार्थी
तिलांपंचसु वर्जयेत् भानौ भौमे त्रयोदश्यां नंदाभृगुमघासु च पिंडदानं मृदास्नानं न कुर्यात्तिलतर्पणं
सूर्यथसारे विवाहे चोपनयने चौले संति यथाक्रमम् ग्र्वषमर्धं तदर्धं च नेत्यके तिलतर्पणम् तिथिती-
र्थविशेषेषु कार्यं प्रेते च सर्वथा पिंडान्सपिंडानोदकः प्रेतपिंडविनात् अत्र विवाहादौ पितृपक्षे च यत्र
तैच गयायां पादपुरेवते गयासाम्यमतोहसके विहाङः पुराणगः तथा तीर्थे तिथिविशेषे च गंगायां प्रे-
तपक्षके निषिद्धेपिदिने कुर्यात्तर्पणं तिलतर्पणं विष्णुपुराणे आब्रह्मस्तम्भपर्यंतं जगत्तृप्यत्विति
ब्रुवन् क्षिपेद्यो जलं लीस्त्रीस्तु कुर्वंस्तेपतर्पणमिति निष्पीडयतियः पूर्वं स्नानवस्त्रमतर्पितः निराशाः
पितरो यांति शापं दत्वा सुदारुणम् पराशरः द्वादश्यां पंचदश्यां च संक्रांतौ श्राद्धवासरे वस्त्रं निष्पीडयेत्
नैव न च क्षारेण वर्जयेत्॥ शंखः एवं यः सर्वभूतानि तर्पयेदन्वहं द्विजः सगच्छेत्परमं स्थानं तेजो मूर्तिममा-

म.पा.
८७

शब्दोपिक्षत्रादिद्विजातीनामुपलक्षणार्थः यद्यप्यसवर्णामापत्नमातृभ्रात्रादयोप्यसवर्णाः तथापितत्तर्प
णंकार्यम् समंतुनातेषांमात्रादिसमत्वप्रतिपादनात् पितृपत्न्यः सर्वामातरस्तद्भ्रातरोमातुलः तद्दु
हितरस्त्रभगिन्यस्तदपत्यानिभागिनेयानीति यत्रचसमत्वापादनंतत्रमुख्यापेक्षाकिंचिन्न्यूनताभव
तीति नात्रतत्प्राधान्यमपितुस्वसंनिहितसवर्णातर्पणानंतरमेवतर्पणमितिविवेकः ननुसमंतुव
चनेपिसवर्णानामेवमात्रादिसाम्यंभवतुसानामभूदसवार्यतामितिचेत् नतथासतिपितृपत्न्यः स
र्वामातरइतिनब्रूयात् उपात्तस्यसर्वशब्दोननुपितृपत्न्यइति अतः सर्वशब्दोननुपितृपत्न्यइति अ
तः सर्वशब्दासंकोचायप्रोक्तएवयुक्तः पक्षः एतेनभीष्मतर्पणमपिव्याख्यातम्यत्निषिद्धमित्युक्तंभव
तिजीवत्पितृकंप्रति योगयाज्ञवल्क्यः कव्यवाडनलः सोमोयमश्चैवार्यमातथा अग्निष्वात्ताःसोम
पाश्चतथाबर्हिषदोपिच यदिस्याज्जीवत्पितृकस्तान्विद्यात्सपितृन् येभ्योवापिपिताद्द्यात्तेभ्योवा
पिप्रदापयेत् एतांश्चैवप्रमीतांश्चप्रमीतपितृकोद्विजइति तथानजीवत्पितृकः कृष्णैस्तिलैस्तर्पण ८७

ऐतेमाः इन्द्रोधाताभगःपू[illegible]मित्रोथवरुणोयमः अंशुर्विवस्वांस्त्वष्टाचसविताविष्णुरेवच ए
तेवैद्वादशादित्यादेवानांप्रवराःमताः अत्रवस्वादितर्पणंपृथक् रुद्रपित्रादितर्पणंचपृथग्गुपात्तमि
ति सदृश्यंपितरंतर्पयामीत्येवंतर्पणंनविधेयं अत्रपितृनामगोत्रो[illegible]चारणमेव आदित्यवसुरुद्र
दिस्वरूपत्वेनापि अनेनैवाभिप्रायेणस्मृत्यर्थसारे वसुरुद्रादित्यरूपांश्चाद्धार्थेनतर्पयेत्पितृन् ना
मगोत्रैस्समुच्चार्यतिलैस्तीर्थेषुसंयतइति अथवाश्राद्धशब्दोगौणपाठश्चात्तर्पणोप्येवमेतेइतिव
स्वादिनामसहितानामेवपित्रादीनांतर्पणंतुयतः शिष्टाचारएवमेवप्रायशोदृश्यते उदकग्रह
णविशेषमाह योगयाज्ञवल्क्यः दक्षिणेपितृतीर्थेनजलंसिंचेद्यथाविधिः दक्षिणेनैवगृह्णी
यात्पितृतीर्थेनसंयतः गोत्रनामस्वधाकारैस्तर्पयेदनुपूर्वशइति अनुपूर्वशः पित्रादिक्रमेण
अत्रयद्यप्यसवर्णाम्बार[illegible]ण्यविशेषोपादानंकृतंतथापिउत्तमवर्णोद्देशेनकृतेनदोषः यतस्तद्ध
णानापतितत्वेनाभि[illegible]स्तितेष हीनस्योत्कृष्टत्वंनइष्टं उत्कृष्टस्यहीनत्वंदुष्टमेव सवर्णा

म॰पा॰ ५
८५

नुगान्नागान्सागरान्पर्वतानपि सरित्तोयमनुष्यांश्चयक्षान्रक्षांसि चैवहि पिशाचान्सुपर्णांश्चभूतान्य
थपशूंस्तथा वनस्पतीनोषधींश्चभूतग्रामंचतुर्विधं विष्णुसमुच्चये ततःकृत्वानिवीतंतुयज्ञसूत्रमते
द्रितः प्राजापत्येनतीर्थेनमनुष्यांस्तर्पयेत्पृथक् कार्ष्णाजिनिः सनकश्चसनंदश्चतृतीयश्चसनात
नः कपिलश्चासुरिश्चैववोढुःपंचशिखस्तथा एतेब्रह्मसुताःसप्तमनुष्याःपरिकीर्तिताः ततःप्राचा
वीतेनमण्डलऋषीन्प्राजापत्यादिकान् ऋषींश्चतर्पयित्वापितृतर्पणमारभेत तत्रयोगायास्तव
ल्कः अपसव्यंततःकृत्वाभूत्वाचपितृदिङ्मुखइति तथासव्येतराभ्यांपाणिभ्यामितिपैठीनसिः
अपसव्यंततःकृत्वाभूत्वाचपितृदिङ्मुखः पितृन्दिव्यानदिव्यांश्चपितृतीर्थेनतर्पयेत् दिव्यावस्वार
यः आदित्यास्तपितरादयः तेचदिव्यास्तथैवदर्शिताः धरोध्रुवश्चसोमश्चआपश्चैवानिलोनलः प्र
त्यूषश्चप्रभासश्चवसवोष्टौप्रकीर्तिताः अजैकपादहिर्बुध्न्योविरूपाक्षोथरैवतः हरश्चबहुरूपश्च
त्र्यम्बकश्चसुरेश्वरः सावित्रीजयंतश्चपिनाकीचापराजितः एतेरुद्राःसमाख्याताएकादशाह

श्रमनुनाभिहितम् राजतैर्भोजनैरेवमथवा राजतान्वितैः वार्यपि श्रद्धयादन्नमद्यपायोपकल्पनइति यत
इपि श्राद्धप्रकरणपरिपठितत्वादर्घ्यदानविषयमेव अतश्च तर्पणे खड्गाभिमुद्रिकाभिर्युक्तो हस्तः कार्यः
तथा च योगयाज्ञवल्क्यः अनामिकाधृतं हेम तर्जन्यां रूप्यमेव च कनिष्ठिकाधृतं खड्गं तेन पूतो भवेन्नरः
इति यच्च शंखेन तर्पणप्रकरण एवाभिहितं सौवर्णेन पात्रेण राजतेनौदुम्बरेण खड्गपात्रेणान्यपात्रेण
वोदकं पितृतीर्थेस्पृष्टं दद्यादिति तदपि तर्पणप्रकरणादुत्कृष्य श्राद्धप्रकरणे योज्यं अंजलिवाक्यापेक्ष
या प्रकरणस्य दुर्बलत्वात् अथवा वाक्यप्रकरणाभ्यां शिष्टाचाराणामविरोधाय यस्मिन्पात्रे धृते अंजलिः प्र
श्लिष्टो न भवेत्तादृक्पात्रविशिष्टेनांजलिना पितृतीर्थस्पृष्टोदकं तर्पणेपि दद्यात् लिखितः प्राङ्मुखो
यज्ञोपवीती प्रागग्रैः कुशैर्दैवं तर्पणं देवतीर्थेन कुर्यात् देवश्च योगयाज्ञवल्क्येनोक्तः ब्रह्माणं तर्पयेत्
पूर्वं विष्णुं रुद्रं प्रजापतिम् देवांश्छन्दांसि वेदांश्च ऋषींश्चैव तपोधनान् आचार्यांश्चैव गंधर्वानाचार्येत
नयांस्तथा संवत्सरं सावयवं देवीश्चाप्सरसस्तथा आचार्यान्व्यासादीन् अवयवा मासादयः तथा देवा

म. यथाहिपेन गोशृंगस्यानियतप्रमाणत्वाद्विवक्षितेप्रमाणमाह दक्षः प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्-
पा० ८५ मुखः स्मरन् उदङ्मनुष्यांस्तर्पयन्पितॄन्दक्षिणास्यस्तथा तथा अग्रैस्तु तर्पयेद्देवान्मनुष्यान्कुशमध्यतः
पितॄंस्तु कुशमूलाग्रैर्विधिः कौशो यथाक्रमं मरीचिः विना रूप्यसुवर्णेन विना ताम्रतिलैस्तथा वि-
नामंत्रैश्च दर्भैश्च पितॄणां नोपतिष्ठत इति नात्र रजतादिसमुच्चयो विवक्षितः अत एव सत्यव्रतः खड्ग-
मौक्तिकहस्तेन कर्तव्यं पितृतर्पणम् मणिकांचनदर्भैर्वा न शुद्धेन कदाचनेति शुद्धेन केवलेन ख-
ड्गादिरहितेनेति यावत् अत्र वाशब्दोपादानान्न समुच्चय इत्यर्थः तथा मरीचियाज्ञवल्क्यावपि ॥
तिलानामप्यलाभे तु सुवर्णरजतान्वितं तदभावे निषिंचेत्तु दर्भैर्मंत्रेण वा पुनरिति अत्र खड्गादिभिरा-
मृन्मयो हस्तः कार्यो न तु खड्गादिपात्रस्वीकरणं तथा च सति एकैकमंजलिं देवा इत्यंजलिविधायवाक्या-
बाधापत्ते एवं तर्हि खड्गादिपात्रप्रशंसापराणां वाक्यानां विध्येकवाक्यता तथा अभावादप्रमाण्यं स्या-
दिति चेन्न मैवं अर्घ्यदाने खड्गपात्रविधायकवाक्यैकवाक्यत्वेन प्रशंसावाक्यानां सार्थकत्वात्प्रमाण्यप ८५

वषट्कंकार्सोजितिना देवतानां पितॄणां च जले दद्याज्जलांजलिं अ संस्कृतप्रमीतानां स्थले दद्याज्ज
ले संकृदिति तत्तु जलस्य तर्पणाभिप्रायेण एवं च यानि स्थलतर्पणनिषेधकानि तानि जलस्थितस्यैतिव
चनानां विरोधः परिहरणीयः विष्णुस्तु स्थलस्थितस्यापि जलतर्पणं क्वचिदनुजानीते यत्राम्भसि
स्थले वा सात्तु दके देवतापितॄन् तर्पयेत्तु यथाकाममप्सु सर्वं प्रतिष्ठितमिति हारीतः आर्द्रवासा ज
ले कुर्यात्तर्पणाचमनं जपं शुष्कवासाः स्थले कुर्यात्तर्पणाचमनं जपं अत्र अमुकस्तृप्यतु तृप्यता
मिति वा अमुकं तर्पयामीति वा प्रयोगो भवति तथा च योगयाज्ञवल्क्यः तृप्यत्विति समुच्चार्य तर्प्य
नामिति वापि वा विधिस्तः अक्षिपेत्तोयं देवादीनामशेषतः बौधायनः अथ दक्षिणतः प्राचीनावी
ती पितॄन् स्वधा नमस्तर्पयामि पितामहानित्यादि स्मृत्यर्थसारेपि ब्रह्मादयो ये देवास्तान् देवांस्तर्पया
मि भूर्देवांस्तर्पयामि भुवर्देवांस्तर्पयामि स्वर्देवांस्तर्पयामि भूर्भुवःस्वःदेवांस्तर्पयामि एवं भूर्ऋषी
न् भूः पितॄनित्यादि यमः हौत्रस्तोमथ्यतः कृत्वा मूर्ध्नि उदकांजलिं गोशृंगमात्रमुद्धृत्य जलमध्ये जले

म॰ पा॰ २८४ स्तुतर्पयेद्देवान्मनुष्यांश्चाप्यवलैस्तिलैः पितृंस्तुतर्पयेत्कृष्णैस्तर्पयेत्सर्वदाद्विजः तिलग्रहणेतु
विशेषमाह॰ मरीचिः मुक्तहस्तेनदातव्यंनमुद्रांतत्रदर्शयेत् वामहस्तेतिलैर्ग्राह्यामुक्तहा
स्तस्तुदक्षिणः प्रदेशिन्यंगुष्ठेनतिलसंयोगोमुद्राअतएवतर्जन्यंगुष्ठेनतिलाग्राह्याः
नत्वोभयंदक्षिणहस्तस्यस्तमेव अतएवमुक्तहस्तेनदातव्यमित्युक्त्वापिमुक्तहस्तस्तुद
क्षिणहस्तइतिपुनरभिहितंमरीचिनाएतत्स्वेषामंजलिनातर्पणेतद्विषयं विषयान्तरेतु
पूर्वमभिहितम् तिलास्थापनंतन्नस्यात्पक्षसारे वामहस्तेतिलोदित्वाजलमध्येतुतर्पये
त् स्थलेशीर्णानलेपात्रेरोममूलेनकुत्रचित् जलतर्पणेरोमरहितप्रदेशेवामबाहौति
लान्संस्थाप्य मुद्रारहितदक्षिणतर्जन्यंगुष्ठयोरन्यतरेणतिलान्गृहीत्वावामहस्ततलेस्था
पयित्वातर्पयेदित्यर्थः वामबाहुतिलसंस्थापनव्यतिरिक्तमन्यज्जलतर्पणेपिस्थानं
एवमुक्तप्रकारेणस्थलेस्थित्वा[illegible]लेपात्रेगर्तेवातर्पणंकुर्यान्नतुजलेइतिसिद्धं यथा

वर्हिषि विधिज्ञैस्तर्पणंकुर्व[illegible]पात्रेकदाचन पतत्यानुद्धृतोदकस्थलतर्पणंकुर्यान्नतुधा
नैव[illegible]श्रयं उद्धृतोदकेनतुसएवपात्रात्तुजलमादायशुभेपात्रांतरेक्षिपेत् जलपूर्णेथवाग
र्तेतुस्थलेतुविवर्हिषि पात्रंचात्रपितामहेनोक्तं हेमरूप्यमयंपात्रंताम्रकांस्यसमुद्भवं पि
तॄणांतर्पणेपात्रंमृन्मयंतुपरित्यजेदिति अत्रयोगयाज्ञवल्क्यः यस्तुमृतेनसिंचेतनतिला
न्मिश्रयेज्जले अन्यथावामहस्तेनतर्पणमाचरेत् अन्यथात्वनुद्धृते अतोन्यथाचे
त्सव्येतुतिलान्हृत्वाविचक्षणइत्यपिपाठः नत्वात्रतोन्यथाचेत्सव्येनापिपाठः एषां
एवविनावामहस्तान्वारब्धेनदक्षिणहस्तेनतर्पणंतेषांवामहस्तेनतिलग्रहणमित्यनु
संधेयं अपरोविशेषस्तत्रैवोक्तः आवाह्यपूर्ववन्मंत्रैरास्तीर्यचकुशान्शुभान् प्रागग्रेषु
सुरान्सर्वान्दक्षिणाग्रेषुवैपितॄन् देववद्देवर्षीणामपि हेमेषुरतो देवान्ब्राह्मऋषी
श्चैवतर्पयेदक्षिणोदकैः पितॄन्मंत्रैस्तिलैःकृष्णैःस्वहस्तकविधानतः गोभिलःसुक्ले

म. शंसंतिनप्रशंसंतिदेवताः उभाभ्यामपिहस्ताभ्यांमुदकंयःप्रयच्छति समूढोनरकंयातिका
पा. ८३ लसूत्रमवाक्शिराइत्यादि योगयाज्ञवल्क्यः व्याघ्रादिवचनानितानितच्छाखाप्रवृत्तयानिवे
षकानितत्तुसर्वसाधारण्येन अतोनकाप्यनुपपत्तिः नन्वन्वारब्धेनसव्येनपाणिनादक्षि
णेनतु देवर्षींस्तर्पयेदिति कूर्मपुराणवचने देवर्षीनिति विशेषणादानादिनराणेकर
तर्पवचनानि विशेषो सामान्यादिविशेषविषयकूर्मपुराणवचनेविषये देवर्षितर्प
णात्प्रविष्टंपावितिचेन्मैवं अन्वारब्धेनसव्येनतेनमगोत्रेणगोत्रशद्दतियोगयाज्ञवल्क्यो
क्तनामगोत्रसहितसव्यहस्तान्वारब्धदक्षिणहस्ततर्पणविधानात् गोत्रोच्चारणंचपितृ
णामेवनदेवानांनापिऋषीणां अतएकहस्ततर्पणम् देवर्षिपितृतर्पणसाधारणमेवं
च… पूर्वोक्तेचव्यवस्थाज्यायसी विवाहादावेकहस्तेनैव तथाचकात्यायनः वि
वाहे श्राद्धकाले चपाणिना… दीयतइति हारीतः वसित्वावसनंशुष्कंस्थलेविस्तीर्ण ८३

ब्रह्मयज्ञविधिः अथतर्पणं बृहस्पतिः ब्रह्मयज्ञप्रसिद्ध्यर्थं वि[illegible]चाध्यात्मिकींजपेत्
जप्त्वायथाशक्तिवैचापिततस्तर्पणमाचरेत् [illegible]णानात्मपः तर्पणंतुशुचिःकुर्यात्प्रत्यहंस्नातकोद्विजः
देवेभ्यश्चऋषिभिश्चपितृभ्यश्चयथाक्रमात् अत्रांजलिनियममाहव्यासः एकैकमंजलिं
देवाद्वौद्वौतुसनकादयः अर्हन्तिपितरःस्त्रीन्स्त्रीन्स्त्रियस्त्वेकैकमंजलिम् विष्णुपुराणे त्रि
रपः प्रीणनार्थायदेवनामपवर्जयेत् ऋषीणांतुयथान्यायंसकृच्चापिप्रजापतेः यथा
न्यायमित्यनेनदेवानामिवत्रिरित्यर्थोगम्यते चशब्दोवाशब्दार्थो अपिशब्दादंजलिद्वयंलभ्य
ते अत्रांजलिसंख्यायांस्वगृह्यानुसारेणव्यवस्था येषांस्वशाखायांन[illegible]यांनकोपिविशेष
आम्नातस्तेषांविकल्पः योगयाज्ञवल्क्यः अन्वारब्धेनसव्येननाम्नागोत्रेणचाप्यथ कूर्म
पुराणे अन्वारब्धेनसव्येनपाणिनादक्षिणेनतु देवर्षींस्तर्पयेद्धीमानुदकांजलिभिःपि
तॄन् अत्रापिपूर्ववद्व्यवस्थाएवंच एकहस्तेननतोयेननकुर्यात्पितृतर्पणम् पितरोनश्र

म. नृयज्ञोभूतयज्ञोमनुष्ययज्ञोब्रह्मयज्ञइति कूर्मपुराणे यदिस्नानतर्पणात्प्रागेवब्रह्मयज्ञःकृतोन
पा. ८२ हि कृतामनुष्ययज्ञंवा ततःस्वाध्यायमारभेत् यदिदैवादिनिमित्तेनोक्तकालेब्रह्मयज्ञोना
न३ कृतस्तदामंत्रसापठेत् तथाचश्रुतिःग्रामेमनसास्वाध्यायमधीयेतदिवानक्तंचेति मनुः
नैत्यकेनास्त्यनध्यायोब्रह्मसत्रंहितत्स्मृतम् ब्रह्माहुतिहुतंपुण्यमनध्यायवषट्कृतम्
तथा वेदोपकरणेचैवस्वाध्यायेचैवनैत्यके नानुरोधोस्त्यनध्यायेहोममंत्रेषुचैवहि वेदो ८५
पकरणंवेदांगं अत्रविशेषोगौतमेनोक्तः अथयदिवातोवायेत्स्तनयेद्वाविद्युत्स्फुरेद्वा अ
वस्फूर्जेद्वाएकांऋचमेवयजुरेकंसामाभिव्याहरेद्भूर्भुवःस्वःसत्यंतपःश्रद्धायांजुहोमीति
वातोवायादित्याद्यनध्यायोपलक्षणं अतोनध्यायेप्येकर्चादिकमेवपठेन्नाधिकमिति
गम्यते तथा आदावेवकृतेपूर्वंपुरस्तान्नविरम्यते ऊर्ध्वमनुस्मरन् क्षिप्त्वातथाचमनसा ९२
जपेत् इतिविद्यानतपोयाति[illegible]र्यौशौडिनः ब्रह्मयज्ञार्चितोदेवः प्रीयतांमेजनार्दनः इति

निर्विघ्न१

वत्पठितं मन्यते तावदधीतं नमो ब्रह्मणे नमो अस्त्वग्नय इत्येतया परिदधाति परिधाने त्रिः
पठतं योगयाज्ञवल्क्यः आदारवारभ्य वेदं तु त्वन्वोपर्युपरिक्रमात् यदधीतन्त्वहं शक्त्या स
स्वाध्याय इति स्मृतः ब्रह्मयज्ञः प्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत् जप्याच प्रणवं वापि तनं
तर्पणमाचरेत् मनुः अपां समीपे नियतो नैत्यकं विधिमास्थितः सावित्रीमप्यधीयेत गा
त्वारण्ये समाहितः अरण्यं गत्वेति यथा न क[illegible] दृश्यते तथारण्यं गत्वेत्यर्थः तथा च श्रुतिः
ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामादच्छदिर्दर्श उदीच्यां प्रागुदीच्यां वोदित आदित्य इति
उदित आदित्य इत्युदयोत्तरकालः सकलोपि दिवसस्तेन प्रातःकाल एव अत एव बृहस्पतिः
स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः वैश्वदेवावसाने वा नान्यदंते निमित्तत इति सः
ब्रह्मयज्ञ इत्यर्थः वैश्वदेवावसान इति मनुष्ययज्ञानंतरं मनुष्ययज्ञश्च सनकाद्युद्देशेन हंतका
रो यो दीयते स एव नातिपितृपूजा श्रुतिरपि मनुष्ययज्ञानंतरं ब्रह्मयज्ञं दर्शयति देवयज्ञः पि

जनाममात्रधारी न पूर्वोक्तगुणैर्जनवत्त्वमाधास्यः सवर्णात्कन्यायामुत्पन्नः कानीनः स मातामहस्य सुतः य
दि साप्यविवाहिता पितृगृहे एव तिष्ठति यदि चेद्विवाहिता तदा सुतो वोढुरेव तथाच मनुः पितृवेश्मनि क
न्या तु यं पुत्रं जनयेद्रहः तं कानीनं वदेन्नाम वोढुः कन्यासमुद्भवम् अत्र वोढुरिति पदान्नाद्विवाहिता
चेत्तदा वोढुरेव नो चेन्मातामहस्येत्येतेनावगम्यते रत्नाग्रचन्द्रिका चेति द्वितीयः पुनर्भूः तस्यां सवर्णादुत्पन्नः
पौनर्भवः दत्तकोपि सवर्ण एव तथाह मनुः माता पिता वा दद्यातां यमद्भिः पुत्रमापदि सदृशं प्रीतिसं
युक्तं स ज्ञेयो दत्रिमः सुतः सदृशं सवर्णं भर्तरि प्रोषिते मृते वा आपदि केवलं मातुरधिकारो दाने न
प्यामानतरेन तस्यामुन्मादादिदोषयुक्तायां आपदि केवलापि तु अधिकारः अन्यथोभयोरपि सहैव आपदी
ति आपत्त्वोपादानादनापदि न देयमिति तदस्यते अनापदि दत्ते दातुर्दोषो न प्रतिग्रहीतुः एकपुत्रो न
देयो नापि प्रतिग्राह्य इत्याह वसिष्ठः न त्वेवैकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वेति तथा ज्येष्ठोपि न देयः पुत्रप्रतिग्रह
प्रकारं चाह वसिष्ठः पुत्रं प्रतिग्रहीष्यन् बंधूनाहूय राज्ञि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वाऽदूरबांध
वं बंधुसन्निकृष्टमेव प्रतिगृह्णीयादिति निवेशनस्य गृहस्य अन्त्यं तद्देशभाषाविप्रकृष्टस्य प्रतिषेधार्थमद्रवां

म॰पा॰
२१६

येदेमित्यङ्के स्वयंचविधिः क्रीतस्वयंदत्तकृत्रिमेष्वपियथायोगंयोज्याः एकपुत्रस्येष्टपुत्रव्यतिरेकेणापदिमातापितृ॰
भ्यांपूर्वोक्तेरीत्याप्रत्येकंवायोविक्रीतः सवर्णः क्रीतपुत्रः यत्तमन्वनोक्तं सक्रीतस्तस्यसुतस्तस्यसदृशोसदृशोथवे
ति तद्गुणैः हीनोसदृशोवयस्येनतत्परं नतुब्राह्मणत्वादिवर्णैः मातापितृरहितः सवर्णोधनादिकमदर्शी
तेनमत्सोभिमतः मनुः पुत्रार्थिनापुत्रीकृतोयः सकृत्रिमः मातापितृभ्यांविहीनस्त्यक्तोवा स्वहेतवपु
त्रोभवामीतिप्राप्तः स्वयंदत्तः सचापिसवर्णएव सगर्भायांविवाहितायांतस्माज्जन्मोयः उत्पन्नः ससहोढजः॰यः॰
दिचेत्सगर्भः सवर्णोजः मातापितृभ्यांमुत्सृष्टः परित्यक्तः सवर्णोयोगृह्यतेपुत्रत्वेनसोपविद्धः अत्रकामंदर्शी
यतिपिण्डदोंशहरश्चेति यतेसवर्णएवपुत्राभवंतीत्याह सजातीयेष्वयमिति एतेहिक्षत्रजादयोयद्यधिकव
र्णोड्रुत्पन्नास्तदापितृतन्नामधेयभाजोभवंत्येव पितुः सवर्णाडुत्पन्नाएवप्रशस्ततराभवंति सजातीयेष्वेवंप्रो
क्तेरिति सजातीयनियमात् यदिहीनवर्णोडुत्पन्नास्तदाप्रतिलोमजत्वेनतियाएवेतिविवेचनीयं कानीन॰
गूढोत्पन्नसहोढपौनर्भवानां सवर्णत्वंजनककर्तारेणनस्वरूपतः तेषांजारगोलकत्वेनस्वतोवर्णजात्यनिरणाभावा
भावात् पुत्रिकाकरणानंतरमौरसपुत्रोत्पत्तौविशेषमाह मनुः पुत्रिकायांकृतायांतुयदिपुत्रोनुजायते सम २१६

स्तत्र विभागः स्याज्ज्येष्ठतां नास्ति हि स्त्रियः कात्यायनः उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः सवर्णा असवर्णा
स्तु ग्रासाच्छादनभाजनाः सवर्णाः क्षेत्रजदत्तकक्रीतकृत्रिमस्वयंदत्तापविद्धाः असवर्णाः कानीनगूढोत्प
न्नसहोढजपौनर्भवाः यत्तु विष्णुवचनं अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः पौनर्भवश्च नैव ते पिण्डरि
क्थांशभागिन इति तदौरसे सति चतुर्थांशनिषेधपरम् औरसाभावे तु कानीनादीनामपि सकलपित्र्यधन
ग्रहणमस्त्येवोपूर्वाभागे परः परइति वचनादिति विज्ञानेश्वरमतम् यथाचायमेव क्रमस्तथास्माभिर्हयपादित
म् विज्ञानेश्वरटीकायां सुबोधिन्यां दायविभागप्रकरणे यत्त्वंशाधिकारी सन्नपि लोभाद्यभावान्नत्वनोर्जन
शक्तिसद्भावाद्वांशं न जिघृक्षति तं प्रत्याह याज्ञवल्क्यः शक्तस्यानीहमानस्य किंचिद्दत्त्वा पृथक्क्रिया किंचिद
सारमपि तस्मै दत्वा विभागः कर्तव्यः एतत्पुत्रादीनां दायजिघृक्षामाभूदित्येतदर्थं ज्ञातव्यम् एवंविशेषमा
ह अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः यदा बीजी स्वयमपुत्रो बी
जदानसमये अपुत्रोत्पन्नमपत्यमावयोरिति संमतिं करोति तदैवोभयोर्बीजिक्षेत्रिणो रिक्थग्राही समयाभावे तु क्षे
त्रिण एव विभागोत्तरकालमुत्पन्नं पुत्रं प्रत्याह मनुः ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनं पित्र्यामित्यत्रैकशेषः अत

म.पा.
२९८

एवमातापित्रोरिदं पित्र्यं तथा पुत्रैः सह विभक्तेन पित्रा यत्स्वयमार्जितं विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्यु
र्ताः तथा संसृष्टास्तेन वा ये सार्द्धं विभजेत् सत्तैः सह ये विभक्ताः संतः पुनः पित्रा सह संसृष्टाः तैः संसृष्टैः सह वि
भक्तजो विभजेदित्यर्थः पितरि भ्रातरि वा मृते अस्पष्टगर्भायां मातरि भ्रातृपत्न्यां वा सत्यामनत्येऽभ्रातृविभ
क्तेषु सत्सु तस्मादेव गर्भाद्विभागानंतरमुत्पन्नस्य पुत्रस्य कथं भागकल्पनेत्याकांक्षायां याज्ञवल्क्यः दृश्याद्वा
तद्विभागः स्यादायव्ययविशोधितात् तस्य विभागः तद्विभागः अवतच्छब्देन पूर्वोक्तरीत्या विभागानंतरमु
त्पन्नः पश्चादुत्पद्यते तद्विभागो दृश्याद्वा दृश्यादेव वाशब्दोऽवधारणे कीदृशाद्दृश्यात् आयव्ययविशोधितात्
विभागानंतरं प्रातिस्विकांशैः कृष्यादिभिः क्रियमाणो यो लाभः स आयः पितृकृतर्णापाकरणस्वकुटुंबपो
षणादिकं यदावश्यकं क्रियते स व्ययः आयमेषामध्ये प्रविगणय्य व्ययं चोद्धृत्य सर्वेभ्योंऽशेभ्यो यस्माद
स्मादंशाद्यावद्यावदुद्धरितं तावत्तावत्संगृहीत्वा स्वभागसममंशं कल्पयेत् एवंविधरीत्या विभागानंतरमुत्पन्नपुत्रस्य
दद्यादित्यर्थः स्पष्टगर्भायां मातरि भ्रातृपत्न्यां वा प्रसवानंतरं विभागः कर्तव्यः यदाह वसिष्ठः अथ भ्रातॄणां २९८
दायविभागो याश्चानपत्याः स्त्रियस्तासामापुत्रलाभादिति तासां स्पष्टगर्भाणां स्त्रीणामापुत्रलाभादिति ॥

मातामहश्राद्धं पश्चात्तैत्तकमाचरेत् अथ संकल्पश्राद्धम् तत्र व्यासः त्यक्ताग्नेः पार्वणेनैव नैकोद्दिष्टं स
पिंडनं अत्यक्ताग्नेस्तु पिंडोक्तिस्तस्मात्संकल्पभोजनं अस्यार्थः सन्नाग्नेर्नीलिकयादिनोत्सृष्टाग्नेः पा
र्वणैकोद्दिष्टस्यापिण्डीकरणाद्यश्राद्धकर्मणि नैर्वाधिकारः अत्यक्ताग्नेः पिंडोक्तिः पिण्डसहितश्राद्ध
कर्त्तव्यतोक्तिः श्राद्धाधिकार इत्यर्थः तस्मात्कारणात्त्यक्ताग्निः संकल्पभोजयेत् संकल्पश्राद्धं कुर्या
दिति संकल्पश्राद्धविधिमप्याह संकल्पं च यदा कुर्यान्न कुर्यात्पात्रपूरणं नावाहनाग्नौकरणे पि
ण्डांश्चैव न दापयेत् पात्रस्थापनमर्घ्यदानं विकिरदानमपि निषिद्धं स्मृत्यंतरे संकल्पं च यदा श्राद्धं
न कुर्यात्पात्रपूरणं विकिरं च न दातव्यमिति अयं चानुकल्पो मुख्यश्राद्धकरणाशक्त्याद्यभावे ज्ञेयः त
था च स्मरंति श्राद्धानुकल्पं यः कुर्याज्ज्ञातावस्थाययेत्वया श्राद्धांगं सोप्यवाप्नोति मुख्यश्राद्धफलं न
र इति अथैकोद्दिष्टश्राद्धं याज्ञवल्क्यः एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकं आवाहनाग्नौकरण
हितं ह्यपसव्यवत् उपतिष्ठतामक्षय्यस्थाने विप्रविसर्जने अभिरम्यतामिति वदेद्ब्रूयुस्तेभिरताः स्मह देव
हीनं विश्वेदेवरहितं अपसव्यवत् यत्पार्वणे यज्ञोपवीतवत्कर्म तदपि प्राचीनावीतिना कार्यमित्यर्थः

श्र॰पा॰ अत्तप्यस्याग्नेः त्वयमस्मिन्निति मंत्रस्याग्नेउपतिष्ठतामिति मंत्रः विप्रविसर्जने वाजेवाजे इति स्याग्नौ विप्रः
२०१ यथाशौचापगमे सु स्नातः सुप्रक्षालितपाणिपादस्त्वाचांतस्त्वेवं विधानेन ब्राह्मणान्यथाशक्त्युदक्षुखां
गंधमाल्यवस्त्रालंकारादिभिः पूजित्वा भोजयेत् एकवन्मंत्राह्ने हैकोद्दिष्टं गच्छेत् सन्निधावेव तन्ना
मगोत्राभ्यां पिण्डं निर्वपेत् भुक्तवत्सु ब्राह्मणेषु दक्षिणयाभिपूजितेभ्यस्तन्नामनामगोत्राभ्यां दद्यात् अक्ष
योदकेषु च सद्वेषु लष्ट्यी स्वावदंतरायावदयः स्वाना: वितस्यापनात्तिस्त्वकर्षूं कुर्यात् कर्षूसमीपे अ॰
ग्नित्रयमुपसमाधाय परिस्तीर्य तत्रैकस्मिन्नाहुतित्रयं जुहुयात्सोमाय पितृमते स्वधानमोग्नये कव्यवाह
नाय स्वधानमो यमायांगिरसे स्वधानमः स्थानत्रये प्राग्वत्पिण्डनिर्वपणं कुर्यात् ततो दधिमधुमांसैः
कर्षूत्रयं पूरयित्वा तत्तन्न इति जपेत् एवं मृताहे मासि मासं कुर्यादिति दत्वादयो रुद्रेकोद्दिष्टे अक्षय्योदकादि द
त्वाते च दत्तेषु स्वस्तिरिति विभक्तिपरिणामेनान्वयः वराहपुराणे प्रपंकरिष्य इति ज्ञात्वा ब्राह्मणामंत्रण
क्रियाः गतोस्मि दिव्यलोकांस्त्वं हस्तेनैव विहितान्वयः मनसा वाग्भूतेन विप्रेत्वाहं प्रयोजये पूजयिष्या
मिभोगेन एवं विप्रं निमंत्रयेत् द्वितीयदिनश्रासनेवमंत्रसेवैवोक्तः अत्रासने देवराजम्भूतत्वा ततो विप्रम २०१

तोऽह्निवर्णानुग्रहात् प्रमादयेत्वात्समनेगदहात्पुनःस्नात्वा नाग्निमुद्देनकोणविमेति हरस्मृतिः वस्त्रालंकारण
प्याग्रंथिनर्यद्वाहनागुधेगंधमाल्यैस्तमभ्यर्च्य श्राद्धभोक्तॄन्तर्पयेत् याज्ञवल्क्यहृद्दशान्तानपो स्नात्वाह्नि
तुकर्तव्यं प्रतिमासं तत्सरे प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि एकादशेऽहनीति आशौचापगमानंत
रदिवसोपलक्षणपरं आशौचापगम इति विष्णुस्मरणादिति कल्पतरौ तदेतद्विचारासहं आद्यमेकादशे
ऽहनीत्यनेनाद्योद्देशेन एकादशाहकालो विधीयते एवं चैकादशाहशब्दस्य आशौचानंतरकालोपल
क्षकत्वेन विधौ परः शब्दार्थ इति न्यायेन विरुध्येत अथ कालस्यानुपादेयत्वेन कालोद्देशेन कर्मविधा
ने नतु कर्मोद्देशेन कालविधाने अतो विधौ परः शब्द इति न्यायेनाविरोध इति चेत् मैवं वस्तुतउद्देश्या
माद्यश्राद्धमेव तस्य वचनांतरे :: एकादशाहरूपकालस्य प्राप्तत्वेन सहकालो विधेयः कालस्यानुपादेयत्वे
नानाविधेय इति कृत्वानुद्देश्यमपि कालमुद्देश्यमिवाधेयमाप्याद्यश्राद्धं विधेयमिव कृत्वा वाक्यहानिः
परिसमाप्यते अतश्च काल एव वस्तुतो विधेय पर्यवसानमिति तच्च लक्षणास्वीकारेऽपि इदं न विधौ परः श
ब्दार्थ इति न्यायविरोधः तस्मादाशौचापगमानंतरदिवसोपलक्षणपरत्वेन युक्तं आद्याशौचापगमर

म॰पा॰
२०२

तिविष्णुवचनं ब्राह्मणादिविषये व्यवतिष्ठत इति न तेनापि सह विरोधः अतः पत्न्यादीनामप्याद्यश्राद्धमेकादशे
ह्निकर्तव्यं तथा च वृहद्वसिष्ठः एकादशेऽह्नि यः श्राद्धं तस्मात्सामान्यमुदाहृतं चतुर्णामपि वर्णानां सूतकांते
पृथक्पृथक् शंखो लौगाक्षिरपि आद्यं श्राद्धमशुद्धोपि कुर्यादेकादशेऽहनि कर्ता तात्कालिकी शुद्धिरशु
द्धः पुनरेव स इति यत्तु मात्स्ये एकादशेऽहनि विप्रानेकादशैव तु क्षत्त्रियादिः सूतकांते भोजयेद्द्विजो
द्विजानिति तत्रैतत्पर्यं सूतकांते एकादशब्राह्मणभोजनं नेह द्वादशाहकर्मांतरं न तु षोडशश्रा
द्धांतर्भूतं तथा सति एकादशश्राद्धान्येतानि षोडशपदार्थाभिसंख्याधिकारात् षोडशश्राद्धविरोधः तस्मा
दाद्यमेकादशेऽहनीति सर्ववर्णसाधारणं च तत्र श्रम् आहिताग्नेरेकादशाह श्राद्धे विशेषमाह कात्यायनः
श्राद्धमग्निमतः कार्यं दाहादेकादशेऽहनि ध्रुवाणि तु प्रकुर्वीत प्रमीताहनि सर्वदा ध्रुवाणि चैव पाक्षिका
न्यूर्ध्वाणि जातूकर्ण्यः ऊर्ध्वं त्रिपक्षाद्यः श्राद्धं मृताहन्येव तद्भवेत् अथ स्वकारयेद्देहदाहादाहिताग्नेर्द्विज
न्मनः विहितं प्रकारेण शुद्धादिकृतानां तथ्यः शौचेपि आद्यमेकादशेऽह्नि शंखः सोयः शौचेपि दातव्यं प्रेतस्यै
कादशेऽहनि स एव दिवसस्तस्य श्राद्धशय्यासनादिषु षोडशश्राद्धान्याह जातूकर्ण्यः द्वादशप्रतिमास्या २०२

नि आद्यषाण्मासिके तथा त्रैपाक्षिकाब्दिके चेति श्राद्धान्येतानि षोडशेति आद्यषाण्मासिकाब्दिकशब्दाहू
नषाण्मासिकोनसांवत्सरिकपरं व्याख्योपि द्वादशाहे त्रिपक्षे च षाण्मासे मासिकाब्दिके श्राद्धानि षोडशै
तानि संस्मृतानि मनीषिभिः द्वादशाहे क्रियमाणोनमासिकं यदाह गोभिलः मरणाद्द्वादशाहे स्यात्मा
से नैवोनमासिकम् ब्रह्मपुराणे षोडशश्राद्धकालाः कंचनान्यथोपदिष्टाः नृणां तूत्क्रान्तदेहानां श्रा
द्धानां षोडश सर्वदा चतुर्थे पंचमे चैव नवमैकादशे तथा ततो द्वादशभिर्मासैः श्राद्धा द्वादशसंख्यया कर्त
व्याः क्रान्तिनाशे षांतत्रविभांसत्वतर्पयेदिति अत्र चतुर्थाद्यादिश्राद्धानां तर्भावे एकादशाहिश्राद्धानां षोडशसं
ख्याविहिता नतूनमासाद्यंतर्भावेनेति कश्चित्कालान्यथाभावः अतः षोडशश्राद्धे भविकल्पः सचशा रवा
भेदेन तदभावे यथादेशं यथाकुलं वा व्यवस्थितो ज्ञेयः मासे तीतदस्यास्मिन्नर्थे तद्दिनोन्यत्तो मासिकश्रा
म२ द्धानि ष्वतिमंगीकृत्य प्रथममासे निहते द्वितीयमासे मृतादिवसे आद्यं मासिकं एवं द्वितीयेतीते तृतीय
मासे मृतादिवसे द्वितीयमासिकमित्यनेन क्रमेण द्वादशमासिकानि एकादशाहे श्राद्धं तु पृथगेवेति के
चनमतं तेन तदनुपपन्नं द्वादशमासि मासानीत्युपक्रम्य श्राद्धान्येतानि षोडशेति जातूकर्णोक्त षोडशसंख्या

म॰पा॰
२०३

विशेषात् मृतेहनि तत्कर्तव्यं प्रतिमासमित्यनेन चाद्यादिमासिकानामाद्यादिमासएककालो विहितस्तेनापि वि
रोधः प्रसज्येत नन्वत्रैपक्षिकंभवेदूर्ध्वंत्रिपक्षेतदनंतरमिति यथा त्रैपक्षिकस्य त्रिपक्षानंतरंकालः तथाद्या
दिमासिकानामाद्यादिमासानंतरमेव कालोस्त्विति चेत् मैवं त्रैपक्षिकंभवेदूर्ध्वंत इत्यस्य चायमर्थः मृतेप्र
तेन तावत्त्रिपक्षे इति अतएव कार्ष्णाजिनिः त्रैपक्षिकंत्रिपक्षेस्यान्न्यूनताहेष्विनराणीतु अतोमासिकशब्दस्तु
लक्षणयास्मिन्नर्थे मासमानेनयेप्रसृयाविहितास्तदंतत्रापि ठकरकादेशे कृतेमासिकेति निष्पन्ने आद्य
मासिकेतु द्विजमाहात्म्यावस्थानीयं कृत्वा कुर्यात् तदाह गोभिलः ब्राह्मणंभोजयेदाद्यं होतव्यमनलेयथा
पुनश्चभोजयेद्विप्रं द्विरावृत्तिर्भवेदिति ऊनमासिकादिषु कालनियममाह गौतमः एकाहद्वित्रिदिनैरूने
त्रिभागेनोनएव च श्राद्धीन्यूनाब्दिकादीनि कुर्यादित्याह गौतमः कार्ष्णाजिनिः ऊनान्यूनेषु मासेषु वि
षमाहेसमेपि वा अत्रविशेषमाह गार्ग्यः नन्दायांभार्गवदिने चतुर्दश्यां त्रिपुष्करे ऊनश्राद्धं न कुर्वीत गृ
ही पुत्रधनक्षयात् मरीचिः द्विपुष्करे च नन्दासु सिनीवाल्यां भृगोर्दिने चतुर्दश्यां नोनानि कृत्तिकासु
त्रिपुष्करे संवत्सराद्वार्वाक्सपिण्डीकरणे षोडशश्राद्धान्यपकृष्यापकृष्यकृत्वा न तस्यापि पिण्डीकरणं विधाय पुनस्ता २०३

निमासिकानि स्वं स्वकालमासाद्य निकुर्यात् यदाह गोभिलः श्राद्धानि षोडशादत्वा नैव कुर्यात् सपिण्डनं लौगा
क्षिः श्राद्धानि षोडशापाद्य विदधीत सपिण्डनं अंगिराः यस्य संवत्सरादर्वाक् सपिण्डीकरणं भवेत् मासिकं
चोदकुंभं च देयं तस्यापि वत्सरम् अत्र विशेषमाह पैठीनसिः सपिण्डीकरणादर्वाक् कुर्याच्छ्राद्धानि षोडश
रा।४ एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु सपिण्डीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः प्रत्यब्दं यो यथा कुर्यात्तथा
कुर्यात्स तान्यपि कात्यायनः सपिण्डीकरणादूर्ध्वं न दद्यात्प्रतिमासिके एकोद्दिष्टविधानेन दद्यादित्याह
शौनकः यदा हौमासायां षोडश श्राद्धान्यपकृष्य कृत्वा सपिंडीकरणं कृत्वा पुनर्मासिकानि क्रियंते तदा
तान्यपि कृष्णः पुरस्तादेवापकृष्य कर्तव्यानि न तु स्वे स्वे काले तथा च शाठ्यायनिः सपिण्डीकरणादर्वाग
पकृष्य कृतान्यपि पुनरप्यपकृष्यंते हस्थांतरनिषेधनात् निषेधश्च कात्यायनोक्तः निहृत्य तु वृद्धितंत्रं नमा
सिकानि न चयेत् अयातयामे मरणे न भवेद्बनरस्य तु वृद्धिनिमित्तं कर्म कृत्वा मासिकानि कुर्यात् तथाच
र्षयातयाम मरणे नत्वे पुनर्भवेदित्यर्थः यदि कुर्यात्तदान्नजनमरणं भवेदिति तात्पर्यार्थः अशौचादिना
मासिकविघ्ने तदनंतरं कर्तव्यं न्यायसिद्धत्वात् तत्राप्यसमस्यावडपतितन मासिकदिने कार्यं यदाह ऋष्यशृंगः ए

कोद्दिष्टे तत्संप्राप्ते यदि विघ्नः प्रजायते मासेन्यस्मिंस्तिथौतस्यांकुर्याद्दंतरितंचततत् अंतरितंविघ्नेन तत्र तच्छ्रा
द्धेनान्यमासे स्वकालप्राप्तमुच्यते एकादशाद्याः क्रमशो ज्ञेयस्य विधिवत्क्रियाः ऊर्ध्वं त्वेकैकशः श्राद्ध
माब्दिकं तु श्यवरयक्तु श्राब्दिकं तु श्यवरयामीति भक्तविषयम् अथ नवश्राद्धानि तत्रांगिराः प्रथमे
ह्निपंचमे सप्तमे तथा नवमैकादशे चैव नवश्राद्धं प्रकीर्तितम् बौधायनः आनवमादिति अत्रानहेभिर्विषमो
नवममभिप्राप्य नवश्राद्धं कुर्यादिति नवमदिनकर्तव्यं नवश्राद्धं यदंतरितं तर्हि तदेकादशेह्नि कुर्यात्
एवं च पंचास्यमते नवश्राद्धानि भविष्यत्पुराणे नवसप्तविषमांराजन्नवश्राद्धान्यनुक्रमात् श्राद्यंतयोर्वि
णयोस्तु षडित्याहुर्महर्षयः शिवस्वामी नवश्राद्धानि पंचाहुराश्वलायनशाखिनः आपस्तंबाश्च षडि
त्याहुर्विभाषां तैत्तिरीयिणः कण्ठः नवश्राद्धं मासिकं च यद्यदंतरितं भवेत् तत्तदुत्तरमाने स्यादनुष्ठेयं
प्रयत्नतः सानंत्रं समानतंत्रत्वेऽनुत्तरनवश्राद्धादिने इति यावत् अथ सपिण्डीकरणं तत्र शौनकः चत्वार्यु
दपात्राण्येकं प्रेतस्य त्रीणीतरेषां प्रथमं पात्रे त्रिषु पात्रेषु नियोजयेत् समानिव आकूतिरित्येवमथमापि
ण्डं त्रिषु पिण्डेषु योजयेत् मधुमतीभिः संगच्छध्वमिति द्वाभ्यामेव वचनयोनत्वत्रापि नो भवतीति प्रेतो विदध्य

तः विष्णुः संवत्सरांतप्रेतायस्यनात्रिंशेतपितामहायचब्राह्मणान्भोजयेत् अग्नौकरणमावाहनंपाद्यंकुर्यात्
नं स्वर्जनत्वात्पृथ्वीसमानिवप्रेतपात्रेपात्रयोजयेद्गन्धोच्छिष्टसन्निधौपिंडचतुष्टयंकुर्यात् ब्राह्मणांश्चस्वाचां
तान्दत्तदक्षिणांश्चानुज्ञांविसर्जयेत्ततः प्रेतपिंडपात्रंपाद्यपात्रोदकवत्पिंडत्रयेनिदध्यात् कर्षत्रयसन्
निकर्षेप्येवमेवसपिंडीकरणंमासिकार्थवद्द्वादशाहंकृत्वात्रयोदशेन्हिवाकुर्यात् मंत्रवर्जंहिशूद्राणांद्वा
दशेन्हिसंवत्सराभ्यंतरेयद्यधिमासकोभवेत्तदामासिकार्थदिनमेकंवर्धयेदिति कर्षत्रयसान्निकर्षेप्येवमेवे
ति प्रेतैकोद्दिष्टसंबंधिकर्षत्रयसान्निहितानपिपिंडान्पित्रादिपिंडेषुयोजयेत् मासिकार्थवदिति मा
सिभवानिश्राद्धानिमासिकानितदर्थः प्रेताप्यायनादिनयुक्तानिश्राद्धानिमासिकार्थवद्धिहितानामाशौ
चापगमेद्वादशाहेद्वादशाहेद्वादशाहस्वरूः स्युःकृत्वात्रयोदशेन्हिसपिंडीकरणंकुर्यादित्यर्थः अत्रोनमासिकादी
निमध्यपतितानिचषष्ठद्वादशादिनेषुकार्याणि एवंषोडशश्राद्धानि अयंचपक्षोहस्त्यादिनिमित्तापकर्षोवास्त
वः अतएवद्वादशाहेश्राद्धंकृत्वेतिमदनरत्नार्थंतत्रअपकर्षकालात्पूर्वंकृतनवानिदिनानियावंतिभवंति त
त्तंत्याद्यादिनेषुतावंतिकृत्वोत्तरदिनेसपिंडीकरणंकार्यं याज्ञवल्क्यः गंधोदकतिलैर्युक्तंकुर्यात्पात्रचतुष्ट

म॰ पा॰ यम. अर्घ्यार्थंपितृपात्रेषुप्रेतपात्रंप्रसेचयेत् येसमानाइतिद्वाभ्यांशेषंपूर्ववदाचरेत् एतत्सापिण्डीकरणमेकोद्दिष्टं
२०५ स्त्रियाअपि शेषंब्राह्मणानिमंत्रणादि पूर्ववत्पार्वणवत् एकोद्दिष्टंसापिण्डीकरणं वृद्धमम्भतेन्तविशेषोवस्त
पुराणे मृतेपितरियस्याथविद्यतेचापितामहः तेनदेयास्त्रयः पिंडाप्रपितामहपूर्वकाः पिण्डोनियोज्यस्य
स्वस्वस्ति मातर्यग्रेमृतायांतुविद्यतेचापितामही प्रपितामहीपूर्वंतुकार्यस्तत्राप्ययंविधिः सुमंतः त्रया
णामपिपिंडानामेकेनापिसपिण्डने पितृत्वमश्नुतेप्रेतइतिधर्मोव्यवस्थितः त्रयाणांपित्रादिपिंडानांमध्ये
एकेनपितृपिण्डेनपितामहपिंडेनप्रपितामहपिण्डेनवापूर्वेजीवतिसपिण्डनेकृतेप्रेतः पितृत्वंप्राप्नोतीत्य
र्थः यत्तुवचनं वृद्धमाप्रमीतानांनैवकार्यंसपिण्डनेति तन्मात्रापितृभर्तृव्यतिरिक्तविषयंतथाचस्क
न्दे क्रमेणप्रमीतानांनसपिण्डीकृतिरिष्यते यदिमातायदिपितामहर्तानैषविधिस्तदा एषविधिवृद्धमा
रतोसपिंडीकृतिभावः वसिष्ठगृह्यवचनंच मृतेपितरीत्यादिपूर्वमेवदर्शितं पतिपिपत्न्याः स्वमातृपिता १३
महादिभिः सापिंड्यंकरोति तथावपैठीनसिः अपुत्रायांमृतायांतुपतिः कुर्यात्सापिण्डनं श्वश्र्वादिभिस्स
हैवास्याःसापिण्डीकरणंभवेत् मात्राग्निप्रवेशेकृतेपुत्रः पित्रादिभिरेवसहसापिंड्यंकुर्यात तथाहयमः प २०५

त्राचैकेनकर्तव्यंसपिंडीकरणंस्त्रियः स्मृतापिहितेनैकांगतामंत्राहुतिव्रतैः पत्याचैकेनपतिमुख्येनतत्पिता
तत्पितामहेनचेत्यर्थः ~~कात्यायनोपि~~ अतेनत्वेकेनैवसापिंड्यंकिंतत्रिभिः शातातपः मृतायायान्वगाता
नाथंसातेनसहपिंडनाम अर्हतीतिब्रह्मदैवार्षप्राजापत्योढायाःसुतः पितामह्यादिभिर्मातुःसापिंड्यं
कुर्यात् यदाहशौरवः मातुःसपिंडीकरणंकथंकार्यंभवेत्सुतैः पितामह्यादिभिःसार्धंसापिंडीकरणं
स्मृतं यमः जीवत्पितापितामह्यामातुःकुर्यात्सपिंडने प्रमीतपितृकःपित्रापितामह्यापिवासुतः मा
तुरग्निप्रवेशाभावे पित्रापितामह्यावेतिविकल्पः पितामह्यापितामह्यादिभिरित्यर्थः एवंपित्रेत्या
दौद्रष्टव्यं आसुरगांधर्वराक्षसपैशाचविवाहोढायाः सुतोमातामह्यादिभिस्तस्यांजीवंत्यांमातुःपि
तामह्यादिभिस्तस्यामपिजीवंत्यांमातुःप्रपितामह्यादिभिर्मातामहेनवासापिंड्यंकुर्यात् यदाहशातातपः
तन्मार्गतात्पितामह्यातत्स्वश्रूवासपिंडने आसुरादिविवाहेषुविन्नानांयोषितांस्मृते ततस्वप्रं
मातुःप्रपितामही स्मृतः पितापितामहेयोज्यंपूर्णेसंवत्सरेसुतः मातामातामहेतद्वदित्याहभगवो
शिवः पुत्रिकासुतोपितामातामहमातामह्यादिभिःकुर्यात् तथाचकात्यायनः मातुःसपिंडीकरणं

म·पा· पितामहस्य प्रहोदितं यथोक्तेनैव कालेन पुत्रिकायां न चेत्सुतः पुत्रिकापुत्रः प्रेतमातामहादिभिः कुर्यादित्यर्थः
२०६ बौधायनः आदिशेत्प्रथमं पिण्डं मातरं पुत्रिकासुतः द्वितीये पितरं तस्यास्तृतीये च पितामहं एवं येन केना
पि मातामहस्य सापिंड्ये हृद्याष्टकादिश्राद्धेषु पितामहादिवत्पार्वणं कार्यं आसुरादिविवाहेषु पुत्रिकाकरणेन
व [illegible]गोत्रमेव पितृगोत्रं समुत्सृज्य न कुर्याद्भर्तृगोत्रतः जन्मनीव विपत्तौ च नारीणां पैतृकं कुलमि
ति स्मरणात् ब्राह्मादिविवाहेषु पुनर्भर्तृगोत्रमेव स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे भर्तृगोत्रेण क
र्तव्या तस्याः पिण्डोदकक्रियेति स्मरणात् एतच्च सापिंडीकरणं कालात्यये पुत्रसंज्ञावे पुत्रेणैव कार्यं तद
केवा पुत्रेण श्राद्धानि षोडशादत्वा कुर्यात्सपिण्डनं प्रोषितावसिते पुत्रः कालादति चिरादपि तथा
सा५ त्वा न समयकाले प्रोषितावसते प्रवासमाने पुत्रो ज्येति चिरादपि कालात्सापिण्डनं कुर्यात् तत षोडशश्राद्धान्यदत्त्वा
न कुर्यात्किंतु दत्त्वैवेत्यर्थः यदि तानि कनिष्ठभ्रात्रादिना दत्तानि तदा सापिण्ड्यमेव कुर्यादिति कात्यायनः
पितामहः पितुः पश्चात्पंचत्वं यदि गच्छति पौत्रेणैकादशाहादि कर्तव्यं श्राद्धषोडशं नैतत्पौत्रेण कर्तव्यं
पुत्रवांश्चेत्पितामहः पितुः सपिण्डनं कृत्वा कुर्यान्मासानुमासिकं असंस्कृतौ न संस्कार्यौ पूर्वौ पौत्रप्रपौत्र २०६

कैः पितरं न च संस्कुर्यादिति कात्यायनो ब्रवीत् पापिष्ठमपि शुद्धेन शुद्धं पापकृतापि वा पितामहेन पित
रं संस्कुर्यादिति विनिश्चयः असंस्कृतौ च दशाहादि सपिण्डीकरणान्तैः कर्मभिः एवौ पितामहमपि पितामहो पापि
ष्ठं संस्कारवाहित्यान्न पातित्येन चण्डालादि हननेन वा पापकर्मणो न संसृज्येरन् स्त्रियश्चाति चारिण्यो दू
तिगो न संस्करणात् न संसृजेरन् न सपिण्डीकुर्युः असंस्कृतौ न संस्कार्याविति तेन स्वमृतयोः सन्ने सपिण्डीकुर्युः
असंस्कृतौ न संस्कार्याविति तेन स्वमृतयोः तेन स्वमृतयोः सन्ने सपिण्डीकरणाकर्तरि सति पौत्रादिना नकर्तव्यमि
त्येतत्परम् असतितु कुर्यादेवेत्यपरार्केन तत्रापि पितृसपिण्डीकरणानन्तरं प्रपितामहा कर्तव्यं पितुः प्राधा
न्यात्सान्निहितत्वात् पापिष्ठमपि शुद्धेन शुद्धं पापकृतापि वापितामहेन पितरं संस्कुर्यादिति [illegible] वच
नात् एवं च पितामहे प्रमीते पितर्यौर्ध्वदेहिकं कुर्यान्मध्ये मृतस्य तत्रापि पौत्रेण पितृसापिण्ड्ये कृतापि प्रा
पितामहस्य कार्यं पूर्वोक्तन्यायस्य तुल्यत्वात् अयं तु विशेषः पितामहदशाहादिमध्य एव पितुर्मरणे म
ध्ये महागुरुनिपाते द्यात्मदशाहं समापयेदिति वचनात् दशाहसमाप्त्या विशुद्धोपि तदौर्ध्वदेहिकानन्तरं च न संस्कारं स
न्तानस्यैव मासवर्जयेत् प्रमीते च दशाहादिके प्रमादादिवशात्पित्राशौचं वहन्नेव स्वकाले पितामहस्याहं कुर्यात्

म·पा·
२०७

प्रक्रांतत्वात् कर्तेस्तात्कालिकी शुद्धिरितिवचनाच्च यतिविषयेविशेषः शातातपेनोक्तः एकोद्दिष्टंज-
लंपिंडंस्माशौचप्रेतसत्क्रियां नकुर्यात्पार्वणादन्यद्ब्रह्मीभूतायभिक्षवे ब्रह्मीभूतोयतिः उशनाः ए-
कोद्दिष्टंनकुर्वीतयतीनांचैवसर्वदा अहन्येकादशेप्राप्तेपार्वणंतुविधीयते सपिंडीकरणंतेषांनकर्त-
व्यंसुतादिभिः त्रिदण्डग्रहणादेवप्रेतत्वंनैवजायते एतत्सपिण्डीकरणमाहिताग्निनाकर्त्रा द्वादशाहोकर्त-
व्यं तथाचलघुहारीतः यजमानोग्निमान्राजन्प्रेतश्चानग्निमान्भवेत् द्वादशाहेभवेत्कार्यंसपिण्डीकरणं
सुतैः नत्वश्राद्धानिषोडशादत्वानकुर्यात्सपिण्डनमितिवचनात् षोडशश्राद्धान्यपकृष्यकृत्वासपिण्डीक-
रणंकुर्यात् यत्तुवचनं यस्यसंवत्सरादर्वाक्सपिण्डीकरणंभवेत् मासिकंचोदकुंभंचदेयंतस्यापिवत्सरमि-
ति तत्कल्पस्त्वकारोक्तं पुनरनुष्ठानविषयत्वेनयोज्यं अयंचद्वादशाहपक्षोब्राह्मणस्यैवनसर्ववर्णाशौच ता४
निवृत्तेः नचायंश्राद्धंयथैकादशेह्नि आशौचमध्येक्रियतेतद्वत्त्रियादिस्साग्निकोद्वादशाहेसपिण्डीक-
रणंकरोतुकोविरोधइतिचेन्नाद्यस्यैकादशाहनियतत्वात्सर्वेषांतत्कारणात् सपिण्डीकरणस्यकालनियम
प्रतीतिर्द्वादशाहोब्राह्मणविषयएवावतिष्ठते तथाहिताग्निनाब्राह्मणेनकर्त्रांकचनैकादशेह्निवासपि २०७

शालीनस्तु प्रोक्त चतुष्पदधनधान्ययुक्तः ३

णोऽकरिरिति तन्न द्विजात्रियवैश्ययोर्ब्राह्मणप्रेरितयोरध्यापनमात्रकर्तृत्वाभ्यनुज्ञानं न तु हन्तित्वेनाभिधानं अनुगमनं शुश्रू
षा अनुगमनमेव शुश्रूषेत्यर्थः मनुः षण्णां कर्मणामस्य त्रीणि कर्माणि जीविका याजनाध्यापने चैव विशुद्धाच्च प्रतिग्र
हः देवलः द्विविधो गृहस्थो यायावरः शालीनश्च तयोर्यायावरो याजनाध्यायनप्रतिग्रहरिक्थसंचयवर्जनात् शालायो
लोकानुवर्ती स चतुर्विधः यथाह मनुः कुसूलधान्यको वा स्यात् कुंभीधान्यक एव वा त्र्यहैहिको वापि भवेदश्वस्तनि
क एव वा चतुर्णामपि चैतेषां द्विजानां गृहमेधिनां ज्यायान् परः परो ज्ञेयो धर्मतो लोकजित्तमः षट्कर्मैको भवेत्तेषां त्रिभिर न्या ५
न्यः प्रवर्तते द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति एकः कुसूलधान्यः षट्कर्मा उंछशिलायाचितायाचितकृषिवा
णिज्यैः अन्यः कुंभीधान्यस्त्रिभिरुंछशिलायाचितैः अपरस्त्र्यहैहिको द्वाभ्यामुंछशिलाभ्यां जीवति मनुः ऋतामृताभ्यां
जीवेत्तु मृतेन प्रमृतेन वा सत्यानृताभ्यां जीवेत न श्ववृत्त्या कदाचन ऋतमुंछशिलं ज्ञेयममृतं स्यादयाचितं मृतं तु याचि
तं भैक्षं प्रमृतं कर्षणं स्मृतम् सत्यानृतं तु वाणिज्यं तेन चैवोपजीव्यते सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् आ
यापदि प्रतिगृह्णाति तत्र याज्ञवल्क्यः राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा दंभिहैतुकपाषंडिबकवृत्तींश्च व
र्जयेत् राजान्तेवासियाज्यपदैः शिष्याययाज्यलक्षणः याज्यः यजनार्हः त्रैवर्णिकः स्मृतः एतेभ्य एव गुणोत्कर्षधर्मार्जितधनं
चतुर्थस्त्वश्वस्तनिको ब्रह्मसत्रेण ब्रह्मलोकप्राप्तिहेतुत्वेन सत्रयागतुल्यफलेन उंछेन ५

या याजयेत्तस्य दाराः विप्रो ग्राह्यस्तस्मात्प्रतिग्रहः एतैरिति जन्मकर्मादिभिः शुद्धः मनुः राजतो धनमन्विच्छेत्संसीदन्स्नात
कः क्षुधा याज्यान्तेवासिनो वापि न त्वन्यत इति स्थितिः न त्वन्यत इति एषां सद्भावे व्यासः द्विजातिभ्यो धनं लिप्सेत्प्रशस्तेभ्यो
द्विजसत्तमः अपि वा द्विजमात्रेभ्यो न शूद्रात्तु कथंचन द्विजातिमात्रेभ्य इति गुणधर्मैर्विहीनेभ्योपि नारदः ब्राह्मणस्यैव वा
जा वृद्धावप्येतौ धृतव्रतौ नैतयोरन्तरं किंचिद्विद्यते यौ धर्माभिरक्षणात् धर्मज्ञस्य कृतज्ञस्य वदान्यस्य शासतोऽशुचीन् अशुचीन्ह
ता परा धनं मेध्यमेव धनं प्राहुस्तीक्ष्णस्यापि महीपतेः शुचीनामशुचीनां तु सन्निपातो यथांभसां समुद्रे समतां याति
तद्वद्राज्ञो धनागमः यथाग्नौ संस्थितं दीप्ते शुद्धिमायाति कांचनं एवं धनागमः सर्वः शुद्धिमायाति राजनि अशुचिर्वच
नाद्यस्य शुचिर्भवति पूरुषः शुचिश्चैवाशुचिः सद्यः कथं राजा न दैवतं विडर्यएव देवत्वं राज्ञो भूमितले जसः तस्य ते प्रति
गृह्णंतो न लिप्यन्ते कथंचन देवसंश्रेष्ठ लोकपालस्वरूपेण मनुः न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः सूनाचक्रध्वज
वतां वेशेनैव च जीवितां न राज्ञ इति लोभतत्परप्रजापीडकात् अराजन्यप्रसूतितः इति हीनजातिप्रसूतान् यो राज्ञः॥
प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्तिनः स पर्यायेण यातीमान्नरकानेकविंशतिम् यमस्तु अराजन्यप्रसूतस्य राज्ञः स्वछ
न्दवर्तिनः चौरः प्रतिग्रहस्तस्य मध्यमादो विषोपमः नैव राजमहिषी राज्ञस्समानपुरोहिताः पापेनार्थेन संयुक्ताः

स· प्रा· २८ चकर्तृविशेषस्याप्राप्तत्वादुपपद्यते अपित्वनुपादेयपंचकमध्यस्थत्वात्कर्मविधीयते कर्तृद्देशेन विधिपर्यवसानं तु कर्तृवि।
शेष एव अन्यथा विशिष्टविधेरेवकारिकया ननु शाखोपाकर्मादीनां विहितत्वेन प्राप्तत्वात्कथं विशिष्टविधिरुच्यते ग्रंथ
कर्तृभेदेन विशिष्टविध्याश्रयणेनैकारिकाकारेणोपाकर्मादिविहितं अन्यथा सर्वस्य समुच्छेदापत्तेः नच सर्वशाखाधिक
रणन्यायेन कर्मणः प्रचारस्यैकत्वाद्विशिष्टविधौ गौरवप्रसक्तेश्चैत्तिरीयकापदे लक्षणाश्रयणमुचितं तथाचसति तै।
त्तिरीयकपदस्यैव यथार्थापत्ते पर्वण्यौदयिके श्रावणं कुर्युरित्यनेनैव सर्वेषां प्राप्तत्वात्तैत्तिरीयकपदं व्यर्थमेव किंच विशिष्टवि।
धौ गौरवभयाल्लक्षणास्वीकारे न वस्याप्रसज्येत पदानां मिथः संबंध इति तदप्ययुक्तं कर्तृविशेषस्य कालस्य कांक्षा
यामौदयिकत्वरूपकालसंबंधोपपत्तेः पूर्वोक्तदेशानां बह्वृचपदे पि समानत्वात्तदपि विवक्षमेव तस्मात्तैत्तिरीयकौ
दयिके पर्वणीति तैत्तिरीयकव्यतिरिक्तेतर यजुः शाखीनां पूर्वविद्धैव पौर्णमासी बह्वृचानां तु श्रवणएवेति सिद्धं तत्र श्रव
णयुक्तगौषाढविद्धं न ग्राह्यं तथाचव्यासः श्रवणेन तु यत्कर्म उत्तराषाढसंयुतं संवत्सरकृतोध्यायस्तत्क्षणादेव नश्य
ति धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्मयद्भवेत् तत्कर्म सफलं विद्यादुपाकर्मणि संज्ञितं मितितैत्तिरीयशाखिनां बह्वृचा
नां सामगानां चौदयिकएव स्वोक्तः कालो भवति तथाचपरिशिष्टे धनिष्ठाप्रतिपद्युक्तत्वाष्ट्रऋक्षसमन्वितं श्रवण

कर्त्तरि औदयित्वं वेत्सम्भयंयरस्परनिरपेक्षांगत्वा च निरपेक्षयोर्गुणयोर्मिथः संबंधः गुणानां च परार्थत्वादसंबंधस्समत्वात्स्या
दिति सूत्रकारवचनात् कर्त्तुश्च शेषत्वमुपदिष्टं गुरुणा अधिकारो हि यत्तेषु कर्त्तुः शेषस्याविसंसत इति तस्मान्नैत्तिरीयकपदं हवि-
रुभयवचनवडपलक्षकं अतएवानुवादः न चात्र औदयिकत्वमात्रं विधेयमिति तैत्तिरीयकव्यतिरिक्तानामपि यजुषामविना
औदयिकरूप एव पर्वण्युपाकर्म प्राप्तं श्रावणीडर्गनवमीस्पृस्तु हिरण्यगर्भपरिविज्ञारोयणां विषयः उपाकर्मांगभूतमाश्रुदा-
यिकं श्रावणीकर्म चेति एवं प्राप्ते ऽभिधीयते न तावद्विशिष्टानुवादे वाक्यभेदः उद्देश्यविशेषणविवक्षायामेव वाक्यभेदो न वि-
शिष्टोद्देशेनेति भवदेवेनोक्तत्वात् यदुक्तमौदयिकत्वस्याप्राप्तत्वादनुवादो न घटत इत्यर्थ तित्तदयुक्तं वाक्यान्तरेणौदयि-
कपर्वप्राप्तेः तथा च भाद्रविष्णोत्तरे संप्राप्ते श्रावणस्यांते पौर्णमास्यां दिनोदय इति वाक्यशेषस्तु पूर्वमेव दर्शितः तथा कालिका
पुराणे चतुर्दश्यां समुत्पन्नावसुरौ मधुकैटभौ वेदाहीऊर्वतः पद्मयोनेस्तेजहृतुः श्रुतीः हत्वा तावसुरौ देवः पातालतल
वासिनौ आहृत्य ताः श्रुतीस्तस्मै ददौ लोकगुरुः स्वयं समस्याप्रवांश्रुतीन्ब्रह्मा पर्वण्यौदयिके पुनः अतो भूतयुतातास्मिन्नुपा-
करणमिष्यते आस्तु रं वर्जयेत्कालं वेदाहरणशंकयेति तस्मात्सर्वण्यौदयिके कुर्युः श्रावणेते तैत्तिरीयकाइत्यत्र तैत्तिरीयकका-
र्ल्मात्रं विधीयत इति न वाक्यभेदः प्राप्ते कर्मणि गुणद्वयविरोधात् न हि कर्मणि कर्त्तृविधानमिति चेद प्राप्तांशेऽपि विधिः अत्र

अन्नहोमेतथासर्पिषांजलपिण्डादिदानके यन्मेमातामहीत्यादितद्योदाहरणंभवेदिति उदाहरणमूहः
स्वर्णेष्वेतेनमधुमानित्यादिमंत्रैर्ब्राह्मणभोजनार्थमंत्रस्वर्णेततः यचेहापितरस्तत्रचाष्टकमाहुतिंजुहो
ति एवमन्नहोमान्तरंषडाज्याहुतीर्जुहुयात् तत्रस्वाहापितृइतिमंत्रेणप्रथमाहुतिः पितृभ्यःस्वाहेतिद्वि
तीयाएताभ्यामेवतृतीयाचतुर्थीचस्वधास्वाहेतिपंचमी अग्नयेकव्यवाहनायस्वधास्वाहेतिषष्ठी ततो
निर्देशप्राप्तपिण्डपितृयज्ञमंत्रहोमः ततःस्विष्टकृतंहुत्वासर्वस्मादन्नात्किंपिदादायोदर्वीनामस्व
संगारसहितंभस्मापोह्यतत्स्थलींजुहोति ततउत्तरतंत्रमाग्नेयस्थालीपाकवत्कुर्यात्तथाचभाष्यार्थसंग्रह
कारः अग्नीन्धनादिप्रतिपद्यकर्महुत्वाज्यभागंतमथवादाययन्मेतिमंत्रैः प्रतिमंत्रमग्नौकार्यस्तथा
मन्नाभिरन्नहोमः स्वाहादिमंत्रैर्दर्पिसर्पिवास्तुहोमास्ततःस्विष्टकृतंचकृत्वा भस्मानपोह्यहविरन्नहो
मोलेपेनदत्वाप्रसमंजनादिपोवंचकृत्वापरिषेचनांतेपात्रेषुदद्याद्धुतशेषमन्नमिति अत्रसमभिर
न्नहोमोनाहितमत्राभिप्रायः शिष्वत्वाद्दिपरीहार्थस्वाहोतमंत्रस्यानभिधानंतथानिर्देशप्राप्तपिण्डा
पितृयज्ञमंत्रहोमानभिधानंच एतच्चाग्निकरणंतैत्तिरीयाणामन्वाहार्यश्राद्धेनदर्शश्राद्धमात्रेअन्वाहार्य

म॰पा॰ १९५ कश्राद्धं च प्रमीतमातापितृकस्य तथा च कल्पतरौ परिशिष्टपरिशेषे अप्रमीतो समावस्यायां पिंडपितृयज्ञः पिंडान्वा
हार्यकं च कार्यं न तु प्रमीतमातापितृकस्य सपत्नीक पित्रादिदैवत्यामिति तस्मादन्वाहार्यकश्राद्धे सर्वोत्क्रमश्चौ
करणं दर्शश्राद्धमात्रे त्वतिदेशप्राप्तसोमाय पितृमते स्वधा नम इत्यादेर्मन्त्रैर्देवाग्नौकरणं नोपदिष्टात्तद्दिष्टान्त
कमिति सिद्धम् अथ परिवेषणादिविधिः मस्त्रमर्यादानंतरं हस्तोदकं दत्वा पात्रप्रक्षालनं कुर्यात् तथा च प
रिसर्वीशाद्दिकमपि दद्यात् तदनंतरं याज्ञवल्क्यः कृत्वेशेषं प्रदद्यात्तु भाजनेषु समाहितः यथालाभोपप
न्नेषु रौप्येषु च विशेषतः ततश्चानिषिद्धायसादिव्यतिरिक्तैर्विहितस्वर्णरजतादिपात्रैः स्वयं भार्यान्यो
वाशुचिः परिवेषणं कुर्यात् पक्वान्नं हस्तेनैव पक्वान्नानाधिकारे तु न तु दर्व्या कदाचनेति निषेधात् वा
पुष्पाणे नापविद्धेण हस्तेन नैकेन च विना कुशान् नाप्यायसेनायसेन श्राद्धे तु परिवेषयेत् आयसेपात्रे
आयसेन दर्व्यादिना न दद्यादित्यर्थः तथा तस्मादंतरितं देयं पर्णेनाथ तृणेन वा परिवेषणानंतरं याज्ञव
ल्क्यः दत्वान्नं पृथिवीपात्रमिति पात्राभिमंत्रणं कृत्वेदं विष्णुरितीतेन द्विजांगुष्ठं निवेशयेत् इदं विष्णुरिति मं
त्रानंतरं द्विजांगुष्ठमन्ने निवेश्य विष्णुदैवत्यानेन तत्कुशोदकैरन्नत्यागं कुर्यात् मातापितृस्थानेति लोदककुशैः २ १९५

पक्षापितृश्राद्धांगत्वं तत्सान्निहितत्वात्सर्वाह्णस्य यत्तव्याख्यापद्दवचनं कालात्यागतस्तनाहूर्ध्वं त्रिमुहूर्तात्त
यातिथिः श्राद्धस्याङ्गत्वेऽपर्याह्णिमुहूर्तोपि वाभवेदिति एतदपिप्रागस्तकालानंतरं त्रिमुहूर्तमध्ये ह्रिमुहू
र्तमध्ये वा कर्तव्यता प्रतिपादनेपरं न तु मावस्यादितिथेस्तावन्मात्रव्यैकर्तव्यतापरं तथा सति पूर्वैर्युः सू
र्वाह्णा ऊनपादिस्पर्शे सत्यपि परेद्युरेव श्राद्धमसक्तेः तथा चानेकवाक्यविरोधः तस्मात्सर्वाह्णैव व्याप
स्या अथश्राद्धकालप्रसंगादावश्यकानित्यनैमित्तिकश्राद्धसंभवेमत्यास्नानं तत्र देवलः यदेवतर्पय
त्यद्भिस्ताहिताग्निर्दिनेदिने पितॄंस्तेनैव प्राप्नोति दर्शिकादिक्रियाफलम् पिण्डमात्रं प्रदातव्यमभावे
द्रव्याविप्रयोः श्राद्धाह्नितु सम्याप्ते भवेन्निर्धनोपि वा निरग्निस्तत्रचापिपिण्डदानं संभवे पात्राभावे प
रेह्णनापितृयज्ञविधिनरः निर्दिष्टाप्यनुमत इत्यत्र यथा पाठेनतो गतिः पितृयज्ञविधिं श्राद्धविधिम
न्वसंकल्पपर्यंतं कृत्वा यत्र पात्रं ब्राह्मणास्तं देशं प्रति तदन्नं नीत्वा तत्र सेदयादित्यर्थः सर्वाभावे ग क्षिपेद्गवेनो ३
वा वेदयाद्दृष्यापस्तु नतु प्रागस्य लोपोस्तिपैतृकस्याविशेषतः सर्वाभावे उत्तममध्यमपात्राभावे हृद्ववसि
ष्ठः अग्निनावादहेन्मन्त्रं श्राद्धकाले समागते तस्मिन्नोपवसेदह्नि जपेद्वा श्राद्धसंहितां विष्णुपुराणे स

म०पा०
१९८

वीभावेवनंगत्वाकक्षमूलप्रदर्शकः सूर्यादिलोकपालानामिदमुच्चैः पठेदिति नमेस्तिवित्तंनधनंनचान्यत्
श्राद्धोपयोगिस्वपितृर्नतोस्मि तृप्यंतुभक्त्यापितरोमयैतौ हस्तौकृतौवर्त्मनिमारुतस्य इत्येतद्भिरिति गीतंभा
वाभावप्रयोजके यःकरोतिकृतंतेन श्राद्धंभवतिपार्थिव भावाभावौद्रव्यब्राह्मणादिसम्पत्त्यावासम्पत्तीवो पक्षपदे
बुद्ध्यापरान्नायपेक्षयाविकल्पः अथापरपक्षविषयंकिंचिल्लिख्यते याज्ञवल्क्यवचनेभिहितानिश्रमावा
स्याश्राद्धादीनि कानिचिन्नित्यानिकानिचिन्नैमित्तिकानि कानिचिदावश्यकानि एतान्येवफलसंयोगा
त्काम्यानिश्रुतोग्निहोत्रादिवदुभयात्मकानि तत्रकृष्णपक्षेत्यनेनसामान्येनसकलपरपक्षाणांश्राद्धकाले
नाऽविशिष्टेपि भाद्रपदापरपक्षोविशेषोविधीयते तत्रब्रह्माण्डे कन्यागतेसवितरीयान्यहानितुषोडश।
क्रतुभिस्तानितुल्यानितेषुदत्तमथाक्षयम् शुक्लपक्षप्रतिपदमंतर्भाव्य षोडशसंख्यापूरणम् तथामिति
केचित् आप्लवुःकृत्स्नपक्षेतुश्राद्धंकार्यंदिनेदिने त्रिभागहीनंपक्षंवात्रिभागंत्वर्धमेववा आप्लवुःकृत्स्न
पक्षेतिपौर्णमास्यंतमासाभिप्रायः दिनेदिनेप्रतिदिनंसमस्तेपिपक्षइत्यर्थः त्रिभागहीनंपंचमीमारभ्य
अर्धमष्टमीमारभ्यदानेष्वपेक्षयाविकल्पः यमः आषाढीमवधिंकृत्वायःपक्षःपंचमोभवेत् तत्रश्राद्धं १९८
आषाढ्यांततस्तत्तिपयपक्षतुदष्टी चेतिपंचहीयंते अतत्रिभागहीनता एवं त्रिभागपक्षादिष्वपि त्रिभागंदशमीमारभ्य२

प्रवर्त्तीनकन्यास्थोर्कोभवेन्नवा कदाचिन्मलमासापरपक्षोपि पंचमोभवतीति तत्रापिश्राद्धप्रसक्तौ भृगुः ॥
एकराशिस्थितेसूर्येयदादर्शद्वयंभवेत् हव्यकव्यक्रियाहर्त्तातदान्त्योधिमासकः वृद्धिश्राद्धंतथासोमम-
न्याधेयंमहालयं राजाभिषेकंकाम्यंचनकुर्याद्भानुलंघिते इति महालयमपरपाक्षिकंश्राद्धं यत्तुयमेन
कन्यास्थोर्कोभवेन्नवेतितत्पक्षोपक्रमाभिप्रायं अतःपक्षस्यादिमध्यावसानेष्वपिचनकन्यागतान्वयेनभाव्यं
अनेनाभिप्रायेणशाट्यायनिः नभस्यस्यापरेपक्षेतिथिषोडशकंतुयत् कन्यागतान्वितंचेत्स्यात्सकालःश्राद्ध
कर्मणीति कार्ष्णाजिनिः आदौमध्येवसानेवायत्रकन्यांव्रजेद्रविः सपक्षःसकलःपूज्यःश्राद्धषोडशकेप्रति
अत्रपक्षदैवत्यंश्राद्धं तदाहगौतमः पितरोयत्रपूज्यंतेतत्रमातामहाअपि अविशेषेणकर्त्तव्यंविशेषान्नरकंव्र
जेत् महालयेमातृश्राद्धंपृथगेवासहवाभवति अतएवापरार्के गयामहालयादौतुपृथक्तत्सहवास्वभर्तृभि-
रितिसिद्धमिति स्मृत्यर्थसारेपितत्रमातृश्राद्धंपृथक्कार्यमिति तत्रापरपक्षे चतुर्विंशतिमतेपिकेचिद्
क्तेतिनारीणांपृथक्श्राद्धंमहर्षयइति अन्वष्टकादिषुमातृश्राद्धंपृथगेवकुर्यादितिनियमः तथाचशाता
तपः अन्वष्टकासुवृद्धौचप्रतिसंवत्सरंतथा अत्रमातुःपृथक्श्राद्धमन्यत्रपतिनासह तथाअष्टकासुचवृ

म॰ पा॰ द्धौचगयापांचमृतेहनि मातृश्राद्धं पृथक्कुर्यादन्यत्रपतिनासह पंचः अन्वष्टकातथामातृश्राद्धं चैवमृतेहनि
१६८ एकोद्दिष्टं तथा मुक्त्वा स्त्रीणां नान्यत्पृथग्भवेत् एकोद्दिष्टशब्देन प्रेतत्वविमोचनापादकषोडशश्राद्धं सपिंडीक
रणीकरणसहितमुच्यते नत्वष्टकादीन्येकोद्दिष्टानिकार्याणीत्यभिधीयते तत्रविश्वेदेवपूर्वकश्राद्धविधानि
त् अत्रापरपक्षेआचार्यादेर्दीनेकस्मिन्दिनेक्रमेणैवश्राद्धंकार्यंतथाचचतुर्विंशतिमते आचार्यगुरुशि
ष्येभ्यः सखिज्ञातिभ्यएवच उत्पत्तीभ्यश्चसर्वेभ्यस्तथैवचजलांजलीन् पिंडांस्तेभ्यः सदाद्याद्धयाश्राद्ध
पदेनरः तीर्थेषु चैवमत्रैवमाघमासेमघासुच एकस्मिन्ब्राह्मणेसर्वानाचार्यादीन्प्रपूजयेत् दर्शाद्वादश
वापिएतान्द्यात्करणंनत्व नैयोगिकोविधिर्ज्ञेयःपक्षेवैपंचमोमतः तस्मिन्दत्तेहविर्न्यूनेपितृणांमहद्भयं
भवेत् एकस्मिन्निति असमर्थविषयं यदेकस्मिन्दिनेतदानेकएवपाकः तथाचभृगुः एककालेगतानांच
हूनामथवाद्वयोः तंत्रेणश्रपणंकुर्यात् श्राद्धंकुर्यात्पृथक्पृथक् पूर्वकस्यमृतस्यादौद्वितीयस्यततः पुनः तृ
तीयस्यततःकुर्यादित्यभिप्रायोक्तंसन्निपातेप्ययंक्रमइति सन्निपातेएकस्मिन्समये ननाश्राद्धकर्तव्यताप्राप्तिः
एतेषामेकोद्दिष्टमेव तथाचरमंतः सपिंडीकरणादूर्ध्वंयत्रयत्रप्रदीयते मात्रेभगिन्यैपुत्रायस्वामिनेमातुला॰ १६८

यच मित्राप्यघ्नस्वेश्राद्धमेकोद्दिष्टं न पार्वणम् अथ काम्यकालः तत्र मनुः कुर्वन्प्रतिपदि श्राद्धं सुरूपां लभते
सुतान् कन्यकां तु द्वितीयायां तृतीयायां तु वन्दिनः पशून्क्षुद्रांश्चतुर्थ्यां तु पंचम्यां शोभनान्सुतान् षष्ठ्यां
द्युतं कृषिं चापि सप्तम्यां लभते नरः अष्टम्यामपि वाणिज्यं लभते श्राद्धदः सदा स्यान्नवम्यामेकखुरं दशम्यां द्वि
खुरं तथा एकादश्यां तथा रूप्यं ब्रह्मवर्चस्विनः सुतान् द्वादश्यां जातरूपं च रजतं कुप्यमेव च ज्ञातिश्रैष्ठ्यं त्रयोद
श्यां चतुर्दश्यां तु कुप्रजाः प्रीयन्ते पितरश्चास्य ये शस्त्रेण हता रणे पक्षत्यादि विनिर्दिष्टान्विपुलान्मनसः प्रि
यान् श्राद्धदः पंचदश्यां तु सर्वान्कामान्समश्नुते वन्दिनः स्तुतिपाठकाः स्तुतिर्भवन्तीत्यर्थः द्युतं द्यूतजयं जा
तरूप्यं हेमकुप्यं सुवर्णरजतव्यतिरिक्तं ताम्रादि पक्षतिः प्रतिपत् तदादितिथ्यभिहितानि यानि यानि फला
नि तेषु स्वीयमनसोभीष्टान्सर्वान्कामानमावस्याश्राद्धदः प्राप्नोतीत्यर्थः अत्र यद्यपि सर्वकामप्राप्तिरविशेषे
णाकथिता तथापि न युगपत्सर्वकामनाप्राप्तिरविशेषेणाकथिता तथापि युगपत्सर्वकामनाप्राप्तिरपि तु पंच
दश्यामनुष्ठितेन श्राद्धेनैकेनैक एव कामः एवममावस्यातदनुष्ठितेनान्येन श्राद्धेनान्यः काम इति क्रमेणाभि
लषितसिद्धिः उपपादितं चैतन्मीमांसायां सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविचेत ह्यारूपविचारे यत्र स्तत्पंत

रेवतीतिथिवारान् नक्षत्रप्रयुक्ताष्टस्फलान्युपात्तानि तत्रापि पूर्वोक्तरीत्यानीकफलासिद्धिर्द्रष्टव्याः विस्तुः सत
न्तमादित्याद्रिश्चाहं कुर्वन्नारोग्यमाप्नोति सौभाग्यं चान्द्रे समरविजयं कौजे सर्वान्कामान्बौधे विद्याममीष्टां जी
वे धनं शौक्रे जीवितं शानैश्चरे इति ब्राह्मे अश्विन्यां प्राप्नुयाद्यान्भरण्यामायुरुत्तमम् कृत्तिकायां विज्वरत्वं स्व
इष्टं लोकमवाप्नुयात् प्राजापत्ये तथा तुष्टिं सौम्ये चौजः सुशोभनम् आर्द्रायां तु वशासिद्धिः पुनर्वसौ श्रेष्ठान्सुनव
सौ तिष्ये संततान्वीरधर्मान्सार्पे बलमभते धनम् ज्ञाति श्रैष्ठ्यं मघासु वसौ सौभाग्यमुत्तमम् दानशक्तिमर्थया
नो हस्ते श्रैष्ठ्यं महर्द्धिमत् त्वाष्ट्रे रूढ्विजयं तु पर्णांस्वातौ वाणिज्यमुत्तमं विशाखायां शुभान्सुवान्मैत्रे वाप्यहृतां ग
तिम् ज्येष्ठायामाधिपत्यं तु मूले चारोग्यमुत्तमम् आषाढासु यशोलाभमुत्तरासु विशोकतां श्रवणे च गतिं तु पर्णा
धनिष्ठासु धनं बहुः वारुणे न कृषेर्वृद्धिर्वैश्णाखे जाविकं बहु बह्वीर्वीपीप्रोत्तरायां पौष्णे रूपं महानिधम् इति
तं विंत्ययोगेन विधिनासाधयेत्स्वनान् तस्मिन्दिवसे श्राद्धे भक्त्यासंतर्पयेत्पितृन् अथानिषाधिकारे देवलः
आयुग्मा स्त्रियः सर्वा युग्माभ्यः प्रतिपूजिताः कालतः पूजितौ मासौ माघप्रौष्ठपदावुभौ पक्षयोः शुक्ल
पक्षादिर्बहुलः प्राक्प्रपूजितः ज्ञातितिथिपरिज्ञेयं नक्षत्रेषु प्रवक्ष्यते उत्तराश्रवणं तिष्यो मृगशीर्षं प्रजापतिः ह १८०

म॰ टी॰ ६२

ब्धं उदयंफलं तद्दियः तादृशाः शुद्धसमर्थः सद्वृत्तिः सेवापार्श्विकं उत्कोचादिलब्धं आर्तिः पीडाः प्रतिरूपकं कृत्रिमधातु
रत्नादि साहसंयोतगिर्यारोहणाद्दिव्याजेन द्यूतव्याजेन तैलादिकं दत्वा यद्उपार्जितं भारद्वाजः तस्मान्नद्विदशविधं प्रति॰
वर्णाश्रयाश्रितं साधारणस्य त्रिविधं विडस्तत्र क्रमागतं प्रतिदानं तथैवात्र प्राप्तं च सह भार्यया अविशेषेण वर्णानां सर्वे
त्रिविधं धनं वैशेषिकं धनं विद्याब्राह्मणस्य त्रिलक्षणं प्रतिग्रहेण यल्लब्धं याजनतः शिष्यतस्तथा त्रिविधं क्षत्रियस्या॰
पिप्राहुर्वैशेषिकं धनं युद्धोपलब्धं कारात्र दंडाच्च व्यवहारतः कारः करः वैशेषिकं धनं ज्ञेयं वैश्यस्यापि त्रिलक्षणम्
कृषिगोरक्षवाणिज्यैः शूद्रस्यापि तदनुग्रहात् कृततरवर्णानुज्ञायां शूद्रस्यापि कृषिगोरक्षवाणिज्यैर्वैशेषिकं धनं भवती
त्यर्थः सर्वेषामेव वर्णानामेष धर्म्यो धनागमः विपर्ययादधर्मः स्यान्न चेदापद्गरीयसी अथ प्रसंगाद्वर्णवृत्तिरभिधीयते
तत्र मनुः अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः याद्वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि याज्ञवल्क्यः इज्याध्यय
नदानानि वैश्यस्य क्षत्रियस्य च प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा अत्र चकाराद्विशेषो ज्ञायते ब्राह्मणस्यैव प्रतिग्र
हयाजनाध्यापनानि भवंतिना समस्तमत्र पवविप्र इति विषयसप्तमी अनन्यभावस्य विषयः ब्राह्मणस्यैव प्रतिग्रहादित्रयं
वृत्तिरित्यर्थः यत्तु गौतमेनोक्तं आपत्काले ब्राह्मणस्य ब्राह्मणाद्वियोपयोगोनुगमनं शुश्रूषा चासमाप्तेः समाप्तेते ब्राह्म॰

लब्धमवन्तर्णो हेमः प्रष्टाङ्गहृदये गंतव्यं राजकुले द्रष्टव्या राजपूजिताः यद्यपि न भवंत्यर्थास्तथाप्यनर्थान्निवर्त्तन्ते विशुद्ध
गुणे ततः स्ववर्णधर्मेणाहृतमर्थेन च धनार्जनम् कुर्वीत श्राद्धकर्मापि यजेत पृथिवीपते सोमसंस्था हविःसंस्थाः पाकसंस्थाश्च
संज्ञिताः धनायत्ता मनुष्याणां यतेत च धनार्जने नारदः धनमूलाः क्रियाः सर्वा यत्नस्तस्यार्जने मतः रक्षणं वर्धनं भोगा
इति तत्र विधिः क्रमात् महाभारते धर्मेणार्थः समाहार्यो धर्मलब्धं त्रिधा धनं कर्त्तव्यं धर्मपरमं मानवेन प्रयत्नतः एकेना
शेन धर्मस्तु कर्त्तव्यो भूतिमिच्छता एकेनांशेन कामस्त्वेकमंशं विवर्धयेत् मार्कंडेयः पादेन तस्य पारक्यं कुर्यात्संचय
मात्मवान् अर्धेन चात्मभरणं नित्यं नैमित्तिकान्वितं पादं चार्धार्धं सर्वस्य मूलभूतं विवर्धयेत् नारद उवाच यस्मा
नास्ति विधं तत्तेषु शुद्धं शबलमेव च कृष्णं तस्य तु विज्ञेयो विभागः सप्तधा पुनः श्रुतशौर्यतपःकन्याशिष्ययाज्यान्वयागतं धने स
षड्विधं शुद्धमुदयोप्यस्य तद्विधः कुसीदकृषिवाणिज्यशुल्कशिल्पानुवृत्तिभिः कृतोपकारादाप्तं च शबलं समुदाहृतं
पार्श्विकं द्यूतचौर्यार्त्ति प्रतिरूपकसाहसैः व्याजेनोपार्जितं यच्च तत्कृष्णं समुदाहृतं यथाविधेन द्रव्येण यत्किंचित्कुरु
ते नरः तथाविधमवाप्नोति स फलं प्रेत्य चैव हि श्रुतेनाध्ययनेन शौर्येण जयादिना तपसा जपहोमदेवतार्चनादिना
कन्यागतं कन्यया सहागतं श्वशुरादेर्लब्धं शिष्यागतं गुरुदक्षिणादि याज्यागतं आर्त्विज्यलब्धं अन्वयागतं दायाद्यल।

तस्मिंतयोर्होमाधिकरणाभूतयोर्यजमानस्याचमनप्राप्तिः अन्यथा बहुवचनानुपपत्ते पदातंत्रेणश्राद्धं
तदा द्वयोरेवाचमनंच होमाधिकरणाभूतस्य तस्य तत्रैव उच्छिष्ट तर्पितर इत्यादिति लावन्नोत्थाप्यंते तावश्रा
सनाद्दत्यानस्यानिषिद्धत्वात् यजमानस्य बहिराचमने विशेषः आमश्राद्धे शुक्लामेषु प्रथमपंचकेनाग्निं
हुत्वा पश्चाद्दोषु मध्यमपंचकेनामावस्यासूत्तमपंचकेनापराह्णाय एष्वंगलस्याष्टकासु चतुर्भोरेव प्रथम
मध्यमोत्तमपंचकैरन्वष्टकासु ततो ब्राह्मणानुज्ञातः पितॄन्नावाहयेदपयंत्वसुरा इति द्वाभ्यां तिलान्वात
यानविसर्जनं कृत्वा एतहः पितरस्सर्वास्तान यमासेयं तएत्वानितर इत्यावाहनं कृत्वा उशन्तिस्त्वामिषेन गंधो
दकेनयमसत्ता वारीति यन्नेमातेति च पाद्यं निवेद्य चैवायमर्घं कृत्वा निवेद्य चानुलेपनवस्त्रपुष्पालंकारैः
संपूज्या विप्रान्समभ्यर्च्यादित्यावसवइतिनिवीत्याग्नौकरणाणीत्युक्ता वदत्तान प्रविष्टैः मानवदद्याचाद्भुति
त्रयं हुत्वा ये मामकाः पितरः एतद्वः पितरः अयं यज्ञ इति चावीक्षितं वर्णां कृत्वा यथोपपन्ने शुपात्रे शुविशो
धितोरजतमये शुनमो विश्वेभ्यो देवेभ्य इत्यन्नमादौ मांसस्तवयोर्निवेदयेत् पित्रे पितामहाय प्रपितामहा
यनामगोत्राभ्यामसुदंमस्तवेविति आमश्राद्धलौगाक्षिरस्मान्मारेणाप्तो नीष्टो माचारम्भेनान्दीमुखश्राद्धं

म॰ या॰
१२२

यन्मासवद्विहितं क्रियते प्रथमपंचके नेत्यादि काठके तैत्तिरीयके चेयमेवमेतिपंचदशार्चोनुवाकः पठ्यते तत्राप्रथमद्वि
तीयपंचके नक्षत्रस्थले होमः षष्ठश्राद्धं समाप्ते वृद्धे षष्ठश्राद्धं विधिवत्प्रतिपादयेदिति हारीतेन यत्सापिंडीक
रणश्राद्धं विहितं तदुच्यते आदित्यावसवइतिमंत्रेण ब्राह्मणान्वीक्ष्य तैरनुज्ञातस्तैरिति बहुवचनात्सर्वैर
नुज्ञातादातव्या तथाचमनुः अग्नौकुर्यादनुज्ञातो ब्राह्मणो ब्राह्मणैः सहेति एवं लिखितो धूपगंधमाल्यै
रलंकृत्य ब्राह्मणान्संहत्य मन्नमनुज्ञाप्य दर्भैर्दक्षिणाग्रैरग्निं परिस्तीर्य जुहुयात् अग्नये कव्यवाहनाय स्वाहा
सोमाय पितृमते स्वाहेति बौधायनः अथैतानाखिलमिश्रानापः प्रतिगाह्य गंधपुष्पमाल्यैनालंकृत्याग्नौकरि
ष्यामीत्यनुज्ञातोग्निमुपसमाधाय संपरिस्तीर्य तिस्र आज्याहुतीर्जुहोति सोमाय पितृमते स्वधानमः
स्वाहा यमायांगिरस्वते पितृमते स्वधानमः स्वाहा अग्नये कव्यवाहनाय स्विष्टकृते स्वधानमः स्वाहेति त
हुतशेषेणान्नमभिघार्यान्नस्यैवतानेवातिस्रो जुहुयात् वयसां पिंडान्याहुर्वयसां हि पितरः प्रतिमया चरं
तीति विज्ञायते अथैतदन्नं ब्राह्मणेभ्यो निवेद्य ब्राह्मणस्यांगुष्ठेनानखेन खेनानुदिशति पृथिवी समस्य
इत्यादि वाक्यं पठित्वा बौधायन एवाह अथाप्युदाहरंति अग्नौकरणशेषेण यदन्नमभिघारयेत् तस्मिन्स्त १९

प्रणीते दद्यात् दत्वान्नं यत्प्रकृतं भवेदिति ततः शेषेणान्नेनाज्यशेषेण वयसां पिंडान् दद्यादित्याग्नौकरणानंतरं
पिंडदानं विधाय तान्पिंडान्वाह्निभ्यः काकेभ्यो दद्यात् वयसां प्रतिमयानन्तरूपेणापि तत्रैव यत्नश्चरन्तीत्यर्थः
अयं च समाचारः आद्य विशेषो बौधायनानामेवेति कल्पतरौ यत्राग्नौकरणानंतरमेव पिंडदानं तत्रत्रये
शेषान्नं ब्राह्मणेभ्यो निवेद्येति वचनादग्नौकरणशेषं पितृपात्रे न दद्यात् यत्र त्वपिंडदानाभावस्त
त्राग्नौकरणशेषाभिघारितं हविः शेषं ब्राह्मणेभ्यो हस्ते दद्यात् तदन्नं च तेभ्य स्त्वायित्वा राममनं जुः प्रा
नद प्राविधाना द्वस्तदानमर्थ्यसिद्धं ततश्च प्रकृतमन्नपात्रार्थ्यसंपादितमन्नं दत्वान्नत्यागः कर्त्तव्यः अयं च
प्रकारो बाधयनीयमानमेव एवमनंगीकारे पूर्वापरवाक्याविरोधः प्रसज्येत ब्रह्मपुराणे ततो हुताज्ञा
मन्नं तेभ्यस्तत्र सायसाधिन तानग्नौकरणशेषमिति प्रयतः प्रार्थयेद्द्विजान् ओं जनस्थेति तैरुक्तो दक्षिणाग्नि
समाश्रयेत् दक्षिणाग्रान्प्रस्तरादिद्वन्द्वभीनास्तीर्य वा गयतः दद्यात्प्रसतमिधानिस्वसत्तासिन्प्रादेशमात्रि
काः शलाकाः सामिद्यर्थे प्रतियोज्याः सर्वकर्मसु हुतात्काश्चासमिथोद्धृत्याद्दक्षिणाग्राः समं त्रयःकाः मेक्षणे
न हुतान्तेन तज्जुहुयाद्दक्षिणीति वत्स वायुपुराणे दक्षिणतो वयेपितं सामायोत्तरतस्तथा । एतयोरंतरालि मे

ज्जुहुयाद्दैविवस्वते पलाशफल्गुन्यग्रोधाः प्लक्षाश्वत्थविकंकताः उदुम्बरस्तथा बिल्वश्चन्दनो यज्ञियाश्च ये सर
लो देवदारुश्च शालश्च खदिरस्तथा समिदर्थं प्रशस्ताः स्युरेते वृक्षा विशेषतः फल्गुकाकोडुम्बरिकाश्लेष्मा
तको नक्तमालः कपित्थः शाल्मलिस्तथा नीपो विभीतकश्चैव श्राद्धकर्मणि गर्हिताः गोभिलस्तु स्वाहा
कारं प्रथमन्तपवाद मेक्षणोपघातं जुहुयात् स्वाहा सोमाय पितृमते इति एवं स्वाहाग्नये कव्यवाहनाये
ति द्वितीयं अतऊर्ध्वं प्राचीनावीतीति अतऊर्ध्वमिति वचनात् होम उपवीतित्वमुक्तं मेक्षणोपघातं मेक्षणे
नैवादाय जुहुयादित्यर्थः आश्वलायनस्तु पिंडपितृयज्ञप्रकरणे प्राचीनावीतित्वं विकल्पितमाह प्रा
चीनावीतित्वमुपसंधाय मेक्षणेनादाय यादानमयदा जुहुयात् सोमाय पितृमते स्वधा नमोग्नये कव्यवा
हनाय स्वधा नम इति स्वाहाकारेण वाग्निं एवं यज्ञोपवीतीति यदा स्वाहाकारां तो मंत्रः तदाग्निं एवं जु
हुयात् उपवीती सन्नित्यर्थः अयं च विकल्पः शिष्टाचारवशाद्व्यवस्थितः प्राचीनावीतित्वपक्षे आश्वला
यनानामितरेषां नैवेषामिति स्वाहास्वधाकारादिविकल्पास्तु स्वशाखानुसारेण व्यवस्थिताः तथा च
कात्यायनः स्वाहा स्वधा नमः सव्यमपसव्यं तथैव च आहुतीनां तथा संख्यामावापस्वसूत्रतः इति एवं

३

मातामहकुलविषयं ब्राह्मणादीनां क्षत्रियादिदारसमुत्पन्नमातामहकुलविषयं ब्राह्मणादीनां क्षत्रियादिदारसमुत्पन्नपि-
तृकुलविषयं च एकत्रावयवानुवृत्तेरभावादसगोत्रानुवृत्तेरभावाच्च यत्तु शेषवचनं यद्येकजाता बहवः पृथक्क्षेत्राः भिन्न
मातृजनाः पृथक्जनाभिर्न जातीयाः नैएकपिंडाः सपिंडाः पृथक्शौचाः पिंडस्त्रिधावर्त्तते त्रिषु त्रिषु पुरुषमेव सापिंड्यमि-
ति एतद्भिन्नजातीयसापत्नमातृकुलविषयं तत्रापकृष्टजातीयानामुत्तमजातीयावयवसंयोगेनतत्त्वजातीयावयववियो-
[र]णमात् एवं पूर्वोक्तगुणविशिष्टा परिणेयेत्युक्तम् तत्रैतेषु विधिनिषेधेषु दृष्टगुणदोषा न सन्ति केवलशास्त्रैकसमधि-
गम्यास्ते यथा असपिंडा तु या मातु याऽमातुर्विसत्रया सह समधिगम्या गुणस्तदतिक्रमे च दोषोऽपि अत्रातिक्रांतशास्त्रस्य भार्यैव
पत नस्याभवति भार्याभाष्ट्रस्याहवनीयादिवत्संस्कारसाध्यत्वात् प्रायश्चित्तीयते च तथा पुत्रिकायाश्च न परिशूर्णभार्यात्वं प्रदा-
नाभावात् तथा गोत्रमपि दिन निवर्त्तते एवमासुरादिविवाहेष्वपि गोत्राप्तिः अत्रातेव पुंसः पत्निप्रतीचीऽस्ति मंत्रलिंगा न
च्च न परिशूर्णपुत्रिकार्यभार्यात्वं व्याख्यातं च निरुक्तिहृता अभ्रातृके च पुंसः पितृनेत्याभिमुख्ये संतानकर्मणो पिंडदा-
नायचेति वसिष्ठः अभ्रातृकापुंसः पितृनभ्येति प्रतीचीनं गच्छति पुत्रमिति यत्र पुनर्दृष्टगुणदोषदर्शनेन न विधिनिषेधा-
भिधानं यथा हीनक्रियामित्यादिना न तदतिक्रमे भार्यत्वाभावः किंतु नियमातिक्रमात्प्रायश्चित्तमात्रं भवति तथा प्रसि-

पा. ८१

८१

पातेविवाहस्त्वार्षेयगणमितिसन्निपातेसामान्यइत्यर्थः गोत्रभेदेपिप्रवरैक्यमस्ति तद्यथा संकृतिपूतिमाषतंडिशंबुशैवगा।
२ वानांगोत्राणांमांगिरसगौरिवीतसांकृत्येतिप्रवरैक्यं तथा यास्कवाधूलमौलमौकानां गोत्रभेदेपिभार्गववीतहव्यसा
वेदसेतिप्रवरैक्यं एतेषांमिथोविवाहोमाभूत्समानार्षग्रहणं यत्रतुप्रवरविकल्पः यथाआंगिरसांबरीषयौवनाश्वमां।
धात्रंबरीषयौवनाश्वेति तत्रास्तिप्रवरभेदः नतुगोत्रभेदः तन्निरासार्थमसमानगोत्रग्रहणंएवंप्रवरगोत्रयोः पृथक्
पृथक्उद्दासतिमिलितत्वंविज्ञेयं एवंमातामहात्परंपरयाअन्वयवानुवृत्ते निर्मर्यादत्वात्सर्वत्रनिषेधप्राप्ताववधिमाह याज्ञ।
वल्क्यः पंचमात्सप्तमादूर्ध्वंमातृतः पितृतस्तथा मातृतः मातृकुलेपंचमादूर्ध्वंपितृतः पितृकुलेसप्तमादूर्ध्वंसापिं
डींनिवर्ततइत्यर्थः पित्रादयः षट्सपिंडाः तस्यैवसप्तपुत्रादयश्चषट् आत्माचसप्तमः तथामात्रादयश्चत्वारः पुत्राद।
यश्चत्वारः आत्माचपंचमः संतानस्यभेदेपियतःसंतानभेदस्तमादायगणयेत् यावत्सप्तमोभवति पित्रादिबीजि
नोनियोगादिनायाकुलोनवे जातातत्रापिऊर्ध्वंसप्तमाज्ज्ञातायांविवाहः पितृबंधुभ्यः मातृबंधुभ्यः पंचमात् आहवा।
सिष्ठः समानार्षेयामसगोत्रमैथुनामवरसप्तर्षीभार्यांविन्देत पंचमेसप्तमेपितृबंधुभ्यइतिबंधुशब्दोपादानादयम
र्थोगम्यतेअन्येषांकुलादिस्येवब्रूयात् यच्चवसिष्ठोक्तं पंचमींसप्तमींचैवमातृतः पितृतस्तथेति तत्सवर्णासापन्ना।

म॰ दी॰ ८

एतासमसगोत्राच परिणेयेति सिद्धं यवीयसीवयसाप्रमाणेनच अरोगिणी अविकित्स्यनीयव्याधिरहिता भ्रातृमतीं पुत्रि।
काकरणशंकानिवृत्तये अत्रमनुः यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशंकयेति य
स्याः पिता पुत्रिकाकरणाभिप्रायात्रवेति न विज्ञायते नोपयच्छेदित्यर्थः एवंचयत्रशंका नास्ति तामुपयच्छेदित्यर्थादुक्तं भवा।
ति असमानार्षगोत्रजामृषिविद्मार्षप्रवर इत्यर्थः गोत्रं वंशपरंपराप्रसिद्धं आर्षंच गोत्रंच आर्षगोत्रे समाने आर्षगोत्रे यस्या।
सताहशाः तस्मादुत्पन्नाः समानार्षगोत्रजा अनेनैवं विधायाः समानार्षगोत्रजाता गोत्रप्रवरयोः पृथक्पृथक् पर्युदासेन निमित्तं परि
णीयस्य गोत्रात्तु समानप्रवरात्तथा त्यागं कृत्वा द्विजास्तस्यास्ततश्चान्द्रायणं चरेदिति पार्थक्येन परिगणनात् त्यागश्चोपभो।
गासैवनं तु तस्याः समानप्रवरां कन्यामेकगोत्रामथापि च विवाह्य पतितो मूढस्तस्यां वसामि निष्कृतिं उत्सृज्य तां ततो भार्यां
मातृवत्परिपालयेदिति ज्ञानात्तपस्मरणात् आपस्तंभः समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च तस्यामुत्पाद्य चंडालो ब्रा।
ह्मण्यादेव हीयत इति समानप्रवरस्वरूपं च बौधायन आह एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते तावत्समानगोत्रत्वमन्यत्र
भृग्वंगिरोगणात् समानगोत्रत्वं समानप्रवरत्वमित्यर्थः भृग्वंगिरोगणेषु विशेषमाह संग्रहकारः पंचानां त्रिषु सामा।
न्यादविवाहस्त्रिषु द्वयोः भृग्वंगिरोगणेष्वन्येषु शेषेष्वेकोपि वारयेदिति पंचार्षेयाणामृषित्रयानुवृत्तौ न मिथो विवाहः आर्षे।
याणामृषिद्वयानुवृत्तौ न मिथोपि विवाहः आर्षेयाणामन्येषु शेषेष्वेकानुवृत्तावपि न हि विवाह इत्यर्थः बौधायनोपि द्व्यार्षेयस्त्र्या। ८

वि

नित्योपासनादिदानकर्मनिष्पत्त्यर्थं पूर्वोक्तगुणरहितापि परिणेया स्यात् तस्माद्भूदिति दारकर्मग्रहणं तनुचर्यंकत्वं सागता
भर्तुः पिण्डगोत्रे च सूतक इति मातृगोत्रांतराभावादसपिंडायामातुरिसेतावनेवालं किमिति चकारान्मातुरसगोत्राग्रहणं।
हृतं मनुष्याउच्यते सत्यमेव तथापि दत्तपुत्री यस्य माता भवति सा च पुत्रिकाकृत्वा दत्तपुत्रीप्रतिग्रहीताश्ययमेव मम पुत्रस्था
नीयेति तदा तस्य परिणेतुर्दत्तपुत्रीप्रतिगृहीतृसपिंडाश्च सपिण्डा भवतीति तत्र परिणयो मा प्राप्नोदिति चकारेण मा
तृसगोत्रापरिणेयेत्युच्यते उक्तादत्रिमाणां जनकगोत्रादिनिवृत्तावसगोत्रादिप्राप्तिर्मनुना गोत्ररिक्थे जनयितुर्न भजेद्दत्त्रि
मासुतः गोत्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधेति एवं तर्हि असपिंडायामातुरिति न वक्तव्यं चकारबलभ्या सगोत्राग्रहणेन
असपिंडायाश्च विप्राप्तत्वात् वाढं सपत्नमातृपितृकुलजा सपिंडमातृसगोत्रापि भवति मातृसपिंडा चेति तत्र विवाहप्राप्तावि
दमुच्यते मातुरसपिंडेति तथा च सापत्नमातृसपिंडेष्वपि तुल्यादिव्यवहारं दर्शयति सुमंतुः पितृपत्न्यः मातरस्तद्भ्रातरो मा
तुलास्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि अन्यथा संकरकारिकाः स्युरिति असगोत्रा च या पितुरित्यत्र चकारेण पितु
रसपिंडायाग्रहणं न कर्तव्यं असगोत्रापदेनैव लभ्यत्वात् उच्यते यस्य पिता दत्त्रिमपुत्रस्तस्य दत्त्रिमस्य यज्जनककुलं तत्रजाता प
रिणेतुः पितुरसगोत्रा दानेन जनकगोत्रनिवृत्तत्वात् एवंविधायाः पितुरसगोत्राया विवाहप्रसक्तौ चकारेणेदमुच्यते पि
तुरसपिंडा ग्राह्येति यद्येवं नाभविष्यत् असगोत्रा च यान्म नइत्येवावक्ष्यत् तस्मान्मातुरसपिंडाश्च सगोत्रा च पितुरसपि

म॰ प॰ ३९

गृहीतां असपिंडां समान एकः पिंडः यासां यस्यासां सपिंडा न सपिंडा असपिंडा तां सपिंडता चैकशरीरावयवान्वयेनेति निरू
पितं प्राक् अदत्तु इति अपि असपिंडा च या मातुः असगोत्रा च या पितुः सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने अस्यार्थः या मातुः
सपिंडा च कारात् असगोत्रा च याच पितुः असगोत्रा च वा दारा सपिंडश्च सा दारकर्मणि मैथुने च प्रशस्ता परिणयनार्हेत्यर्थः एतदु
क्तं भवति अनुलोमक्रमेण द्विजातीनां सवर्णापाणिग्रहणम् समंत्रकं क्षत्रजादिकन्यकापरिणयो विहितः तत्र च सवर्णा
विवाहो मुख्यः उत्तरस्त्वनुकल्पः सदारस्य विहितं कर्मद्वयमेकं यज्ञादिकं अपरं निधुवनं यज्ञादिके तु सवर्णया दारैः स
हितस्यैवाधिकारः सवर्णायास्तु वयसा वर्णानुज्येष्ठत्वेन तस्यां सत्यामसत्याम् अनधिकारात् असत्यां ज्येष्ठायां नित्ययज्ञा
दिकेष्वाऽसवर्णासहितस्यापि गौणाधिकारो न काम्येषु तथा ज्येष्ठापरित्यागेनासवर्णाग्रहणनिषेधाच्च स्मृतेस्तु विवाहितास्वनि
यमः एवं स्थिते दारकर्मणि मैथुने इत्यत्र गोबलीवर्दन्यायेन दारकर्मशब्दो मैथुनव्यतिरिक्तेषु यज्ञादौ वर्तते तथा च दारक
र्मणि प्रशस्तेत्युक्ते यज्ञादिकर्मणि सवर्णाया एवाधिकारात् द्विवाहम् एवं असपिंडा तु या मातुरित्यादि आद्यं स्यात् न तु सवर्णावि
वाहे तात्र हि हत्सर्वं मैथुनपदग्रहणं एवं वासवर्णापरिणये अपि पूर्वोक्तं वा कामनुषज्यते यदि मैथुने प्रशस्तेत्युच्यते तदा तस्मि
न्कर्मणि पूर्वोक्ताग्राह्या नान्येति स्यात् तत्रश्चाश्रमी न तिष्ठेत क्षणमेकमपि द्विज इति हननसमावर्त्तनस्य पंच महायज्ञा ३९

सर्वोत्रासमएवन्तुविशेषेतः दारान्सर्वेवयत्नेनन विशुद्धानुद्वहेत्ततः विशुद्धांकुलतोद्यतश्च याज्ञवल्क्यः अविप्लुतब्रह्मचर्योल।
क्षणांस्त्रियमुद्वहेत् अनन्यपूर्विकांकांतामसपिंडांयवीयसीं अरोगिणींभ्रातृमतीमसमानार्षगोत्रजां अविप्लवलितब्रह्म
चर्योवाग्नौ। पंतरलक्षणायुक्तांस्त्रियमुद्वहेत बाह्यलक्षणानिमनुराह अव्यंगांगीं सौम्यनाम्नीं हंसवारणगामिनीम् तनुलो
मकेशदशनांमृद्वंगीमुद्वहेत्स्त्रियामिति याज्ञवल्क्यन्तराणिसान्दिग्धानिचतज्ज्ञानोपायआश्वलायनोक्तो द्रष्टव्यः अथदुर्विज्ञे
यानिलक्षणानि अष्टौपिंडान्कृत्वा ऋतमग्रेप्रथमंजज्ञेऋतेसत्यंप्रतिष्ठितं यदियंकुमार्यभिजाता तदियमिहप्रतिपद्यतां यत्सत्यं
तद्दृश्यतामिति पिंडानभिमंत्र्यकुमारींब्रूयादेषामेकंगृहाणेति क्षेत्राच्चेदुभयतःसस्याद्गृह्णीयात् अन्नवत्यस्याःप्रजाभविष्य
तीतिविद्यात् गोष्ठात्पशुमती वेदिपुरीषाद्ब्रह्मवर्चस्विनी अविनाशिनोह्रदात्सर्वसम्पन्ना देवनात्कितवी चतुष्पथाद्द्विप्रव्राजिनी।
इरिणादधन्या श्मशानात्पतिघ्नीति अस्यार्थः ऋतमग्रइत्यारभ्य यत्सत्यंतद्दृश्यतामित्यंतेनमंत्रेणाष्टसुपिण्डाभिमंत्रणंकुर्या
त्. मृदाहरणस्थानमाह क्षेत्राच्चेतिपार्श्वद्वयेपिसस्यपरिपूर्णात् क्षेत्रादाहृतायाम्मृत्तिकाकृतंपिंड यदिगृह्णातितदाअस्याः
प्रजाअन्नवतीभविष्यतीतिविद्यात् एवंगोष्ठादिष्वेवमादि वेदिपुरीषं वेदिमृत्तिका देवनंद्यूतस्थानम् द्विप्रव्राजिनी द्वि
यंप्रव्रजनशीला स्वैरिणीतियावत् इरिणमूषरं अधन्याधनरहितेत्यर्थः अनन्यपूर्विकं दानेनोपभोगेनवापुरुषांतरायवि।

म॰
प॰
३८

तर्हि अस्मत्पक्षेपि एकमेव निमित्तमिति ततोपि लाघवं तत्रैकशरीरावयवान्वयित्वमेव अवयवान्वयश्च पित्रादिष्ववय
वानां समवायिकारणत्वेन पत्न्यादिषु एकशरीरावयवानां साक्षात्परंपरया वा अधिकरणत्वेन निमित्तैक्याल्लाघवकल्पना
गौरवं चन्नार्हितमाचार्यैः कल्पनालाघवं यत्र तत्पदं रोचयामहे तदेव कृतनरत्रेति निपुणैः संप्रदायतामिति ततश्च नि
र्णयं पंकजादिवद्योगरूढोयं शब्दः शरीरावयवान्वयश्च श्रुतौ श्रूयते आत्मा हि जज्ञ आत्मन इति तथा प्रजामनु प्रजाय।
स इति तथा गर्भोपनिषद्यपि एतत्षट्कौशिकं शरीरं त्रीणि पितृतः त्रीणि मातृतः अस्थिस्नायुमज्जानः पितृतः त्वङ्मांस
रुधिराणि मातृत इति आपस्तंबोपि स एवायं विरूढः प्रत्यक्षेणोपलभ्यत इति मत्स्यपुराणेक्तन स्पत्वयमर्थः लेपभा
जश्चतुर्थाद्याः प्रपितामहपितामहचतुर्थः तदाद्यः प्रतिलोमक्रमेण त्रयो लेपभाजः पिंडदाने कृतवतः स्वेषाजस्तह्
स्तलेपं ऊपोशुदत्तं भजेत इति पित्राद्याः पिंडभागिनः पिंडदाने देवताभूता पिण्डदः सप्तमस्तेषां पिंडदाता सप्तमः सा
पिंडे साप्तपौरुषं एतान्सप्तपुरुषानात्मा पिंडं प्राप्नोतीत्युक्तं भवति ननु सापिंडे पूर्वोक्तं लेपभाक्त्वादिकं निमित्तमिति न
यामतिपूर्वोक्तगौरवदोषापत्तेः अतोस्मदुक्तमेव युक्तं अथ प्रकृतमनुसरामः तत्र मनुः वेदानधीत्य वेदौ वा वेदं वापि यथा।
क्रमम् अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाश्रयेत् उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् कश्यपः दाराधीनाः क्रियाः

सीदामोदाक्लृप्तं पंडितभूमरः अथ ब्रह्मचारिसत्वकानंतरं क्रमप्राप्तो गृहस्थस्तवस्थारभेत तत्रोपयुक्ता सापिंड्यमी-
मांसा प्रथमं प्रक्रम्यते तच्च सापिंड्यं केचिदेवं वर्णयंति एकस्मात्पिंडदानक्रियायां दातृत्वेन यजमानस्य देवतात्वेन पितृपि-
तामहप्रपितामहप्रपितामहानां लेपभाक्त्वेन प्रपितामहस्य पितृपितामहप्रपितामहानां यजमानादिभार्याणां प्रत्या-
महकर्तृत्वेनैकशरीरारंभकत्वेन च भ्रातृभार्याणां परस्परमेकशरीरावयवैः सहैकशरीरारंभकत्वेन च यजमानप्रभृति
पितृपरम्परायां सप्तपुरुषावधिकसंततिजातानां मध्ये केषांचित्पिंडदेवतात्वेनोद्दिश्यमानान्वयेन केषांचिल्लेपभाक्त्वेनोद्दि-
श्यमानान्वयेन वेति दात्रादिषु च सापिंड्यविषये मत्स्यपुराणवचनमप्युदाहरंति लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभा-
गिनः पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषमिति अत्र ते प्रष्टव्याः कलनालग्रुरुभावयोः कोवाज्यायानिति यदि कल्प-
नागौरवं ज्यायः तर्हि सपिंडशावप्रवृत्तेः पूर्वोक्तनिमित्तान्यवस्यः अथ कल्पनालाघवं ज्यायः तत्रैव यंत्वस्तु पिंडो देहः समा- मः=
नएकः पिंडो देहो यस्य स सपिंडः तस्य भावः सापिंड्यं तच्च पुत्रादीनामेकशरीरावयवान्वयेन पत्न्यादीनां भ्रातृभार्यादीनां
चैकशरीरारम्भकत्वेनैकशरीरावयवान्वितैः सहैककार्यकर्तृत्वेन च भवति एवं च शावप्रवृत्तेर्निमित्तत्रयमेवांगीकृतं स्यात्
अथैवं मन्येथ एकपिंडदानक्रियान्वयित्वमेकपिंडदानक्रियान्वयान्वयित्वं वेति निमित्तद्वयमेवेति न कल्पनागौरवमिति

म॰
पा॰
२८

अटव्यादिषु यदि वज्राणकामो वैसेयात नर्कः सदा व्रजेत् नोर्ध्वं न तिर्यग्गूर्ध्वं वा निरीक्षन्पर्यटेद्बुधः युगमात्रं महीपृष्ठं नरो गा।
च्छेद्विलोकयन् तथा नद्युत्तरेयान मारोपेत्कूलच्छायां न संश्रयेत् नैकः सुप्यादशून्यगेहे न तत्र समृद्धगृहे वसेत् नासहायो
व्रजेद्रात्रौ नोत्पथेन चतुष्पथे वसिष्ठः अग्निब्राह्मणांतरेण पेयात् नाग्न्योर्नब्राह्मणयोर्न्तगुरुशिष्ययोः अनुज्ञाप्य वा व्यपेया
त् न बाहुभ्यां नदीं तरेत् न नावं सांशयिकीमारुहेत् आपस्तम्बः प्रतिमुखमग्निमाह्रियमाणं प्रतिष्ठितं भूमौ प्रदक्षिणी।
कृत्याभ्युपयात् ब्रह्मचारिकप्रकरणे स्नातकप्रकरणे च ये साधारणधर्मा अभिहितास्ते अनिषिद्धा गृहस्थादीनामपि भवंत्येव
उक्तं वक्ष्यमाणाश्रमोपयोगित्वात् ब्रह्मचर्यस्वरूपं तद्भेदश्च प्रदर्श्यते तत्राह हारीतः ब्रह्मचर्याष्टमः अप्रार्थनमस्मरणमसं
कल्पनमनभिप्रेक्षणमसंकीर्तनमनभिभाषणमनभिगमनमसन्दर्शनमसमागमश्चेति अप्रार्थनं मा मे भूयादित्स्मा
णाविरहः असंकल्पनमेवं करिष्यामीत्यभिधानाभावः अनभिप्रेक्षणमभिमुखेनानावलोकनं असन्दर्शनं सकलावय
पवलोकनाभावः तच्च ब्रह्मचर्यं चतुर्विधं भवति कृष्णं रक्तं शुक्लं विमलमिति तत्र परदारवर्जं नित्यं स्वदाराभिगमनं कृष्ण
पर्वनियमवर्जितं देवरक्तं ऋतुकामाभिगमनं शुक्लं ऊर्ध्वरेतस्त्वं विमलं एवं स्याह कृष्णेन भौमायेलोकान्मध्यमं रक्तेन जयेत्
शुक्लेन तु जयेत्स्वर्गं विमलान्मोक्षमाप्नुयात् अष्टमदनयादि जाते मदनादिनिपालदानजलद्रदृढस्तवको यमायप्रा। २८

अन्तेपारदार्यं च तथा भक्ष्याभक्षणम् अगम्यागमनं चैव हिंसा स्तेयं तथैव च अश्रौतकर्माचरणं मैत्रं धर्मबहिष्कृतं एता
नि चैव कर्माणि वर्जयेन्मानवः सदा अथ निवासस्तत्र बृहस्पतिः भूरिमालज्जुषा योत्र गाप्याम्बुद्विजनैर्गमे निष्कंठके धा
र्मिके चव देशे स्थाने निरामये नोर्मिवाणिकः एककूपोदके ग्रामो ब्राह्मणो वृषलीपतिः वर्षेणाच्छूद्रो भवति ब्रह्मस्वर्णमुपस्थि
तः व्यासः धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पंचमः पंच यत्र न विद्यंते न तत्र दिवसं वसेत् मार्कंडेये जितामित्रो नृपो यत्र ब
लवान्धर्मतत्परः तत्र नित्यं वसेत्प्राज्ञः कुतः कुनृपतौ सुखं यस्मिन्कृषीबला राष्ट्रे प्रायशो नातिभोगिनः यत्रौषधान्यशेषाणि
वसेत्तत्र विचक्षणः प्रीयमाणा नरा यत्र प्रयच्छेयुरवाचितं स्वस्थ विन्नो वसेत्तत्र कृतकृत्यः ऽवान्सवान् दंडो यत्राविनीतेषु स
त्कारः सुकृतात्मसु चरेत्तत्र वसेद्यत्नवधर्मशीले तु साधुषु देवलः अरण्ये देवतास्थाने तीर्थान्यायतनानि च तस्मात्तेषु वसेन्नो
कात्यातिनाकं दिवौकसाम् अरण्यं नैमिषादि तीर्थं गंगादि आयतनं माविमुक्तादि अथ ग्रामे न वसेत् तत्र मनुः नाविनीतै
र्व्रजेद्धुर्यैर्न च क्षुद्व्याधिपीडितैः न भिन्नशृंगाक्षिखुरैर्न वालधिविरूपितैः विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षणान्वितैः वर्णरूपो
पसंपन्नैः प्रतोदेनातुदन्भृशम् नातिकाल्यं नातिसायं नातिमध्यंदिने स्थिते नाज्ञातेन च संगच्छेन्नैको न नृपलैः सह तथा
गोयाचयाने प्रष्टेन सर्वथैव विगर्हितम् विष्णुः नैको ध्वानं प्रपद्येत नाधार्मिकैः सार्कं विष्णुपुराणे वर्षातपादिषु छत्री दंडी रा।

म॰ प॰ २८ येनृणा अथानवलोकनीयास्तत्र विष्णुः नोद्यंतमादित्यमीक्षेत नास्तं यांतं नोपरक्तं न वाससा तिरोहितं न चादर्शे जलाद्युप
गतं न मध्ये ह्नि याज्ञवल्क्यः नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनं न च मूत्रं पुरीषं वा न शुचीराहुतारकाः मार्कंडेये दे
वतापितृसच्छास्त्रयज्ञ समस्तादिनिंदकैः कृत्वा तु स्पर्शमालापं शुद्ध्येतार्कावलोकनात् अवलोक्य तथोदक्यामंत्यजं पतितं शठम्
विद्धस्तसूतिकाषंढविवस्त्रांत्यावसायिनः मृतनिर्यातकांश्चैव परदाररतांस्तथा एतदेव हि कर्तव्यं प्राज्ञैः शोधनमात्मनः
स्कांदे कृतघ्नमानवं दृष्ट्वा नरकेष्वपि उत्सितं शुद्ध्यर्थं देव द्रष्टव्याः सोमानलदिवाकराः सोमादीनां यथासंभवो विकल्पः ॥
विष्णुः न क्रुद्धस्य गुरोर्मुखं न तैलोदकयोः स्वां छायां मलवसोदर्शे न पत्नीं भोजनसमये न स्त्रियं नग्नां नाकिंचन गृहमा
तं न बालोन्मुष्टं ऊंजरं न वा विषमस्थो वृषादियुद्धं नोन्मत्तं न मत्तं मनुः नाश्नीयाद्भार्यया सार्धं नैनामीक्षेत चाश्नतीम्
अ॰ तुवतीं नेत्रमज्ञ्याणां च न वासीनां यथासुखं नांजयंतीं स्वके नेत्रे न चाभ्यक्तामनावृताम् न पश्येत्प्रसवंतीं च तेजस्कामो द्विजो
त्तमः अथो उलकवाणि तत्र यमप्राणानानपव्यासाः देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च कुलान्यकुलतां यांति ब्राह्म
णातिक्रमेण च यमः गोभिरश्वैश्च यानैश्च कृष्याराजोपसेवया अयाज्ययाजनेनैव नास्तिकेन च कर्मणा कुलान्यकु
लतां यांति यानि हीनानि मंत्रतः मंत्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि कुलसंख्यां च गच्छंति कर्षंति च महद्यशः

मनुः ऋत्विक्पुरोहिताचार्यमातुलातिथिसंश्रितैः बद्धबालातुरैर्वैद्यैर्ज्ञातिसंबंधबांधवैः

दत्तेसुकृतंतेषांयेवैयत्रिवदंतितं मातापितृभ्यांजामीभिर्भ्रात्रापुत्रेणभार्यया दुहित्राचास्ववर्गेणविवादंनसमाचरे
त् नचवादंवदेदुष्टंनदीनांनचकर्कशम् अथनाक्रमणीयानिमनुष्यदिष्टेयानिच तत्रमनु देवतानांगुरोराज्ञः स्नातका।
चार्ययोस्तथा नाक्रमेत्कामतश्छायांबभ्रुणोदीक्षितस्यच बभ्रुः कपिलः यमः स्वांतुनाक्रमयेच्छायांक्लीबेन्नृपति।
तेनच चंडालेनद्विषद्भिस्थानितंरोगान्वितेनच याज्ञवल्क्यः देवर्त्विक्स्नातकाचार्यराज्ञांछायांपरस्त्रियः नाक्रामेद्र।
क्तविण्मूत्रष्ठीवनोद्वर्तनानिच मनुः मध्यन्दिनेर्धरात्रेच श्राद्धंभुक्त्वाचसामिषम् संध्ययोरुभयोश्चैवनासेवेतचतुष्प।
थं उद्वर्तनमपस्नानंविण्मूत्रेरक्तमेवच श्लेष्मनिष्ठ्यूतवांतानिनाधितिष्ठेत्तकामतः वैरिणंनोपसेवेत सहायंचैववैरि
णः अधार्मिकंतस्करंचपरस्यचयोषितः उद्वर्तनंकृतमलायकर्षणंउउमादि अथस्नानंस्नानेयच्चजलं निष्ठ्यूतमु
द्गीर्णंतांबूलादि श्लेष्मणालाग्विति नोद्धतउरुहकेसहैकत्रतिष्ठेत् उद्धतोविनीतः उरुहकोवशाकरणादिनिष्टः विष्णुः नचा।
तुषमथमाभितिष्ठेत नराज्ञोद्धत्समूलंनभूत्साग्रलयेनतृणंनचेषेनागारं हारीतः आवपनापमार्जनापस्नानतुषभस्मास्थि
कपालसंचयेनाधितिष्ठेत् आपवनेगोणादिमाणं अथमार्जनेमार्जनोपयुक्तंउमादि कपालेसर्वर्परः विष्णुपुराणे ध्वज
देवध्वजज्योतिश्छायांनातिक्रमेद्बुधः देवीपुराणे नचैवगोःप्रसूतायाविष्मेस्त्रीजनस्यच नमुखेनधमेदग्निंनखड्गंलेय

म. पा. २६

म्सधीयीतमासान्विप्रोर्धपंचमः अर्थः पंचमोमासोयेषां उपाकर्मप्रभृतिअर्धसहितांश्चतुरोमासान् शुक्लपक्षेषुस्वा।
ध्यायपदिनेषुस्वाध्यायमधीयेतेत्यर्थः एतच्चग्रहणाध्ययनंगृहस्थस्यापिभवति तथाचशौनकः समाहृतोब्रह्मचारिकल्पेन
यथान्यायमितरेजायोपेयीसेकइति इतरेब्रह्मचारिणः जायोपेयीगृहस्थः अपिशब्दोभाद्रपदश्रवणहस्तपंचमीनामुपल
ग्रहः तथाचबह्वृचगृह्यपरिशिष्टकारिका अविष्टमोषधयस्तास्मिन्मासेनभवंतिचेत् तदाभाद्रपदेमासिश्रवणेनत
दिष्यते गोभिलः प्रौष्ठपदीहस्तेनोपकरणंप्रौष्ठपदीप्राप्येत्यर्थः शौनकः तच्चार्षिकमित्येतदाचचतइतिवर्षाकाले
भवंवार्षिकं बौधायनः श्रावण्यांपौर्णमास्यामाषाढ्यांवोपाकृत्यछन्दांस्यधीयेतेतिनिगमः श्रावण्यांश्रावणीकर्मयथा
विधिसमाचरेत् उपाकर्मतुकर्त्तव्यंकर्कटस्थेदिवाकरे हस्तेनयुक्तपंचम्यांश्रावण्यांश्रवणेनचेति अत्रस्वस्वगृह्यानुसा।
रेणव्यवस्थेतिसाधारणनिर्णयः तत्रापिऋक्शाखिनांश्रवणे यजुःशाखिनांपौर्णमास्यां तत्रापितैत्तिरीणामौदयिके
पर्वणिइतरेषांतुपूर्वविद्धेपर्वणि सामगानांचहस्ते अयंचानिर्णयः श्रवणादिप्राधान्यनिर्देशाक्रमते असतिग्रहसंक्रान्त्यादि।
प्रतिबंधेश्रावणेमास्येवतत्रेप्रतिबंधेप्रौष्ठपद्यामुभयत्रापिप्रतिबंधसद्भावेयदिस्वशाखायांस्थगाग्राहिकायांननिषेधस्तदा
जं गमनेपापंव्यपोहंतिद्विजातयः पीत्वासकृत्सुतप्तंपंचसप्तरात्रंकुशोदकमिति अकामतःसंवर्तोक्तं पशुवेश्याभि
गमनेप्राजापत्यंविधीयतइति सामान्यप्रायश्चित्तान्यपिज्ञानाज्ञानाभ्यांसापेक्षयायोज्यानिअत्रविशेषमाहलौगा २१२

रितितेपंचतपोभ्रावकाशजलशायनाद्यनुतिष्ठेयुः ग्रीष्मवर्षाहेमंतेषु मासंयवगोमूत्रयावकमश्नीयुरि
ति शंखोक्तात्कृच्छ्रमप्यस्मिन्नेव विषये प्रातिलोम्येन दृष्टो शूद्रस्यैव यथैव परिविन्दकयाजनेकन्याप्रदेनत
स्यैव कौटिल्यं व्रतलोपनं आत्मनोर्थे क्रियारम्भो मद्यपस्त्रीनिषेवणं स्वाध्यायाग्निसुतत्यागो बांधवत्याग एवे
त्यादीमनुयाज्ञवल्क्याद्युक्तोपपातकसाधारणप्रायश्चित्तानि सर्वत्र योज्यानि अत्र स्वाध्यायत्यागः सब्रह्मस्व
त्वाक् .... योषणां व्यग्रतया प्रकारांतरेण त्यागे ब्रह्महत्यासमत्वं अग्नित्यागे तु अनाहिताग्निनां श्रेकरणोपि दि
तम् अथ इमकृदेमनुः फलिनानां तु वृक्षाणां छेदने जप्यमृक्शतं गुल्मवल्लीकृतानां च पुष्पितानां च वी
रुधां आहवनीयर्यं च महायज्ञाद्यदृष्टार्थत्वेन तु न दोषः दृष्टार्थे चापि कश्चिद्दम्यन्तुरो दर्शयति वसिष्ठः फलद
त्वोपगर्वाद्यान्नर्हिंस्यात्कर्षणकरणार्थं दोषहिंस्यादिति शूद्रादीनां तु जपानंतरं कारा हिरात्रादिकं कल्प्यम्
अभ्यासे पित्तयोपपातकसाधारणप्रायश्चित्तान्यपि योज्यानि स्त्रीहिंसापथजीवनं हिंस्रयंत्रविधानं च व्यसनानी
त्येतेषु पूर्ववदुपपातकसाधारणप्रायश्चित्तानि योज्यानि व्यसनाभ्यासे बौधायनोक्तं अथाशुचिकराणि भूतम
भिचारः अनाहिताग्नेरुञ्छवृत्तिः समाहृतस्य भैक्ष्यचर्या तस्य गुरुकुले वासऊर्ध्वं चतुर्भ्यो मासेभ्यो तच्चर्या तस्य गुरु

णार्थे तत्संख्यानाधिकहनने प्रायश्चित्तमपि तथा कल्प्यं तथा मार्कण्डेयोदानजलमंडूकश्च पतत्त्रिणः हत्वा त्र्यहं पिबे।
त्क्षीरं कृच्छ्रं वा पादिकं चरेत् मनुः पयः पिबेत्त्रिरात्रं वा योजनं वाध्वनो व्रजेत् उपस्पृशेत्स्रवन्त्यां वा सूक्तं वाब्दैवतं जपेत्॥ उप
स्पर्शः स्नानं एतच्चाकामतः कामतो द्विगुणं कामतोऽभ्यासे वा सिंह श्वमार्जारमंडूकनकुलसर्पदहरमूषकान्ह
त्वा कृच्छ्रं द्वादशरात्रं चरेत् किंचिच्च दद्यादिति दहरः बुबुन्दिरल्पमूषिका वा एतच्च प्रत्येकवधे समुदितानेक
वधे त्वमनुक्तं षाण्मासिकं मनुः हत्वा हंसं बलाकां च बलाकां च बकं च बर्हिणमेव च वानरं श्येनभासौ च स्पर्शये
द्ब्राह्मणाय गां क्रव्यादस्तु मृगान्हत्वा धेनुं दद्यात्पयस्विनीम् अक्रव्यादो वत्सतरीमुष्ट्रं हत्वा तु कृष्णलम् याज्ञ।
वल्क्यः गजे नीलवृषाः पंच शुके वत्सो द्विहायनः खराजमेषेषु वृषो देयः क्रौंचे द्विहायनः उरगेष्वायसो द
ण्डः पण्डके त्रपुसीसकं कोले हते घटो देय उष्ट्रे गुंजा हयेऽंशुकं पण्डको नपुंसकः स च मृगपक्षिरूपप्रकरणात्
ब्राह्मणादिरूपं त्रपुसीसकं वा माषपरिमितं तथा च मनुः अभ्रिं कार्ष्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तमः पाला
लभारकं षण्ढे सैसकं चैव माषकमिति पलालभारः सैसकमाषयोर्विकल्पः याज्ञवल्क्यः तित्तिरौ तु तिल
द्रोणं गजादीनामशक्तौ दानं दातुं चरेत्कृच्छ्रमेकैकस्य विशुद्धये कृच्छ्रमित्युपलक्षणं अतः प्राजापत्ये

प्रा॰ पा॰
३२२ तयाकृच्छ्रादिकं योऽतृतीयम् अष्टमुष्टिर्भवेत्किंचित्किंदेष्टेत पुष्कलं पुष्कलानि तु चत्वारि आढकः परिकीर्तितः च
तुराढको भवेद्द्रोण इत्येतन्मानलक्षणम् याज्ञवल्क्यः फलपुष्पान्नरसजसत्त्वघाते घृताशनं किंचित्सास्थिवधे दे
यं प्राणायामस्त्वनस्थिके घृताशनमाहारोमरत्यागेन यत्र प्रायश्चित्तविशेषो नाम्नातस्तत्र किंचित्सास्थिमतद्वये
तन्ज्ञेयं पराशरः हंससारसचक्राह्वक्रौंचकुक्कुटघातकः मयूरमेषो हत्वा च एकभक्तेन शुध्यति मण्डूकचटिटिभश्चै
व शुकं पारावतं तथा आडिंगं चटकं हत्वा शुध्येद्दैनक्तभोजनात् चाषकाककपोतानां सारीतित्तिरिघातकः अं
तर्जले उभे संध्ये प्राणायामेन शुध्यति गृध्रश्येनविहंगानां मूल्यकस्य च घातकः अपक्वाशी दिनं तिष्ठेद्द्वौ कालौ
मारुताशनः हत्वा मूषकमार्जारसर्पाजगरडुण्डुभान् कृसरं भोजयेद्विप्रांल्लोहदण्डश्च दक्षिणा सैथकाहषगो
धानां शशकशल्यकघातकः हेताकफलं रंजाशी अहोरात्रेण शुध्यति मृगरोहिवराहाणाम विकावस्त घात
तके वृत्तजं बूककरूलाणां तरक्षूणां च घातकः तिलप्रस्थं तु सोदद्याद्वायुभक्षो दिनद्वयम् गजमेषतुरंगोष्ट्र
वयानां निपातने प्रायश्चित्तं महोरात्रं त्रिसंध्यं चावगाहनं खरवानरसिंहानां चित्रव्याघ्रस्य घातकः शुद्धिमेति त्रि
रात्रेण ब्राह्मणानां च भोजनेनेति याज्ञवल्क्यः पुंश्चलीवानरखरैर्दष्टश्चोष्ट्रादिवायसैः प्राणायामं जले कृत्वा ३२२

घृतं प्राश्य विशुध्यतीति घृतप्राशनं भोजनप्रत्याम्नायः मनुः श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च न
राश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यतीति एतदशक्तविषयम् शक्तस्य कल्प्यं यत्तु स्मृत्यन्तरवचनं श्वसृगालास्त्रा
गमहिषाजाविकाखरकरभनकुलमार्जारमूषिकाप्लवकाकपुरुषदष्टानामापोहिष्ठीयाभिः स्नानं प्राणायामं
चेति तन्नामापोहिष्ठीयाभिः स्नानं प्राणायामं चेति तन्नाभेरधः ईषद्दष्ट विषयं सम्यग्दष्टविषये तु अंगिरसोक्तं
ब्रह्मचारी शुनादष्टस्त्र्यहं सायं पयः पिबेत् गृहस्थश्चेद्द्विरात्रं तु एकाहं याग्निहोत्रवान् नाभेरूर्ध्वं तु दष्टस्य तदेव द्वि
गुणं भवेत् स्यादेतत्त्रिगुणं वक्त्रे मस्तके तु चतुर्गुणमिति क्षत्रियादिषु पादोनं कल्पनीयं स्त्रीविषये तु पराश
रोक्तं ब्राह्मणी तु शुनादष्टा जंबुकेन वृकेण वा उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेदिति ब्राह्मणी तु उपल
क्षणं व्रतस्थिताया विशेषस्तेनैवोक्तः त्रिरात्रमेवोपवसेत् शुनादष्टा तु सव्रता सघृतं यावकं भुक्त्वा व्रतशेषं समा
पयेदिति सव्रतेत्यत्र लिंगमविवक्षितं अनुपादेयगतत्वात् पुलस्त्यः रजस्वला यदा दष्टा श्वानजंबुकरासभैः
पंचरात्रं निराहारा पंचगव्येन शुध्यति ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं तथा चतुर्गुणं स्मृतं मूर्ध्नि दष्टे त्वन्यत्राशुचि
र्भवेत् अन्यत्रापि रजस्वलावस्थायां शातातपः शुनाघ्राताऽवलीढस्य नखैर्विलिखितस्य च अद्भिः प्रक्षालनं ।

म॰ पा॰
२२३

गोवधमितिनाचापचूलुक्रमिति उपस्थलनेतापनं भानुः ब्राह्मणस्यव्रणसंस्थस्यपूयशोणितसंभवे क्रिमिरुत्पद्यतेयस्यप्रा
यश्चित्तंकथंभवेत् गावांमूत्रपुरीषेणत्रिसंध्यंस्नानमाचरेत् त्रिरात्रंपंचगव्याशीत्वधोनाभ्यांविशुद्ध्यति नाभिकंठांतरो
द्भूतेव्रणेचोत्पद्यतेक्रिमि षड्रात्रंतुतदाप्रोक्तंप्राजापत्यंशिरोव्रणेइति तद्वियादिषुपादपादोनकल्प्यं श्वादिदंशनिमि
त्तत्रयेषुपूयविनिःसरणेश्वादिदंशनिमित्तपूयादिनिःसरणप्रायश्चित्तं अथजकीर्णप्रायश्चित्तानि तत्रयाज्ञवल्क्यव
चनानिप्रधानीकृत्याभिधीयते प्राणायामेजलेस्नात्वाखरयानोष्ट्रयानगः नग्नःस्नात्वाचभुक्त्वाचगत्वाचैवदिवा।
स्त्रियं खरयुक्तयानेरथादि एवमुष्ट्रयानं स्त्रियंत्वस्त्रियं इदंचकामकृते उष्ट्रयानंसमारुह्यखरयानंतुकाम
तइतिमनुस्मरणात् अकामतःस्नानमात्रं उभयत्राभ्यासेकल्प्यं मात्रातत्वरोष्ट्रारोहणेपितद्विगुणावृत्तिःक
ल्प्याः गुरुंत्वंकृतहुंकृत्यविप्रंनिर्जित्यवादतः बद्ध्वावावाससाक्षिप्रंप्रसाद्योपवसेद्द्विजम् अभ्यासेयमोक्तं वादे
तब्राह्मणंजित्वाप्रायश्चित्तविधित्सया त्रिरात्रोपोषितःस्नात्वाप्रणिपत्यप्रसादयेत् इति तथा विप्रदंडोद्य
मेकृच्छ्रस्त्वतिकृच्छ्रोनिपातने कृच्छ्रातिकृच्छ्रोसृक्पातेकृच्छ्रोभ्यंतरशोणिते विप्रदंडोद्यमेविप्रजिघांसयादंडउद्यु २२३
मे, बृहस्पतिः कषादिनाताडयित्वात्वंकृदेकृच्छ्रमाचरेत् अस्थिभेदेतिकृच्छ्रःस्यात्पराकस्त्वंगकर्तने यमःपा

योवास्नानमंत्रा भवंति प्रायश्चित्तार्थमेते मंत्रास्त्वध्याप्या एवं कृतप्रायश्चित्त सोध्याप्यः यस्य प्रपितामहादेरुपनय
नं नास्ति तथाविधानामपि उपनयनाभावस्ते सर्वे श्मशानशब्दवाच्याः स्युरित्यर्थः तेषामागतेषु भुक्त्यानं भोजनाद्य
वापयेयि न कुर्यात् तेषां स्वयमेव शुद्धिमिच्छतां प्रायश्चित्तं द्वादशवार्षिकमित्यादि स्पष्टार्थं उदकस्पर्शनमपि पुरु
षसंख्यानस्मरणाभिव्याप्यसंबन्धं चोदकोपस्पर्शनं तत्र मंत्राः पूर्वोक्ता एव ततोध्यायनं नास्ति किं तु गृहस्थाश्र
मस्वीकारः तत उपदिष्टगार्हस्थ्यान्पुरुषान्संततिर्वर्तेते तस्मादुत्पन्नस्योपनयनं संस्कारः प्रथमातिक्रमे सावि
त्र्याः कालकृते त्रैविद्यकं ब्रह्मचर्यमिति तत इद्भवति तत ऊर्ध्वं प्रकृतिवत् तत उत्पन्नस्यानतिक्रान्तसावित्रीकालो
पनयनयदिति अथ स्तेये धान्यादिद्रव्यविशेषापहारे सामान्यप्रायश्चित्तानंतरमाह मनुः धान्यान्नधनचौर्याणि
कृत्वा कामाद्द्विजोत्तमः स्वजातीयगृहादेव कृच्छ्रार्धेन विशुध्यति धनं सुवर्णेतरं सारद्रव्यं द्विजोत्तमः स्वजा
तीयगृहादेव कृच्छ्रार्धेन विशुध्यति द्विजोत्तमो विप्रः तस्य स्वजातिर्विप्र एव एतच्च ब्राह्मणपरिगृहीतधान्याद्य
पहर्तुर्ब्राह्मणस्यैव क्षत्रियादीनां स्वस्वजातीयसंबंधिधान्याद्यपहरणे यथाक्रमं पादोनमर्धपादश्चेति कल्प्यं
ब्राह्मणेन क्षत्रियादिपरिगृहीतधान्याद्यपहारे षाण्मासिकं त्रैमासिकं चैवं शूद्रपरिगृहीतापहारे त्रैमासि

मं॰ग
२९५ कृमिति कल्प्यं इदंच कामे कृते अकामकृते तत्र शतमाद्यं यथार्थं त्रैमासिकं गावधव्रतं वा कल्पनीयं धान्यं दशभ्यः कुम्भेभ्यो
हरतोभ्यधिकं वधइति दशकुम्भाधिकहरणे याज्ञवल्क्येन वधदर्शनात् दशकुम्भपरिमितधान्यहरणे एतत्प्राया
श्चित्तं रेयं धान्यसाहचर्यादन्नस्य तंडुलादेरप्येवमेव कुम्भपरिमितधान्यमूल्यलभ्यरजतादिधनेप्येवमेव
कुम्भश्च पंचसहस्रपलपरिमाणः अल्पसाराणां मेयकृत्वान्यवपमनः चरेत्सांतपनं कृच्छ्रं तन्निर्यात्यात्मशुद्ध
यइति एतच्च पंचविंशतिपणमूल्यलभ्यत्रपुसीसाद्यपहारे तथा भक्ष्यभोज्यापहरणे यानशय्यासनस्य च पु
ष्पमूलफलानां च पंचगव्यं विशोधनम् एककालभोजनपर्याप्तभक्ष्यभोज्यापहारएतत् द्विवारभोजनपर्या
प्तभक्ष्यभोज्यापहारएतत् द्विवारभोजनपर्याप्तेहरणे त्वेपेटीनश्रुक्तं त्रिरात्रभक्ष्यभोज्यान्नस्यादरक्षणमात्रा
स्यहरणे त्रिरात्रमेकरात्रं वा पंचगव्याहारतेति एकरात्रंपंचगव्याहारस्य सर्वोक्तो विषयः भक्ष्यादिसाहचर्या
द्यानादीनामपि तावन्मूल्यलभ्यानामेव हरणे एकरात्रादिकं एकरात्रभोजनपर्याप्तभक्ष्यादि त्रिगुणमूल्यलभ्य
तृणकाष्ठादिहरणे त्रिरात्रं अनेनाभिप्रायेण मनुः तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च चैलचर्मा
मिषाणां च त्रिरात्रं स्यादभोजनम् तथा द्वादशगुणभक्ष्यमूल्यार्हमणिमुक्तान्यपहारे स एव मणिमुक्ता २९५

त्नप्रवालानांताम्रस्यरजतस्यच अयःकांस्योपलानां वृद्वादशाहंकणभक्षता भस्माद्विगुणमूल्यकर्पासाद्यपहारेस
एव कर्पासकीटजोर्णानांद्विखुरैकाखुरस्यच पक्षिगंधौषधीनांचरज्ज्वेश्चत्र्यहंपयइति एवमन्यत्रापियोजनीयम् तथा
मनुष्याणांचहरणेस्त्रीणांक्षेत्रगृहस्यचकूपवापीजलानांचशुद्धिश्चान्द्रायणेनतु एतच्चक्षत्रियादिमनुष्यापप
हारे विप्रस्यापहरणेनराश्चरजतस्यच भूमिवज्रमणीनांचरुक्मस्तेयसमंस्मृतमित्यत्रब्राह्मणसंबंधिमनु
ष्यापहरणस्यचसुवर्णस्तेयसमत्वेनोक्तत्वात् कूपवापीजलानांचेत्यत्रकूपवापीभ्यांजलविशेषणंचघटादिजलव्या
वृत्त्यर्थंतेनसजलवापीकूपापहारेप्रायश्चित्तमिदमित्यपरार्के सार्धशतद्वयपणलभ्यजलापहारइदंचान्द्रायणानि
यमितइतिमिताक्षरायां एतच्चप्रायश्चित्तंकल्प्यंवस्तुजातमपहृतंस्वामिनेदत्त्वैवकर्तव्यं यदाहविष्णुः दत्त्वैवा
पहृतंद्रव्यंस्वामिनेव्रतमाचरेत् स्त्रीबालादिषुपूर्वोक्तरीत्याकल्प्यं ऋणानांचानपक्रियेत्यत्र गोवधप्रायश्चित्ति ता
यथाशक्तियोज्यानि अनाहिताग्निनायां तत्रवत्सराहूर्ध्वमापदिशन्तस्यपत्नयायाज्ञवल्क्योक्तव्रतंषट्कयोज्यं अनाप चल
दितवत्सराहूर्ध्वमेवंमनूक्तंत्रैमासिकं आहृर्णोवत्सरेकार्ष्माजिनिविशेषमाह कालेत्वाधायकर्माणिकुर्याद्विधिवि
धानतः सकृद्वास्त्रिरात्रेणमासिमासिविशुद्ध्यति आव्यसथ्याधानेपिसएव कृतदारोगृहेज्येष्ठोयोनादध्याद्गुता

मं॰ पा॰ २९६ शतम् चान्द्रायणं चरेद्वर्षं प्रतिमासमहोपि वेति वर्षातिक्रमे चान्द्रायणं मासातिक्रमे त्वहरुपवासः श्रौतस्मार्ताग्न्याधाना
भावे इदं प्रायश्चित्तं गृहीतस्य नास्तिक्यादिवशात्परित्यागे धर्मविदुक्त्यादिषु विशेषोभिहितः व्याघ्रपादः मासद्वयं तु यो
वह्निं त्यजेद्देवं समाहितः नास्तिक्यं कृच्छ्रमेकं तु हेमद्रव्यं ददाति चेत् तथा योऽग्निं त्यजति नास्तिक्यात्प्राजापत्यं चरेद्द्वि
जः अन्यत्र पुनराधानमुपदिष्टं मनीषिभिरिति मासचतुष्टयमभिव्याप्याग्निपरित्यागे त्वतिकृच्छ्रः तथा च स एव
चतुष्टये तु संपूर्णे मासानां तु हुताशनं सत्यक्त्वातिकृच्छ्रं कुर्वीत ततः पौत्रमुच्यते षण्मासपर्यन्तं पराकः अत ऊर्ध्व पा
मब्दपर्यन्तं पयोव्रतं यवाहोशनः षण्मासांस्त्यजते यो वै पराकं स समाचरेत् ऊर्ध्वं पयोव्रतं कुर्यान्मासमेकं समाहितः
वर्षपर्यन्तमेवाहुर्मुनयः संशितव्रताः संवत्सरादूर्ध्वं तु स्कन्दपुराणे ऊर्ध्वं संवत्सरादग्निं यस्त्यजेत्स पयोव्रतं हैमा
सिकं ततः कुर्यात्त्रैमासिकमथापि वा कालाल्पत्वमहत्त्वापेक्षया विकल्पः प्रमादान्मासमग्निपरित्यागेपि स्कन्दपुरा
णे हुताशनं तु यो विप्रः प्रमादात्त्यजति प्रभो प्राणायामशतं कुर्यादुपवासमथापि वा प्राणायामशतं त्रिरात्र
परित्यागे कूर्मपुराणे षष्टिरात्रिं त्यजेदग्निं प्रमादात्तु स्थलेमप्रभो उपवासं तथा कुर्यात्प्राजापत्यमथापि वा त
त्त्यजेनन्तरप्रकृतं त्रिरात्रपरास्वयने मासद्वयपरित्यागे त्रिरात्रं ऊर्ध्ववत्सरपर्यन्तं मासं प्राजापत्यं अतऊ २९६

र्ध्वंकालबहुत्वेप्रायश्चित्तबहुत्वं यथाचभारद्वाजगृह्ये प्राणायामशतमृत्रिरात्राडुपवासः स्मृत् विंशतिरात्रा
दतऊर्ध्वमाषष्टिरात्रात्त्रिरात्रीरुपवसेत् अतऊर्ध्वकालबहुत्वेदोषबहुत्वमिति उपवासश्चत्रिंशद्रात्रादित्यपिपा
ठः आलस्येनपरित्यागेसंवत्सरे आलस्येनयदावह्निं द्वादशाहंत्यजेत्तुभो त्रिरात्रमुपवासंचचरेत्पापविशुद्धा
ये भरद्वाजगृह्ये द्वादशाहातिक्रमेत्र्यहमुपवसेत् मासातिक्रमेद्वादशाहमुपवासः संवत्सरातिक्रमेमासो
पवासः पयोभक्षणंकूष्माण्डीभिर्होमः क्रमेणोभयंवेति उपवासासमर्थस्यमासंपयोभक्षणंसंवत्सरानंत
रमधिककालातिक्रमेउभयं एतच्चगृह्याग्निविषयं हारीतः संवत्सरोत्सन्नेग्निहोत्रेचान्द्रायणंकृत्वापुनराद
ध्यात् द्विवर्षोत्सन्नेचांद्रायणंसोमायनंचकुर्यात् त्रिवर्षोत्सन्नेसंवत्सरंकृच्छ्रंसघस्यपुनरादध्यादिति शंखः
अग्न्युत्सादीसंवत्सरंप्राजापत्यंचरेद्गांचदद्यादिति एतदकामतः श्रौताग्न्युत्सादे कामतस्तुमनूक्तं अग्निहोत्र्य
पविध्याग्नीन्ब्राह्मणःकामकारतः चान्द्रायणंचरेन्मासंवीरहत्यासमंहितत् मासमग्निसमविद्धत्वन्वयः के
चनालस्यादिनामासपरित्यागेप्रथममासेकृच्छ्रत्रयंततोमाससंख्ययाकृच्छ्रसंख्येति एवमादयोगुरुलघुक।
ल्पाः मन्त्राद्यपेक्षयाव्यवस्थापनीयाः एवंप्रायश्चित्तानंतरंप्राप्तस्यलेपुनराधानंकृत्वानित्यकर्मकुर्यात् प्रा

संवत्सरव्रतमेवं दिनमानादि विक्रयेपि संकीर्तितं प्रतपकत्वमविक्रयइति सर्वशेषः ८

स॰प्रा॰ २९७ यश्चिन्नं चरेद्धोमं द्रव्यं दत्वा तथाच शंखभरद्वाजगृह्ये यावत्कालमहोमी स्यात्तावद्द्रव्यमशेषतः तस्मांचैव विप्रेभ्योय
याहोममृत्विजे वंचेति अथापण्यविक्रये यत्र स्मृतिषु प्रायश्चित्तं नोक्तं तत्र द्रव्यानुबंधाद्युपेत्य यानायदि मानवं त्रैमा
सिकं आपदि तु गोवधे याज्ञवल्क्योक्तं व्रतचतुष्टयं शक्त्यपेक्षया योज्यं क्वचन विशेषो हारीतेनोक्तः गुडतिलपु
ष्पमूलपक्वान्नविक्रये सोमायनं लाक्षालवणमधुमांसतैलक्षीरदधिघृततक्रगंधचर्मरक्तवाससोमकतमविक्र
ये चान्द्रायणं तथोर्णाकेशकेसरिभूयेन्द्रवेश्मशस्त्रविक्रयेच भक्तमांसस्वाद्यस्थिशृंगखनखस्रुक्ति विक्रयेत ७
प्तकृच्छ्रः हिंगुगुग्गुलहरितालमनःशिलाञ्जनगैरिकक्षारलवणमणिमुक्ताप्रवालवेणुवेत्रचर्मएमयेषु
च आरामजातकोदपानपुष्करिणीषु सुकृतविक्रयेषु त्रिषवणस्नानी अधःशायी चतुर्थकालाहारो दशस
हस्रं जपन् संवत्सरेण शुद्धो भवति हीनमानोन्मानसंकीर्णविक्रयेचेति दशसहस्रं जपनायत्रीमिति शेषः ४
शंखलिखितौ अविक्रीणीयानि तिलतैलदधि क्षौद्रलवणद्रा[illegible]मधुमांसकृतान्नस्त्रीपुरुहस्त्यश्वगोवृ
षगंधरसक्षौमकृष्णाजिनसोमोदकनीलीविक्रयी पतति ब्राह्मणः तत्र प्रायश्चित्तमकामाच्चप्रोक्तं कामकृते त्वेके
पतितोह्यात्मानमुद्धरेत् संवत्सरं तप्तकृच्छ्रमाचरन् कृतवापनः शुचिरपोभ्युपेयात् त्रिरेकान्नवासा गोष्ठीमो २९७

नीवीसप्तममासीनरोत्रादिवातिष्ठेद्युक्तोयुक्तोग्निकार्यापरः सावित्रीसवनान्तगाजेपत्स्वयंव्रतमभ्युपगम्यकुशचीर
वासानौञ्जीमेखलादण्डपवित्रपाणिर्हविष्यंचायवंवान्नमैक्षमडुष्टवाचचवंनाश्नीयात् द्वादशरात्रंचोपवासोब्राह्म
णतर्पणंगवाह्निकमित्येवंव्यवहार्योस्यात्पतितः शिष्यैरसम्भाष्यइति विस्तरः मांसलवणलाक्षाक्षारविक्र
यीचान्द्रायणंकुर्यात् तंचभूयश्चोपनयेदिति चतुर्विंशतिमते सुरायाविक्रयंकृत्वाचरेत्सोम्यचतुष्टयम् ला
क्षालवणमांसानांचरेच्चान्द्रायणत्रयं पयःपायसपूपानांचरेच्चान्द्रायणव्रतं मध्वाज्यतैलसोमानांचरेच्चान्द्रायण
द्वयं दधिक्षीरतक्ररसस्यैवगुडखजादिविक्रये सर्वेषांस्नेहपक्वानांपराकंतुसमाचरेत् कदलीनारिकेलचनारंग
वीजपूरकं एतेषांपादकृच्छ्रःस्यात्जम्बीरादेस्तथैवच कस्तूरिकादिगंधानांविक्रयेकृच्छ्रमाचरेत् कर्पूरादे
स्तदर्धंस्याद्धिंगुवादिविक्रये तिलानांविक्रयंकृत्वाप्राजापत्यंसमाचरेत् धर्मार्थंक्रिमिजातानांयज्ञार्थंवि
क्रियंनयेत् रक्तपीतादिवस्त्राणिकृष्णादीनितथैवच विक्रयेग्रहमेतेषांगर्गस्यवचनंयथा गोविक्रयेनरः
कृत्वालाभार्थंधर्ममोहितः प्राजापत्यंप्रकुर्वीतगजानामैन्दवंस्मृतं खराश्वमहिषीणांचकरभाणांचविक्रये
पराकंतुप्रकुर्वीतसूतानांद्विगुणंभवेत् नारीणांविक्रयंकृत्वाचरेच्चान्द्रायणव्रतं द्विगुणंपुरुषस्यैवब्र

म॰ पा॰
२९८

तस्माद्धर्मनीषिणः चान्द्रायणं प्रकुर्वीत एकाहाद्वेदविक्रये अन्नसन्नांतपराकं स्यादहन्नीनां कृच्छ्रमाचरेत् इतिहास
पुराणानां चरेत्स्नातपनं द्विजः रहस्यं पंचरात्राणां कृच्छ्रमेव समाचरेत् अन्नादिविक्रय एकाह इत्यनुवर्तते एवम
न्यान्यपि गुरुलघुहन्निप्रायश्चित्तानि विष्यकामाकामजातिशक्त्याद्यपेक्षया योज्यानि अथ परिवेदने पारिविन्न्य
च वसिष्ठः परिवित्तिः कृच्छ्रं द्वादशरात्रं चरित्वा निर्विशेत तां चैवोपयच्छेदिति परिवेत्तानुजोनूढे ज्येष्ठे राजय
त्रिग्रहात् परिवित्तिस्तु तज्ज्यायानित्यमरः असोपरिवित्तिर्ज्येष्ठस्तां परित्यज्य प्रायश्चित्तं चरित्वा निविशेत् उद्व
हेत् कामित्याकांक्षायामाह तांचैवोपयच्छेदिति तामेव स्वेन स्वं परिणीतामेव तथापदि परिविविदतः
कृच्छ्राति कृच्छ्रौ चरित्वा पुनर्निविशेत तामेवोपयच्छेतेति परिविविदानः परिवेत्ता कनीयान् तस्मै ज्येष्ठाय स्वोढां
दत्वा इयं त्वदीयेत्युपचारार्थमिव दत्वा ब्रह्मचर्याहत भेत्तवन्निवेय कृच्छ्राति कृच्छ्रौ कृत्वा पुनस्तामेव तेनानुज्ञाता
मुद्वहेदित्यर्थः एतच्च दशान्तरव्यवस्थिते सति ज्येष्ठे कृतविवाहे निर्गुणे वा ज्येष्ठे द्रष्टव्यं प्रायश्चित्तस्याल्प
त्वात् ज्येष्ठे गुणवति कन्यापित्राद्यनुज्ञानमन्तरेण कामतः करणे हारीतायुक्तं द्रष्टव्यं ज्येष्ठे निर्विष्टे कनीयां
निविशमानः परिवेत्ता परिवित्तिर्ज्येष्ठः परिवेदिनी कन्या परिदायी दाता परियष्टा याजकः सर्वे ते पतिता २९८

संवत्सरं प्राजापत्येन कृच्छ्रेण वा नरसेयुरिति। अत्रापि परिवित्तादीनां सर्वेषां कामतः प्रवृत्तौ प्रत्येकं संवत्सरे कृच्छ्रे
णैते शुद्ध्येरन् अज्ञानतः प्रवृत्तौ तु याज्ञवल्क्योक्तो गोवधव्रतचतुष्टयं जातिशक्त्याद्यपेक्षया योजनीयं अत्रैव
विशेषमाह यमः द्वे कृच्छ्रे परिवित्तेस्तु कन्यायाः कृच्छ्रमेव च अतिकृच्छ्रं चरेद्दाता होता चान्द्रायणं चरेदिति
ज्येष्ठायां यदि नूढायां कन्यायामुह्यतेनुजा यासाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृता अत्र प्रायश्चित्तं वसि
ष्ठः अग्रेदिधिषूः पतिः कृच्छ्रं द्वादशरात्रं चरित्वा निर्विशेत तां चैवोपयच्छेत दिधिषूपतिः कृच्छ्रातिकृच्छ्रौ च
रित्वा तस्मै दत्वा पुनर्निर्विशेतेति केचिन्नैवं पठंति दिधिषूपतिः कृच्छ्रावति एवं प्रायश्चित्त विकल्पः प्रथ कृच्छ्राति
मपाठेत्वयमर्थः अग्रेदिधिषूः पतिः कनिष्ठायाः पतिः तां परित्यज्य प्राजापत्यं चरित्वा निर्विशेतोद्वहेत कामि
त्वकां तां याता चैवेति तां त्वेनः पूर्वं परिणीतां दिधिषूपतिर्ज्येष्ठायाः पतिस्तां तस्मै कनिष्ठापतये पूर्ववद्द
त्वा कृच्छ्रातिकृच्छ्रौ चरित्वा पुनः पूर्वपरिणीतामेवोद्वहेत् द्वितीयपाठे त्वयमर्थः तस्मै दिधिषूपतये द
त्वा पुनः स्वोढां तामेवाग्रेदिधिषूपतिरुद्वहेत् अत्रानुक्तस्थले कन्यायाः गोढायाः अर्धं मप्रौढायाः पाद
इति कल्प्यं प्रायश्चित्तानंतरं तज्ज्येष्ठानुक्रमेण पूर्ववरायैव पूर्वदत्तां कन्यां दत्वा विवाहसंस्कारः कार्यः अत्र

म॰ पा॰ वसोदरकनिष्ठभ्रात्रासोदरज्येष्ठकन्याप्रथमंविवाहिता ततोज्येष्ठेनकनीयसीविवाहिता अथवाज्येष्ठभ्रात्राप्र
२५४ थमंकनीयसीकनिष्ठेनपश्चाज्ज्येष्ठातत्रपरित्यागएव परिविन्नपरिवेत्तृकन्याप्रदातृयाजकानां द्वादशरात्रंस
त्कृप्राशनेब्राह्मणांतर्पणंचतांपुनर्भुवमित्याचक्षतेनभूयश्चैनामभिगच्छेदितिस्मृत्यंतरस्मरणात् नाभिगच्छेत्
प्राप्नुयात् परित्यजेदितियावत् अस्यवचनस्यविषयांतरापेक्षयायमेवविषयोज्यायान् केचनकनिष्ठः
परिवेत्तास्वोढांकन्यांज्येष्ठायादद्यात् ज्येष्ठोपिकनिष्ठविवाहितामेवोद्वहेत् एवमग्रेदिधिषादिधिषूपिबु
क्रमविवाहेनविवाहसंस्कारस्यानिष्पन्नत्वादितिकथयंति तच्चिंत्यं अत्यंतलोकविद्विष्टत्वात् अथभृत
काध्यापनादेः तत्रब्राह्मीसुवर्चलांपिवेदित्यनुवृत्तौविष्णुः भृतकाध्यापनंकृत्वाभृतकाध्यापितस्तथा अ
नुयोगप्रदानेनत्रीन्पक्षान्नियतंपिवेत् अनुयोगप्रयोदानेनत्रीन्पक्षान्नियतंपिवेत् अनुयोगःयशोमेध
नायवासम्यगधीयानस्यविद्यानसम्यगधीयतइत्याक्षेपः तथाचस्मर्यते दत्वानुयोगानध्येतुःपति
नाम्नवुरब्रवीदिति इदंपिप्रायश्चित्तंसामान्यगोवधप्रायश्चित्तेः शक्त्याद्यपेक्षयाविकल्पितं अथमहा २५४
म पातकतत्समतद्धतिदिष्टपतितविक्रापादायंकृतकालकामकारेणजातिमात्रब्राह्मणीगमनेवार्षिक

ब्रह्महत्याप्रायश्चित्तं तथा च वार्षिकं वार्षिकप्राकृतब्रह्मचर्यानुष्ठानो गौतमः उपपातके चैवमिति ऋतुकालेऽग्नि
होत्रसाधनत्वादिगुणयुक्तब्राह्मणीगमने वर्षद्वयं ब्रह्महत्याव्रतं नादृग्विधश्रोत्रियपत्नीगमने त्रैवार्षि
कं यदाह स एव द्वे परदारे त्रीणि श्रोत्रियस्य द्रव्यलाभे चोत्सर्गो यथास्थानं वा गमयेदिति द्वे वर्षे नयाद
तेष्वन्यतरस्य दृष्टं तदीयं द्रव्यं तत्र वा गमयितव्यमित्यर्थः अथवा श्रोत्रियपत्न्यां गुणवत्यां वैश्यायां गमने वा
र्षिकं नादृश्यामेव तत्क्षत्रियायां द्विवार्षिकं नादृश्यामेव ब्राह्मण्यां त्रैवार्षिकमिति कल्प्यं तथा च शंखः वै
श्यायामवकीर्णः संवत्सरं ब्रह्मचर्यं त्रिषवणं चानुतिष्ठेत् क्षत्रियायां द्वे वर्षे त्रीणि ब्राह्मण्यां वैश्याव
त्शूद्रायां ब्राह्मणपरिणीतायामिति अत्र ब्रह्मचर्यं द्वादशवार्षिकं व्रतं वैश्यावदित्यतिदेशात्पादोनवा
र्षिकं व्रतं वैश्यावदित्यतिदेशात्पादोनवार्षिकं षाण्मासिकं वा कल्प्यं एतच्च ब्राह्मणस्यैव एतद्दिगवलम्बने
न क्षत्रियस्य तज्जात्यादिस्त्रीषु पूर्वोक्तगुणशालिनीषु गमने क्रमेण द्विवार्षिकं वार्षिकं षाण्मासिकानि एवं
वैश्यस्य वैश्याशूद्रागमने वार्षिकं षाण्मासिकं यत्त्वापस्तम्बेनोक्तं सवर्णायामन्यपूर्वायां सकृत्सन्निपा
ते पादः पतनीयेषूपदिष्टेष्वेवमभ्यासे पादः पादश्चतुर्थे सर्वमिति एतच्चाग्निहोत्रसाधनत्वादिगुणशा

म॰पा॰
३८०

स्त्रियांश्चोक्षत्रियपत्न्यांगमनेज्ञेयं अनन्यपूर्वायामितिविशेषोपादानादेकत्रैवगमनाभ्यासेद्वितीयवारादिगमनेत्व
नन्यपूर्वकत्वरूपप्रथमोपभोगाभावात् तेनानन्यपूर्विकाभ्यासइवनअनन्याभ्यासेपादपायिकं अपितुप्र
तिगमनंपादन्यूनंकल्प्यं एतदखिलमपिकामकारे अकामकारेत्वेवोक्तविषयेषुपूर्वोक्तप्रायश्चित्तान्येवार्ध ५
कृच्छ्रयोजनीयानि अन्त्यकालेकामतोजातिमात्रब्राह्मणीमव्यभिचारिणींगमनेमनूक्तंत्रैमासिकं तथा
वैश्यागमनेचान्द्रायणं शूद्रागमनेमासंयावकव्रतं एतच्चब्राह्मणस्यक्षत्रियस्यक्षत्रियादिस्त्रीगमनेत्रैमा
सिकंतथावैश्यागमनेचांद्रायणं मासिकयावकव्रतंचक्रमेण एवंवैश्यस्यवैश्याशूद्रागमनेचान्द्रायणं।
मासिकयावकव्रतेनच शूद्रस्यशूद्रीगमनेमासिकयावकव्रतं अकामतस्यशूद्रीगमनेमासिकयावकव्रतं अ
कामतस्तुब्राह्मणस्यब्राह्मण्यादिद्विजातिस्त्रीगमनेक्रमेणयाज्ञवल्क्योक्तम्ऋषभैकादशगोदानंमासंपंचग
व्याशनंमासंप्राजापत्यंचरणंद्रष्टव्यं क्षत्रियस्यक्षत्रियादिद्विजातिस्त्रीगमनेक्रमेणमासंपंचगव्याशनंमा
संप्राजापत्यंचरणंचद्रष्टव्यं वैश्यस्यवैश्यागमनेप्राजापत्यं शूद्रागमनेतुसर्वत्र शूद्रांतुकामतोगत्वा
मासंमासार्धमेवच गोमूत्रयावकाहारस्तिष्ठेत्तपापमोक्षकइति कामतोमासकामतोर्धं क्षत्रादीनाम ३८०

पितृगमने सर्वो भ्रामार्गमेव यत्तु स्त्यंतरं ब्राह्मणश्चेदप्रेताः पूर्वकं ब्राह्मणदारानभिगच्छेत् निहत्तुधर्मक
र्मणः कृच्छ्रं अनिहत्तुधर्मकर्मणोतिकृच्छ्रमिति तद्ब्राह्मणपत्न्यां स्वजायां अप्रेताः पूर्वकं मत्बुद्धिपूर्वकं निहत्तुधर्म
कर्मणो उष्टाचारस्य द्विविधव्यभिचरितब्राह्मणस्त्रीविषयं च कामकारे तद्द्विगुणं एतच्च सकृद्गमने वारं वातुष्ट
यव्यभिचारिणाय मकामतो गमनं शंखोक्तं ज्ञेयं सचैलस्नानं उदकुम्भं दद्याद्ब्राह्मणाय वैश्यायां चतुर्थकालाहा
रो ब्राह्मणान्भोजयेत् क्षत्रियायां त्रिरात्रोपोषितो यवाढकं दद्यात् ब्राह्मण्यां त्र्यहमुपोष्य घृतपात्रं दद्यादिति चतुर्थे
स्वैरिणी प्रोक्ता पंचमी बंधकी मता इति स्मरणाच्चतुर्थव्यभिचारे जाते स्वैरिणीत्युच्यते षट्त्रिंशन्मते ब्राह्मणीं बंध
कीं गत्वा किंचिद्दद्याद्द्विजातये राजन्यां तथनु दद्याद्वैश्यां गत्वा तु चोलकं अष्टमुष्टि भवेत्किंचित् अत्र यमः ब्राह्म
णो ब्राह्मणीं गत्वा द्विजे दद्यान्मृगाजिनं क्षत्रियायां धनुर्दद्याद्वैश्यायां मायसीशिलां शूद्रां गतेन विप्रेण उदकुम्भः
प्रदीयते त्रिरात्रोपोषितः स्नात्वा दद्यात्संमार्जनीं तथा अत्र शक्तविषये त्रिरात्रोपवाससहितानि मृगाजिनादिदा
नानि अशक्तस्य दिवसोपोषितावास्याद्दद्याद्विप्राय भोजनमिति षट्त्रिंशन्मतोक्तोपवाससहितानि दानानि अ
त्यशक्तस्य दानमात्रमिति व्यवस्था एतच्च गर्भानुत्पत्तौ तदुत्पत्तौ तद्द्विगुणं तथा चोशनाः गमने तु ब्रतं यत्तु ग

नैतद्द्विगुणं भवेदिति शूद्रायां गर्भधाने च तत्र विंशतिमितं वृषल्यामभिजातस्त्रीणि वर्षाणि तदर्धकालसमयेन भुंजीतेति
वृषल्यां जनितापत्यो वृषल्यामभिजातः वृषली शूद्रा स्वभार्याभ्रान्त्या प्रातिलोम्येन गच्छतः शूद्रादेः प्रचेतसोक्तं द्रष्ट
व्यम् शूद्रश्चेद्ब्राह्मणीं मोहाद्गच्छतः शुद्धिमिच्छतः पूर्णामेतद्व्रतं देयं यस्मान्माता हि तस्य सा पादह्रान्यान्यवर्णास्व
गच्छतः सार्ववर्णिकमिति कामतस्तु वधः प्रातिलोम्ये वधः पुंसां नार्याः कर्णादिकर्तनमिति स्मरणात् महापा
तकप्रकरणे शूद्रसमग्रोप्रासेदित्यादि वसिष्ठोक्तवचनं दर्शितं स्मरणीयमिति अथात्यंतव्यभिचारिणी ब्राह्मणीग
मने संवर्त्तोक्तं कथंचिद्ब्राह्मणीं गच्छेत्क्षत्रियो वैश्य एव वा कृच्छ्रसांतपनं वा स्यात्प्रायश्चित्तं विशुद्धये शूद्रस्तु ब्राह्मणीं
गच्छेत्कथंचित्काममोहितः गोमूत्रयावकाहारो मासेनैकेन शुद्ध्यतीति स्त्रीणामप्यनुलोमव्यवायेन पुरुषस्य तुल्य
प्रायश्चित्तं तदेव संसर्गप्रायश्चित्तं योज्यं मनुः यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतमिति अत्र प्रायश्चित्तार्धमर्हे
ति स्त्रियो रोगिण एवं चेति न प्रवर्तते यत्पुंसः परदारेषु समानेषु व्रतं स्मृतं व्यभिचाराच्च भर्तुः स्त्रीतदेशोषसमा
चरेदिति बृहस्पतिस्मरणात् समानेषु सवर्णेषु एतदुत्कृष्टस्याप्युपलक्षणं बलात्सवर्णोत्कृष्टेन भुक्तायाः संव
गौरिकं बलात्स्त्रमप्यभुक्ता चिद्दूयमानेन चेतसा प्राजापत्येन शुद्धिः स्यात्तस्याः पावनं परम् अत्राशक्तो ज्यष्ट ३०१

योगत्वेलेनकामितानामृसवर्णीनकथंचन प्रायश्चित्तंत्रिरात्रंवैतस्याः शुद्ध्यर्थमादिशेदिति प्रातिलोम्यव्यवायेतु
स्त्रीणांदेयंकस्य प्रायश्चित्तं तत्रमहापातकप्रकरणेवसिष्ठोक्तंदर्शितं संवर्तेनप्रायश्चित्तांतरमभिहितं ब्राह्म
णकामाकृच्छ्रेच्चेत्क्षत्रियंवैश्यमेवच गोमूत्रयावकैर्मासात्तदर्धाच्चविशुद्ध्यतीति कामतोद्विगुणं षट्त्रिंश
न्मते ब्राह्मणीक्षत्रियंवैश्यंसेवायामतिकृच्छ्रकृच्छ्रातिकृच्छ्रांश्चरेत् क्षत्रियायाः ब्राह्मणवैश्यराजन्यसेवायांकृच्छ्रा
र्धंप्राजापत्यमितिकृच्छ्रंवैश्यायाः ब्राह्मणराजन्यवैश्यसेवायांत्वहोरात्रंकृच्छ्रार्धकृच्छ्रमिति हारीतस्त्वेनाः विप्रा
शूद्रेणसंसृष्टानचेत्तस्यात्प्रसूयते प्रायश्चित्तंस्मृतंतस्याःकृच्छ्रंचान्द्रायणत्रयं चांद्राप्रोक्तेकृच्छ्रस्त्वविप्राया
वैश्यसंगमे कृच्छ्राचान्द्रायणेस्यातांतस्याः क्षत्रियसंगतौ क्षत्रियाशूद्रसंपर्केकृच्छ्रंचान्द्रायणद्वयं चान्द्रायणंसकृ
त्कृच्छ्रंचरेद्वैश्यनसंगता शूद्रेगत्वाचरेद्वैश्याकृच्छ्रंचान्द्रायणोत्तरं आनुलोम्येनकुर्वीतकृच्छ्रंपादविरोपितमिति
गर्भधारणेतुचतुर्विंशतिमते विप्रगर्भेपराकःस्यात्क्षत्रियस्यतथैन्दवं ऐन्दवञ्चपराकश्चवैश्यस्याकामकारतः शूद्रगर्भेभवेत्त्यागस्त्वगलोजायतेयतः गर्भस्रावेधातदोषेस्त्वेचान्द्रायणत्रयमिति कामकारेद्विगुणं
गर्भस्रावेचान्द्रायणत्रयं शूद्रगर्भस्रावएव यदातुशूद्रगर्भप्रसवस्तदाप्रायश्चित्ताभावएव तथाचवसिष्ठः

ब्राह्मणक्षत्रियविशांभार्याःशूद्रेणसंगताः॥ अप्रजाताविशुद्ध्यंतिप्रायश्चित्तेननेतराइति यत्तुसशूद्रगर्भेववाभिचरतितं
दाप्रसवोत्तरकालंप्रायश्चित्तं अंतर्वत्नीतयानारीसमेनाक्रम्यकामिता प्रायश्चित्तंनकुर्यात्सायावद्गर्भोननिस्सृतः
जातेगर्भेव्रतंपश्चात्कुर्यान्मासंतुयावकं नगर्भदोषस्तत्रास्तिसंस्कार्यःसयथाविधीतिस्मरणात् आक्रम्यबलात्
इछायांत्वेवंभवेद्यत्रयदुक्तंतत्रतद्द्विगुणं यदातुप्रायश्चित्तंनचिकीर्षतिदर्पादिनातदानार्याःकर्णविकर्तनमित्य
गछेदः अंत्यजगमनेनतुस्त्रीणांप्रायश्चित्तविशेषःस्मर्यंतेरेरजकंव्याधशैलूषवेणुचर्मोपजीविनः ब्राह्मण्येतान्यदा
गछेदकामादैन्दवत्रयं चण्डालपुक्कसम्लेछश्वपाकपतितंतथा ब्राह्मण्येकामतोगत्वाचान्द्रायणचतुष्टयं काम
तोद्विगुणंकल्प्य अकामतःप्रायश्चित्तांतरंस्मर्यते चाण्डालेनतुसंपर्कंयदिगछेत्कथंचन सशिखंवपनंकुर्यात्
पीयाद्यावकौदनं त्रिरात्रमुपवासःस्यादेकरात्रंजलेवसेत् आत्मनोसंमितेकूपेगोमयोदककर्दमे तत्रस्थित्वाति
राहारासात्रिरात्रंततःक्षिपेत् शंखपुष्पीलतामूलंपत्रंवाकुसुमंफलं क्षीरंसर्वंतुसम्मिश्रंक्वाथयित्वाततःपि
वेत् एकभक्तंचरेत्पश्चाद्यावत्पुष्पवतीभवेत् वहिस्तावद्वसेन्निवेश्मयावन्नरतितद्धे प्रायश्चित्तेनतुचीर्णेनकुर्या ३०२
द्ब्राह्मणभोजनं गोद्वयंदक्षिणांदद्यात्शुद्धेत्स्वायंभुवोब्रवीदिति एतच्चाकामतःसकृद्गमने कामतःसकृद्

मनेनतस्यस्त्रीगः संस्पृष्टायादृश्याभिर्यासाकृच्छ्रंतं समाचरेत् अंतर्वत्नीत्वप्रवृत्तिः संस्पृष्टावांत्ययोनिना प्रायश्चित्तं
नसाकुर्याद्यावद्गर्भोननिस्सृतः नप्रचारंगृहेकुर्यान्नचांगेषुप्रसादनं नशयीतसमंभर्त्रानवाभुंजीतबांधवैः प्रा
यश्चित्तंगतेगर्भेविधिंकृच्छ्रादिकंचरेत् हिरण्यमथवाधेनुंदद्याद्विप्रायदक्षिणामिति कामतोंत्यजसंसर्गाभ्या
सेउशनाः अंत्यजेनतुसंपर्कभोजनेमैथुनेकृते प्रविशेत्संप्रदीप्तेग्नौमृत्युनासाविशुध्यतीति यदात्रप्रायश्चि
नो त्तेनकरोतितदापादिनातदापुंलिंगेकनीयावध्यावा अतएवपराशरः हीनवर्णोपभुक्तायात्साज्यावध्यावाभवेदि
ति यथोत्रनासिकाकर्तनमित्यपरार्के पुरुषस्यांत्यगमनेरहस्येसंवर्त्तः रजकव्याधशैलूषवेणुचर्मोपजीविनां
एतास्तुब्राह्मणोगत्वाचरेच्चान्द्रायणद्वयं आपस्तम्बोपि म्लेच्छीनटीचर्मकारीरजकीबुरुडीतथा एतास्तुगमनंकृ
त्वाचरेच्चान्द्रायणद्वयं रजकश्चर्मकारश्चनटोबुरुडएवच कैवर्तमेदभिल्लाश्चसप्तैतेत्वंत्यजाः स्मृताइति चंडा
लाद्यादिगमनेगुरुतरप्रायश्चित्तत्वात् गुरुतल्पप्रकरणेप्रसंगाद्दर्शितं उशनाः बहूनामेकधर्मिणामेकस्या
पियद्युच्यते सर्वेषांतद्भवेत्कार्यमेकरूपाहितेस्मृताः यत्रपुक्कसादिगमनेप्रायश्चित्तविशेषोनाम्नातः तत्रचंडाल्या
दिगमनेयत्प्रायश्चित्तंतदेवज्ञेयं रजकादिगमनेयदेवप्रायश्चित्तंतदेववस्त्रदशील्यादिष्वपिकार्यमित्यर्थः सर्वोक्त

मं·पा·
२०३

चान्द्रायणद्वयंविप्रस्याकामतोरजकादिगमने तन्त्वादीनांत्वयादयादोनंकल्पनीयं अकामतस्तुब्राह्मणस्यैव
तोक्तं अकामतः स्त्रियोगत्वापराकंव्रतमाचरेदिति एतस्मैकार्स्वाङ्गिरःहन्नोत्व शातातपोक्तं कैवर्तीरजकीचैववे
णचर्मोपजीविनी प्राजापत्यविधानेनकृच्छ्रेणैकेनशुध्यतीति कपालिकीकैवर्त्यादिषुज्ञानादज्ञानतश्चाभ्यासे
उशनसोक्तं कापालिकान्नभोक्तॄणांतन्नारीगामिनांतथा ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैन्दवद्वयमिति अज्ञाना
च्चोऽन्त्यादिषुगर्भाधानेद्वादशवार्षिकंतेनैवोक्तंद्रष्टव्यं चैऽन्त्यागर्भमारोप्यगुरुतल्पव्रतंचरेदिति ज्ञानाच्चा
पस्तम्बोक्तं अन्त्यजायांप्रसूतस्यनिष्कृतिर्नविधीयते निवासनंकृत्वाकस्यतस्यकार्यममेध्यामिति एवमन्यान्य
पिवचनानिविषयविशेषेषुन्यानि पारदार्यप्रसंगादस्मादपिकिंचिदुच्यते याज्ञवल्क्यः अप्रियुक्तोभ्रातृजा
यांगच्छेच्चान्द्रायणंचरेत् घृताभ्यक्तस्तत्वावियादित्यादिनियोगप्रकारमंतरेणभ्रातुर्ज्येष्ठस्यकनिष्ठस्यवाजा
यांगच्छन्नित्यर्थः एतत्सकृदकामकारविषयं कामकारेतुशाखोक्तं परिविवि[?] परिविन्नाचसैवत्सरंब्राह्मण
गृहेभैक्ष्यंचरेत् ज्येष्ठभ्रातृभार्यामनियुक्तोगच्छंस्तदेवकनिष्ठस्यभार्यांवेति अकामतः सकृत्त्वभार्यायामपि
गृस्वलायांयाज्ञवल्क्योक्तं त्रिरात्रान्तेघृतंप्राश्यगत्वोदक्यांविशुध्यतीति त्रिरात्रान्ते त्रिरात्रोपवासान्ते अकामतो २०३

यो ऽकामतः सकृद्गमनेच शातातपोक्तं रजस्वलागमने सप्तरात्रमिति कामतो ऽभ्यासे तु हन्तं संवर्त्तोक्तं रजस्वलां
तु यो गच्छेद् गर्भिणीं पतितां तथा तस्य पापविशुद्ध्यर्थमतिकृच्छ्रविशोधनमिति कामतोत्यन्ताभ्यासे शंखोक्तं त्रैवार्षिकं या
दृष्ट्वा शूद्रहस्तायामुदक्यागमने तथेति रजस्वलासु परदारेषु गमने तथेति रजस्वलागमनप्रायश्चित्तं पारदार्यप्राय
श्चित्तं च भवति रजस्वलागमनप्रायश्चित्तप्रसंगाद्रजस्वलानामन्योन्यस्पर्शप्रायश्चित्तमुच्यते स्पृष्टे रजस्वले ऽन्योन्यं
सगोत्रे त्वेकभर्तृके कामादकामतो वापि सद्यः स्नानेन शुद्ध्यतीति सवर्णा असपत्नी विषयेतन्मार्कण्डेयः उदक्या
त्वसवर्णाया स्पृष्टा चेत्स्यादुदक्यया तस्मिन्नेवाह्नि स्नाता शुद्धिमाप्नोति संशयमिति एतच्चाकामतः कामतस्तु
कश्यपोक्तं रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि एकरात्रं निराहारा पंचगव्येन शुद्ध्यति एकक्षत्रियादीना
मपि एतच्च प्रायश्चित्तं चतुर्थेह्नि स्नानानन्तरं कार्यं तथा चात्रैव हरिते यत्तु चतुर्थेह्न्यपि शुद्धिवचनं तद्वैविक
येन्द्रकवत्स्नाममी रजस्वला अभिषेके भुक्तिः सद्यः स्नानेन भोजनं एतच्च बालपत्या विषयं अशक्ता विषयं वा अ
बालापत्यायास्तु दिनत्रयं भोजनाभावः दिनत्रयमित्यवशिष्टकालोपलक्षणं स्नानप्रकारस्त्वाह्निके नैमित्तिक
स्नानप्रकरणेभिहितः परिवित्तिप्रायश्चित्तानि परिवेदनप्रकरणेभिहितानि वंध्वस्थलवणक्रिययोस्तु मनुयो

ष्वरोक्तगोवधप्रायश्चित्तानि जातिशक्त्याद्यपेक्षयायोज्यानि अथस्त्रीशूद्रविट्क्षत्रवधे तत्कर्मसाधनत्वादिगुणशालि
न्यवाभिचरितब्राह्मण्यादिस्त्रीवधेहारीतोक्तंत्रेयं षड्वर्षाणिराजन्यप्राकृतंब्रह्मचर्यंत्रीणिवैश्यसार्धंशूद्रेक्षत्रियवद्ब्राह्मणी
ष्ववैश्यक्षत्रियायांशूद्रवद्वैश्यायां शूद्रांहत्वानवमासानिति प्राकृतंब्रह्मचर्यंब्रह्महत्याप्रायश्चित्तं एतच्चकामतोवधे
अकामतस्त्वर्धं ईषद्व्यभिचारादिदोषदुष्टब्राह्मण्यादिवधेप्रचेतसोक्तं अनृतुमतींब्राह्मणींहत्वाकृच्छ्रार्धंषण्मा
सान्वात्क्षत्रियांहत्वाषण्मासान्मासत्रयंवावैश्यांहत्वामासत्रयंसार्धमासंवा शूद्रांहत्वासार्धमासंमासद्वाविंशत्यहत्य
हानिवेति अत्रसर्वेष्वपिविकल्पेषुपूर्वः पक्षः कामकारविषयउत्तरोत्तरोऽकामकारविषयः प्रातिलोम्येनक्षत्रियादि
भिर्व्यभिचरितानांब्राह्मण्यादीनांवधेमनुयाज्ञवल्क्योक्तगोवधप्रायश्चित्तानिशक्त्याद्यपेक्षयायोज्यानि अनुजाति
सूतानांब्राह्मण्यादीनांकामतोवधेब्रह्मगर्भोक्तं प्रतिलोमप्रसूतानांत्रीणिमासान्वधेस्मृताः अंतरप्रभवानांचसू
तादीनांचतुर्द्दिषड्इति अस्यार्थः प्रतिलोमप्रसूतानांस्त्रीणांवधेचतुर्द्दिषण्मासाः अंतरप्रभवानांचसूतादीनांच
वधेतथैव सूतादिवधेविषयव्यवस्थानतरत्रवक्ष्यते ब्राह्मणीहननेषण्मासाः क्षत्रियाहननेचत्वारः वैश्यायाद्वौ
[illegible]ति शूद्रायाहननेमासिकंव्रतंकल्प्य अकामतः सर्वोक्तविषयेयाज्ञवल्क्योक्तं दुर्वृत्तब्रह्मविट्क्षत्रशूद्रयोषाः २०४

प्रक्षाप्यतु इति पर्युर्वस्वमतिक्रमाद्यथाद्भिशुद्ध्यइति इतिश्चर्ममयंजलभाण्डं विसः छाग: अविर्मेष: इदंचा
न्यंतदरिद्रस्यंतयोसमर्थस्य एतद्विपरीतस्यतुशक्त्याशयपेतयादोषापेत्तयाचदानंतेसीकल्पनीये वैश्याहत्ते
किंचिद्देयंवैशिकेनकिंचिदितिगौतमस्मरणात् अष्टमुष्टिर्भवेत्किंचित् अष्टकस्वल्पजलेकर्मविषयं ह
इवसिष्ठ: स्पृष्ट्वारजस्वलान्योन्यंब्राह्मणीशूद्रजापिच कृच्छ्रेणशुध्यतिपूर्वाशूद्रीदानेनशुध्यति दानेनपादकृ
च्छ्रप्रत्याम्नायभूतनिष्कचतुर्थांशदानेन तथा स्पृष्ट्वारजस्वलान्योन्यंब्राह्मणीवैश्यजापिच पादहीनंचरेत्पूर्वा
कृच्छ्रपादंतयोत्तरा कृच्छ्रार्धात्मुच्यतेपूर्वोत्तराचतदर्धत: स्पृष्ट्वारजस्वलान्योन्यंक्षत्रियाशूद्रजापिच उप
वासैस्त्रिभि: पूर्वोत्वहोरात्रेणचोत्तरा स्पृष्ट्वारजस्वलान्योन्यंक्षत्रियावैश्यजापिवा त्रिरात्रात्शुद्ध्यते पूर्वोत्वहोरा
त्रेणचोत्तरा स्पृष्ट्वारजस्वलान्योन्यंवैश्याशूद्रीतथैवच त्रिरात्रान्मुच्यतेपूर्वाउत्तरात्तुदिनत्रयात् वर्णानांकाम
त:स्पर्शेशुद्धिरेषापुरातनी अकामतोहहद्विमूर्ज्ञेत्तेयं रजस्वलाहीनवर्णांरजस्वलांस्पृष्ट्वानतावदश्नीया
यावत्शुद्धास्यात् सवर्णामधिकवर्णांचस्पृष्ट्वासद्य: स्नात्वाशुद्ध्यतीतिहहद्वासिष्ठ: पतितांत्यश्वपाकेनसंस्पृ
ष्टाचेद्रजस्वला तान्यहानिव्यतिक्रम्यप्रायश्चित्तंसमाचरेत् उपवासेनरजोदोषदिनान्यतिक्रम्यनीतेनत्यर्थ: प

मे॰ पा॰ वेसर्वत्रापि दिनात्यतिक्रमोयत्रप्रायश्चित्तमाम्नातं तथा प्रथमेह्नि त्रिरात्रं स्याद्द्वितीये द्व्यहमेव च अहोरात्रं तृतीयेह्नि चतु
३०५ र्थे नक्तमेव च शूद्रयोच्छिष्टया स्पृष्टा शुनाचद्व्यहमाचरेत् एतत्कामतः स्पर्शे अकामतो बौधायनोक्तं रजस्वला तु सं
स्पृष्टा चंडालांत्यश्ववायसैः तावत्तिष्ठेन्निराहारा यावत्कालेन शुद्ध्यतीति रजोदर्शननिमित्तत्रिरात्ररूपकालेनेत्य
र्थः अत्राशक्तौ तेनैवोक्तं ग्राह्य रजस्वला च संस्पृष्टा ग्रामकुक्कुटसूकरैः श्वभिः स्नात्वा तिष्ठेत्तावद्यावच्चन्द्रस्य द
र्शनं तथा रजस्वला तु भुंजाना श्वांत्यजादीन्स्पृशेद्यदि गोमूत्रयावकाहारा षड्रात्रेणैव शुद्ध्यति अशक्तौ कांचनं
दद्याद्विप्रेभ्यो वापि भोजनं उच्छिष्टयोरन्योन्यस्पर्शे त्रिः उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित्स्त्री रजस्वला कृच्छ्रे
ण शुद्ध्यते पूर्वा शूद्रा दानेनोपोषिते तीति पूर्वा उत्कृष्टा मार्कंडेयः द्विजा कथंचिदुच्छिष्टा रजःस्त्री संस्पृशेद्य
दि स्नात्वोच्छिष्टस्त्वहोरात्रमूर्ध्वोच्छिष्टस्त्र्यहं क्षिपेत् स्नात्वोच्छिष्टमूत्रपुरीषादिना तथा मृतसूतकसंपर्के दत्तं दृष्ट्वा
कथं भवेत् नास्नानकालमश्नीयाद्भुक्त्वा चान्द्रायणं चरेत् आह्नानकालं तर्थ्यदिनपर्यंतं अभ्यायेनसमस्तेन
मलवद्वाससी यदि अभिषेके तु भुक्तिः स्याद्दिनत्रयमभोजनं अभ्यायेत्सूतकाद्याशौचे मलवेषणाहत्वाज
लं स्पृष्ट्वादि सर्गिर स्नानस्मरणात् एवमन्यान्यविषयविशेषेषु योज्यानि अथ दत्ता[illegible]यादिविधे अथ कामतोजा ३०५

तिमात्रक्षत्रियादिवधे याज्ञवल्क्योक्तं वृषैकसहस्रागादद्यात् तत्रवधेप्रमान् ब्रह्महत्याव्रतंवापिवत्सरत्रितयंच
रेत् वैश्यहाब्दंचरेदेतद्दद्याद्वैकशतंगवाम् षण्मासांश्छूद्रहाप्येतद्देनूर्दद्याद्दशापिवा एकवृषभाधिकगोसहस्र
दानेत्रवर्षव्रतंवा तत्रवधेत्र्यब्दं तथनाद्यस्यवार्हत्वर्षभैककगोसहस्रदानं इतरस्यत्र्यब्दं एवंवैश्यहननेपिव्यवस्था
एतद्ब्रह्महत्याव्रतं ...... मुचिरप्रसूतास्तवत्सा: मनु: अकामतस्तुराजन्यंविनिपात्यद्विजोत्तम: वृषभैकसह
स्रागाद्द्यात्स्वशुद्ध्यर्थमात्मन: त्र्यब्दंचरेद्वानियतोजटीस्याद्ब्रह्मणोव्रतं अकामतइषहत्तस्यविट्छूद्रवधे मनु:
वैश्येष्टमांशोहन्तस्यछूद्रेज्ञेयस्तुषोडशोति द्वादशवार्षिकायेत्तयाष्टमांश: सार्धवर्षं षोडशांशोनवमासा: ए
तदिवत्सम्वेनेनसार्धवावर्षचतुष्टयमीषद्दत्तस्यत्तक्षत्रियहननेकल्प्य हन्तस्यस्वरूपंचस्वल्पंतरे गुरुप्रजाघ्रण
शैत्रंचसत्यमिन्द्रियनिग्रह: प्रवर्तनंहिनानांचतत्सर्वमल्पमनुच्यतइति कामतस्तुजातमात्रक्षत्रियादिवधेहृद्ब्रह्मा
रीतोक्तं ब्राह्मणक्षत्रियांहत्वाषड्वर्षाणिव्रतंचरेत् वैश्यंहत्वाचरेदेवंव्रतंत्रैवार्षिकंद्विज: शूद्रंहत्वाचरेद्व्यब्दंवृष
भैकादशाश्चगा:इति कामत: श्रोत्रियक्षत्रियादिवधेपिसएव तरीयोनंक्षत्रियस्यवधेब्रह्महणस्तुतं अर्धंवैश्य
वधेऊर्यांशंयिहवृषलस्यात्विति यत्तुवसिष्ठोक्तंब्राह्मणोराजन्यंहत्वाष्टौवर्षाणिव्रतंचरेदिति तत्किंचिन्न्यूनगुण

वंसर्वत्रापिदिनव्यतिक्रमोयत्रप्रायश्चित्तमाम्नातं तथा प्रथमेह्नित्रिरात्रंस्याद्द्वितीयेह्यहमेवच अहोरात्रंतृतीयेह्निचतु
र्थेनक्तमेवच शूद्रयोच्छिष्टयास्पृष्टाशुनाचह्यहमाचरेत् एतत्कामतःस्पर्शेअकामतोबौधायनोक्तं रजस्वलातुसं
स्पृष्टाचंडालान्यश्ववायसैः तावत्तिष्ठेन्निराहारायावत्कालेनशुद्ध्यतीति रजोदर्शननिमित्तत्रिरात्ररूपकालेनेत्य
र्थः अत्राशक्तौतेनैवोक्तंग्राह्यं रजस्वलाचसंस्पृष्टाग्रामकुक्कुटसूकरैः श्वभिःस्नात्वाक्षिपेत्तावद्यावच्चन्द्रस्यद
र्शनं तथारजस्वलातुभुंजानाश्वान्त्यजादीस्पृशेद्यदि गोमूत्रयावकाहाराषड्रात्रेणविशुद्ध्यति अशक्तौकांचनं
दद्याद्विप्रेभ्योवापिभोजनं उच्छिष्टयोरन्योन्यस्पर्शेत्रिः उच्छिष्टोच्छिष्टसंस्पृष्टाकदाचित्स्त्रीरजस्वला कृच्छ्रे
णशुद्ध्यतेपूर्वाशूद्रादानेनपोषितेति पूर्वाउत्कृष्टा मार्कण्डेयः द्विजान्कथंचिदुच्छिष्टारजःस्त्रीसंस्पृशेद्य
दि स्नावोच्छिष्टेत्वहोरात्रमूर्ध्वोच्छिष्टेत्र्यहंक्षिपेत् स्नावोच्छिष्टंमूत्रपुरीषादिना तथामृतसूतकसंपर्केदत्तंदृष्ट्वा
कथंभवेत् नास्नानकालमश्नीयाद्भुक्त्वाचान्द्रायणंचरेत् आस्नानकालंतत्पश्चिमदिनपर्यंतं अप्रायत्येसमुत्पन्ने
मलवद्वाससीयदि अभिषेकेतुभुक्तिःस्यात्रिदिनत्रयमभोजनं अप्रायत्येसूतकाद्याशौचेमलवद्वेशंपाहत्वाज
लस्पृश्यादिनांगिरसस्मरणात् एवमन्यान्यविषयविशेषेषुयोज्यानि अथदत्ताद्यादिवधे अथकामतोज्ञा ३०५

त्तिमात्रक्षत्रियादिवधे याज्ञवल्क्योक्तं वृषैकसहस्रागा दद्यात् क्षत्रवधे पुमान् ब्रह्महत्याव्रतं वापि वत्सरत्रितयं च
रेत् वैश्यहाब्दं चरेदेतद्दद्याद्वैकशतं गवाम् षण्मासाञ्छूद्रहाप्येतद्धेनूर्दद्याद्दशाथवा एकवृषभाधिकगोसहस्र
दानं ब्रह्मव्रतं वा क्षत्रवधे त्र्यब्दं तथनाद्यस्य वा हं तत्र वृषभैकगोसहस्रदानं इतरस्य [illegible] एवं वैश्यहननेपि व्यवस्था
एतद्ब्रह्महत्याव्रतं ...... मृचिरप्रसूतास्त्वन्ता: मनुः अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः वृषभैकसह
स्रा गा दद्यात्सुचरितार्थमात्मनः त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतं अकामत इष्यहत्तस्यविट्शूद्रवधे मनुः
वैश्ये ष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशोति द्वादशवार्षिकापेक्षयाष्टमांशः सार्धवर्षं षोडशांशो नवमासाः ए
तद्विकल्पत्वेनेन सार्धं वा वर्षचतुष्टयमीषद्वृत्तस्य क्षत्रियहननेकल्प्य वृत्तस्य स्वरूपं च स्मृत्यन्तरे गुरुपूजा घृणा
शौचं सत्यमिन्द्रियनिग्रहः प्रवर्तनं हितानां च तत्सर्वं वृत्तमुच्यत इति कामतस्तु जातमात्रक्षत्रियादिवधे वृद्धहा
रीतोक्तं ब्राह्मणः क्षत्रियं हत्वा षड्वर्षाणि व्रतं चरेत् वैश्यं हत्वा चरेदेवं व्रतं त्रैवार्षिकं द्विजः शूद्रं हत्वा चरेद्वर्षं वृष
भैकादशाश्च गा इति कामतः श्रोत्रियक्षत्रियादिवधेपि स एव तुरीयांशः क्षत्रियस्य वधे ब्रह्महणः स्मृतं अर्धं वैश्य
वधे ज्ञेयात्तुर्यं वृषलस्य त्विति यत्तु वसिष्ठोक्तं ब्राह्मणो राजन्यं हत्वाष्टौ वर्षाणि ब्रतं चरेदिति तत्किंचिन्न्यूनगुण

म॰ या॰ ३०६ हनेने नववार्षिकासमर्थस्यवा — एतच्चक्षत्रियादिहन्तृब्राह्मणस्य क्षत्रियादिहन्तॄणां तज्ञादीनां पादपादह्रास्या कल्पनीयं ए
वमन्यत्रापि अकामतः श्रोत्रियागस्थक्षत्रियादिवधे गोतमोक्तदानतपसोस्समुच्चयः ब्राह्मणस्य राजन्यवधे षा
ड्वार्षिकं प्राकृतम् ब्रह्मचर्यमृषभैकशताश्च गा दद्यात् वैश्यवधे त्रैवार्षिकं ऋषभैकशताश्च गा दद्यात् शूद्रवधे सं
वत्सरिकं ऋषभैकादशाश्च गा दद्यादिति शूद्रस्य श्रोत्रियत्वं द्विजशुश्रूषा पंचयज्ञमंत्रपाठश्च यागस्थत्वं पंच
महायज्ञाधिकरणं अत्रैव किंचिन्न्यूनगुणस्य क्षत्रियस्य वधे गुणाधिकयोर्वैश्यशूद्रयोर्वधे शंखेनोक्तं पूर्ववद
मति पूर्वं चतुर्षु वर्णेषु प्रमापणे द्वादशषट्त्रीन्संवत्सरान्व्रतान्यादिष्टानि तेषामंते गोसहस्रं तत्तदर्धं तस्यार्धमर्धं च दद्या
त् सर्वेषामानुपूर्व्येणेति मूर्धावषिक्तादिहननेन तु ब्राह्मणापेक्षया न्यूनं क्षत्रियापेक्षयाधिकमप्येवं प्रकारेण
कल्पनीयं मूर्धावसिक्तादिस्वरूपं याज्ञवल्क्यः विप्रान्मूर्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम् अम्बष्ठः शूद्र्यां
निषादो जातः पारशवोपि वा वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ वैश्यात्तु करणः शूद्र्यां विन्नास्वेष
विधिः स्मृत इति विन्नासु विवाहितासु अथ वधप्रायश्चित्तप्रसंगात्प्रतिलोमवधप्रायश्चित्तं तत्र कामतः सूतादि
वधे ग्रावः सर्वेषां स्वकृष्टानां वधे प्रत्येकमेकं चान्द्रायणमिति अत्र यद्यपि प्रत्येकं चान्द्रायणमिति सामान्येनोक्तं त २०६

थापिसूतादेस्तयोर्वैदेहकादीनां सूतत्वात्पादोनादिचान्द्रायणं कल्प्यं अत एव निबंधांतरेषु सूतवधे संपूर्णचान्द्राय
णं वैदेहकवधे पादोनं चण्डालस्य वधेर्धं मागधस्य वधे त्रिपादोनं क्षत्तरि पादद्वयं आयोगवे ध्यर्धपादमित्युक्तं अकाम
तो वधे गिरसोक्तं सर्वान्त्यजानां गमने भोजने संप्रमापणे पराकेण विशुद्धिः स्यादित्यांगिरसभाषितं अत्रापि सू
तादीनां पूर्ववद्व्यवस्था आहत्यासूतादिवधे ब्रह्मगर्भोक्तं अंतरप्रभावाणां च सूतादीनां द्विषडिति अत्र मासद्व
यमनुवर्तते आहत्यासूतस्य वधे षण्मासाः वैदेहकस्य वधे चत्वारः चंडालवधे द्वौ मागधवधे चत्वारः क्षत्तृवधे
मासद्वयं आयोगववधेपि मासद्वयमेव सूतादिस्वरूपमाह याज्ञवल्क्यः ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेह
कस्तथा शूद्राज्जातस्तु चंडालः सर्वधर्मबहिष्कृतः क्षत्रिया मागधं वैश्यात् शूद्रात्क्षत्तारमेव च शूद्रादायोगवं वैश्या
जनयामास वै सुतं माहिष्योग्रकरण्यां तु रथकारः प्रजायते असत्सन्तस्तु विज्ञेयाः प्रतिलोमानुलोमजाः निन्दिता
र्थोपजीवने मनुयोगीश्वराद्युक्तोपपातकसामान्यप्रायश्चित्तानि जातिशक्त्याद्यपेक्षया योज्यानि तथा च नास्ति
केच नास्तिक्ययोजनप्रकारः अत्यंताभिनिवेशेन बहुकालं नास्तिक्याभ्यासे शंखेनोक्तं नास्तिको नास्तिकवृ
त्तिः कृतघ्नः कूटव्यवहारी मिथ्याभिशंसी इत्येते पंच संवत्सरं ब्राह्मणगृहे भैक्षं चरेयुरिति अस्मिन्नेव विषये हा

म॰पा॰
३०८

रीतोऽक्रमपि ब्रह्मचर्यं तरेत्तावर्गतव्यं अभ्यासेऽनूपपातकसामान्यप्रायश्चित्तानि सकृत्कृतेतवासिष्टं नास्तिकः कृ
च्छ्रं द्वादशरात्रं चरित्वाविरमेन्नास्तिक्यात् नास्तिकवृत्तिस्त्वतिकृच्छ्रमिति नास्तिकवृत्तिर्वेदनिन्दनजीवे अथव्र अक्षवृतलोते
तलोपोनामावकीर्णित्वं अवकीर्णिस्वरूपंप्रायश्चित्तंचाह याज्ञवल्क्यः अवकीर्णीभवेद्गत्वाब्रह्मचारीस्त्रियो
षितं गर्दभंपशुमालभ्यनैर्ऋत्यंसविशुध्यतीति नैर्ऋतिदेवताकंगर्दभमालभ्ययागः कर्तव्यइत्यर्थः पशुया
गेयथावदाहिहोमाक्रियं नेतद्वदत्रापिकर्तव्यं अत्रविशेषमाह वसिष्ठः ब्रह्मचारीचेत्स्त्रियमुपेयादरण्ये चतुष्प
थेवालौकिकाग्नौ रक्षोदैवतंगर्दभंपशुमालभेतनैर्ऋतंयवाचरुंनिर्वपेत् तस्यजुहुयात् कामायस्वाहा निर्ऋ
त्यैस्वाहा या रक्षोदेवताभ्यः स्वाहेतिमन्त्रः अवकीर्णित्वंकाणेनगर्दभेनचतुष्पथे पाकयज्ञविधानेनयजेतनिऋ
त्यंतं निशिहुत्वाग्नौ विधिवद्धोमानंततश्चसमित्यृचा वातेन्द्रगुरुवह्नीनांजुहुयात्सर्पिषाहुतीः कामतोरेतसस्से
कंव्रतस्थस्यद्विजन्मनः अतिक्रमंव्रतस्याहुर्धर्मज्ञाब्रह्मवादिनः पाकयज्ञविधानेन परिसमूहनपर्युक्षणा
दीतिकर्तव्यतयाप्रधानाहुतिभिः पूर्ववानायस्वाहेत्यारभ्यवह्नयेस्वाहेत्येतस्यचतुर्भिर्मन्त्रैराज्यहोमः प्र
धानहोमान्ते समास्तित्विन्त्यृचावातादीनांसर्पिषाजुहुयादिति ततश्चविकल्पः रात्रिश्चमावास्यायाः कालः ३०८

तयाचैतेन्निरृयकेयोब्रह्मचारीचत्किरेदमावास्यायामग्निंप्रणीयेत्यादि इदंचाशक्तस्य शक्तस्यपुनरश्रोत्रियब्राह्मणभार्या
यांश्रोत्रियपत्न्यांवैश्यायांचावकीर्णित्वे गौतमोक्तनयस्तम्प्रश्चितोगर्दभपशुस्वरूर्वागर्दभेनावकीर्णीनिन्दतिचतुष्प
थेयजेत तस्माजिनमूर्ध्ववालंपरिधायलोहितपात्रः सप्तगृहान्भैक्षंचरेत् कर्माचक्षाणः संवत्सरेणशुद्ध्येदिति
अत्रत्रिषवणस्नानमेककालभोजनंचमनूक्तंद्रष्टव्यं गौतमोक्तमिति कर्तव्यतानुवृत्तौचशंखलिखितौ शूद्रायां
वैश्यायामवकीर्णः संवत्सरंत्रिषवणमनुतिष्ठेत् क्षत्रियायांद्वेवर्षेब्राह्मण्यांत्रीणिवर्षाणीति एतच्चगुणवच्छ्रो
त्रियपत्नीविषयं शूद्रायांतुषण्मासिकंकल्प्य इष्टव्यभिचारिणीष्वंगिरसोक्तम् अवकीर्णीनिमित्तंतुब्रह्महत्याव्र
तंचरेत् चीरवासा .... चीरंवस्त्रखंडः अत्यंतमभिचरितासुशंखलिखितोक्तं वृषल्यामवकीर्णः सचेलस्ना
नमुदकुंभंचदद्यात् ब्राह्मणोवैश्यायांचतुर्थकालाहारेब्राह्मणान्भोजयेत् यवसभारंचगोभ्योदद्यात् ब्राह्म।
णींवैश्यायांचतुर्थकालाहारोब्राह्मणान्भोजयेत् यवसभारंचगोभ्योदद्यात् क्षत्रियायांत्रिरात्रोपोषितोघृत
पात्रंदद्यात् ब्राह्मण्यांषड्रात्रोपोषितोगांदद्यात् गोष्ववकीर्णः प्राजापत्यंचरेत् षण्ढायामवकीर्णः प्राजापत्यंच
रेत् पलालभारंसीसमाषकंचदद्यादिति एतच्चप्रायश्चित्तंद्विजातिमात्रविषयंयदाहशांडिल्यः अवकी।

म॰पा॰ ॥
२४८

णि हि द्विजो गजा दैवत्वाश्चापि देवैरीरित इष्टो मेत्याशिनो नित्यं शुद्धं त्वद्रात्समाहिता इति यः स्त्रीसंभोगमंतरेणाकामतो
रेतो विसृजति दिवास्वापे वा यस्य प्रायश्चित्तार्थं गभूतब्रह्मचर्यवानवकीर्णिवानस्पगर्दभपशुनालं भस्ये र्वायदाह
वसिष्ठः एतदेव रेतसः प्रयत्नोत्सर्गे दिवास्वप्ने व्रतालंभे चैवमिति एतदेवयागमात्रमेव रात्रिस्वप्नस्खलनेतुम
त्त॰ तुः स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं पठेत् वानप्रस्थादिष्वविशेष
माह शांडिल्यः वानप्रस्थो यतिश्चैव स्वखंडने सति कामतः पराकत्रयसंयुक्तमवकीर्णिव्रतं चरेत् खंडने ब्रह्मचर्यस्य ख
ण्डने संन्यासधर्मतः कश्चित्प्रत्यापत्तिं व्रजेद्यदि स कुर्यात्कृच्छ्रमश्रांतः षण्मासान्प्रत्यनंतरमिति प्रत्यापत्तिर्गा
र्हस्थ्यपरिग्रहः इति मिताक्षरायां एवं च षण्मासकृच्छ्रानंतरं गार्हस्थ्यमेवावतिष्ठेदित्यभिप्रायेण गम्यते वयं तु ब्रू
मः संन्यस्य प्रत्यापत्तिं व्रजेदित्युक्तेः संन्यासस्यैव प्रत्यापत्तिः प्रत्यापत्तिश्च स्वरूपात्प्रच्युतस्य पुनर्लब्ध्या प्राप्तिः संन्यासि
स्वरूपपरित्यागश्च गृहस्थाश्रमस्वीकारेण प्रत्यापत्तिस्तु पुनः संन्यासस्वीकारेण अतः संन्यासात् गृहस्थाश्रमं स्वी॰
कृतवान् गृहस्थाश्रमे पवित्रं षण्मासान्कृच्छ्रं कृत्वा पुनः संन्यस्येदेवेति पराशरः यः प्रत्यवसितो विप्रः सप्रव्राज्यो
ति निर्गतः अनाशकप्रवृत्तेश्च गार्हस्थ्ये च चिकीर्षति षाण्मासिकाः शक्तो चान्द्रायणानि तदशक्तो कृच्छ्राणि यस्त २४८

म॰ पा॰ मिं पात्रे मृद्दहतां दक्षिणाप्रवणां दिशुणोपेतां कृत्वा रात्रौ विप्रान्निमंत्रयेत् ततस्तब्राह्मणेभ्यो दंतकाष्ठं विसृजे
१८३ त् इति मंत्रणमत्याकृतेव्यमाह पैठीनसिः श्वः श्राद्धं करिष्यामीति संकल्प्य ब्राह्मणान्सप्त पंच वा श्रोत्रियान्नि
मंत्रयेतेति द्वौ वैश्वदेवार्थे त्रयः पित्रर्थमिति पंच चत्वारो वैश्वदेवार्थे त्रयः पित्रर्थमिति नन्द्वौ वैश्वदेव
स्थाने पंच पितृस्थाने इति संख्या किमिति नांगीक्रियत इति चेन्मैवं दैवे युग्मान् अयुग्मान्यथाशक्ति पित्र्य
एकैकस्येति कात्यायनेन शक्तिसंभवे एकादिक्रमेणापि त्र्ये अयुग्मब्राह्मणाह्वयिहतौ ततस्त्र समंस्याद॰
ष्कृतत्वादिति न्यायेनापि त्र्यादित्रयेष्वेकैकं प्रत्येकं वा त्रीं स्त्रीन्निमंत्रयेतेति नियतं तथापि त्र्ये पंचानां निमं॰
त्रणा पितृपितामहप्रपितामहोद्देशेन समविभागो न प्रसज्येतेति पूर्वोक्त एव विभागः अथवा सप्त पंच
वेति पित्र्यब्राह्मणसंख्यैव यत्तु मनुनोक्तं द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा भोजयेत्सुसमृद्धोपि न प्र
सज्जेत विस्तरे इति तत्तु देशकालबलाद्यभावे विस्तरे क्रियमाणे कर्मवैगुण्यभयाद्विस्तारनिषेधपरं
याज्ञवल्क्यः मातामहानामप्येवं तंत्रं वा वैश्वदेवकं वसिष्ठः अपि वा भोजयेदेकं ब्राह्मणं वेदपारगं
यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य तु देवतायतने कृत्वा यथा॰ १८३

इति मनूक्तः कुण्डाशी कुण्डगोलकसंबंधन्नाशी कुण्डगोलकसंबंधन्नाशी कुण्डगोलकाद्वभिधायय
स्तयोरन्नमश्नाति स कुण्डाशप्युच्यते द्विजः इति मनुस्मरणात् ब्रह्माण्डे त्वन्यथा चवष्षष्ठ्यापलैः शुद्धैः
कुण्डं प्रस्थं चतुष्टयं भवेत्तु यस्मान्निगोरेन्नं कुण्डाशीयनत्यधः वृषलीधर्महीनस्तदात्मजो वृषला
त्मजः अथ वा वृषलः शूद्रः तस्यात्मजो यस्य यत्र एवं तु न भर्तृस्तस्य पतिः कर्मडष्ठाः शास्त्रविरुद्धका
रिणः चक्रावाड्धर्मविद्धप्रजननादयः मनुः चिकित्सकान्देवलकान्मासविक्रयिणस्तथाविपणे
न च जीवंतो वर्ज्याः स्युर्हव्यकव्ययोः पक्षी च पशुपालश्च परिवेत्तानिराकृतिः ब्रह्मद्विट्परिवि
त्तिश्च गणाभ्यंतर एव च पशुपालो हरमर्थं निराकृतिर्नास्तिकः गणाभ्यंतरो मठब्राह्मणादिः कु
शीलवोवकीर्णी च वृषलीपतिरेव च पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे कुशीलवो नटः अ
कारणपरित्यागी मातापित्रोर्गुरोस्तथा ब्राह्मयौनैश्च संबंधे पतितैस्सह संगतः अथ ब्राह्मणनिमंत्र
णविधिस्तन्नियमश्च वराहपुराणे वसुश्रोवादिकर्नेवं श्वकर्त्तास्मीति जानता स्थानोपलेपनं भूमिं
सेत्वा विप्रान्निमंत्रयेत् दंतकाष्ठं च विसृजेद्ब्रह्मचारी शुचिर्भवेत् वसुश्रो चाक्षिकमाह्निकं त्वा श्राद्धभू

म॰पा॰ हस्तेणयोगी एको विशिष्यते अथानुकल्पः तत्र मनुः एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः अनुकल्पस्त्व
१८२ यं ज्ञेयः सदा सद्भिरनुष्ठितः मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुं दौहित्रं विट्पतिं बंधुमृत्विग्याज्यौ च भो
जयेत् विट्पतिर्जामाता बंधुशब्देन जन्मबंधवः स्नेहबंधवश्च गृह्यंते वसिष्ठः शिष्यानपि गुणवतो
भोजयेत् अथ वर्ज्याः मनुः न श्राद्धे भोजयेन्मित्रं धनैः कार्योस्य संग्रहः नारिं न मित्रं यं विद्यात्तं श्राद्धे भोजये
द्द्विजं याज्ञवल्क्यः रोगी हीनातिरिक्तांगः काणः पौनर्भवस्तथा अवकीर्णी कुण्डगोलौ कुनखी श्यावदन्त
कः भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकाः मित्रध्रुक् पिशुनः सोमविक्रयी परिविन्दकः मा
तापितृगुरुत्यागी कुण्डाशी वृषलात्मजः परपूर्वापतिः स्तेनः कर्मदुष्टाश्च निन्दिताः रोगी दीर्घरोगी पौन
र्भवः पुनर्भूपुत्रः अवकीर्णी ब्रह्मचार्येव सन् त्यक्तब्रह्मचर्यः कुण्डगोलौ परपूर्वाउत्पन्नौ जीवे भर्त्त
१८ रि कुण्डः मृते भर्तरि गोलक इति मनुः श्यावदन्तः स्वभावतः भृतकाध्यापकः मूल्यं गृहीत्वाध्या
पकः मूल्यदानेनाध्येतापि निषिद्ध एव साग्निरनग्निर्वा दोषैः कन्यादूषकः सोमविक्रयी सोमलताविक्र
यी परिविन्दकः दाराग्निहोत्रसंयोगं यः करोत्यग्रजे स्थिते परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वज १८२

श्रोत्रियान्वयजाश्चैव विज्ञेयाः पंक्तिपावनाः पंक्तिपावनाः त्रिनाचिकेताः पंचाग्निः त्रिसुपर्णःषडंगवित् ब्रह्म
देयानुसंतानो धर्मविज्ज्येष्ठ॰ सामगः वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः शतायुश्चैव विज्ञेया ब्राह्मणाः
पंक्तिपावनाः सर्ववेदेषेकस्मिन्वा अग्र्याः अग्र्या अपंक्तानां मध्ये मुख्याः एवं सर्वप्रवचनेषु वेदार्थनिवचनेषु श्रो
त्रियान्वयजाः वेदाध्येतृकुलजाः त्रिनाचिकेतः अध्वर्युवेदभागस्तद्व्रतं च तदुभयं योधीते यश्च करोति
सोपि तद्योगात्त्रिनाचिकेतः पंचाग्निः गार्हपत्यदक्षिणाग्न्याहवनीयासभ्यावसथ्याग्निमान् त्रिसुपर्णः
अध्वर्युवेदभागस्यार्थतो ग्रंथतश्चाध्येता षडंगवित् शिक्षादीनामर्थतो ग्रंथतश्च वेत्ता षडंगवित् शिक्षादी
नामर्थतो ग्रंथतश्च वेत्ता ब्राह्मविवाहदत्ता ब्रह्मदेया तत्संततिस्तदनुसंतानः ब्रह्मदेयैव यत्परम्परायां भा
यां तत्संततिरिति ख्यापनार्थमनुपदं साम्नस्तत्तद्गानाज्ज्येष्ठसामगः अथवा ज्येष्ठ॰ साम छंदोगानां व्रतं सा
मानि च तद्योगाज्ज्येष्ठसामगः प्रवक्ता वेदार्थव्याख्याता सहस्रदो गोसहस्रदः इति मेधातिथिः पूर्णशत
वर्षः शतायुः मात्स्ये यश्च व्याकुरुते वाचं यश्च मीमांसते ध्रुवं सामस्वरविधिज्ञश्च विज्ञेयः पंक्तिपावनः
वायुपुराणे यतिस्तु सर्वविप्राणां सर्वेषामग्रभुग्भवेत् गृहस्थानां सहस्रेण वानप्रस्थशतेन च ब्रह्मचारिस

म॰ या॰ दुग्धंचतथैवाम्लावलोहितं शर्कराकीटपाषाणैः केशैर्यश्चाप्युपद्रुतम् पिण्याकंमथितंचैवतथातिलवशांचयत् सि
१८१ द्धाः कृताश्चयेभक्ष्यामस्त्वलवणीकृताः वाग्भावदुष्टाश्चतथादुष्टैश्चोपहताश्चया वाससाचावधूतानिवर्ज्यानि
श्राद्धकर्मणि राजमाषालयाचैववर्ज्याः सद्भिः प्रयत्नतः आविकंमार्गमौष्ट्रंचसर्वमेकशफंचयत् माहिषंचाविधं
चैवपयोवर्ज्यंविजानता द्विःस्विन्नंशाकादिसंस्कारार्थंजीरकादिप्रक्षेपेणपुनः पक्वंमतः एवं पाकादावे
वसंस्कार्यः यश्चव्यंजनादेरौष्ण्यापगमेसतिपुनरुष्णतापाद्यतेसोपिद्वितीयः पाकः सचवर्ज्यः अग्रावलोहितमु
पयुक्ताग्रभागांसिद्धाः कृताः संतइतियेष्वसिद्धेपुनरकालेप्रत्यक्षलवणक्षेपः कृतास्तेनाहृणाः अथब्राह्मणप
रीक्षा तत्रमनुः दूरादेवपरीक्षेतब्राह्मणांवेदपारगं तीर्थंतद्धव्यकव्यानांप्रदानेसोतिथिर्मतः सहस्राणि
सहस्राणामनृचांयत्रभुंजते एकस्तान्मंत्रवित्प्रीतः सर्वानर्हतिधर्मतः ज्ञानोत्कृष्टायदेयानिकव्यानिचहवीं
षिच नहिहस्तावसृग्दिग्धौरुधिरेणैवशुद्ध्यतः दूरात्परीक्षात्पितृपितामहाद्यभिजनाचारादिपरीक्षा मत्स
नेरजात्मिन्नापिप्रधानेतिथिवत्सूत्र्यस्त्वर्थः नब्राह्मणंपरीक्षेतदैवेकर्मणिधर्मवित् पित्र्येकर्मणिसंप्राप्तेपरी
क्षेतप्रयत्नतः ऋतहत्नायः परीक्षेतेत्यर्थः अपपंक्तिपावनाः तत्रमनुः अग्र्याः सर्वेषुवेदेषुसर्वप्रवचनेषुच १८१

षः कोविदारः श्वेतकांचनारसदृशः तालकन्दो वालमूली शालकन्दश्च शतावरी शीतकन्दश्च शाल्
कः कालेयं करालाख्यं शाकं स्तनिषसं चांगेरी सदृशं शाकं पलमांसाद्यामिति पाठः तद्दास्तु वर्चला
दयः शाकविशेषाः कोकणदेशोद्भवा कोंकणी द्वाला यावक दलीफलं कर्कं धुर्वदरीविशेषाः श्ले
गाटकं स्तलोद्भवमूलविशेषः तत्साहचर्यात्तद्रूपकमपि तथैव नागरेस्तगाठी इतरनामान्यभिधान
तो देशविशेषनिवासिभिश्चावगंतव्यानि एवमादीन्यन्यानि स्मृत्यंतरतो वगंतव्यानि अथवर्ज्यानि
शंखः भूतृणां सुरसं शीग्रुपालकां मधुकं तथा कूष्माण्डलावु चोवार्त्तकोविदारांश्च वर्जयेत् पिप्प
लीमरिचं चैव तथा वै पिण्डमूलकं कृतं चलवणं सर्वं वंशाग्रं चैव वर्जयेत् कोविदारपिप्पलीमरीच
वंशांकुराणां विहितप्रतिषिद्धत्वाद्विकल्पः एवं हिंग्यवीजसरादीनामपि ज्ञेयं अथवापिप्पलीमरि
चयोर्निषेधः मन्यतयोः हिंगुनिषेधश्चाके ऽनुनफलव्यंजनेषु तथा च वर्ज्यप्रकरणे व्यासः हिंगुद्
व्यं शाकेषु किंति द्रव्योषिति शाकविशेषणं अन्यथाद्रव्योषित्यनेनैवासिद्धे शाकपदव्यर्थं स्यात् ब्रह्माण्ड
पुराणे आसनारूढमन्नाद्यं पादोपहतमेव च अमेध्यैर्जंगमैः स्पृष्टं शुष्कं पर्युषितं च यत् हिंः खिन्नं पि

स॰ गा॰
१८५

यवांस्तथैव च मधूलिका हंसाः श्वेतालोहिताश्च यास्ताः स्वः श्राद्धकर्मणि॥ विल्वामलकमृद्वीकपनसाम्रानि
दाडिमं भव्यपारेवताक्षोटखर्जूराणां फलानि च कशेरुः कोविदार्यश्च तालकन्दस्तथा बिसं तमालं शातक
न्दं च तथा वै शीतकन्दकं कालेयं कालशाकं च सूनिषण्णं सुवर्चलं मांसं शाकं दधिक्षीरं शालं वेत्राङ्कुरस्तथा
मासालं पयिशाकं चेत्यपि पाठः कट्फलं कौंकणीशाल्मलजं च मोचमेव च अलाबुग्रीवं चारुककर्केधुम॰
धुसाहूयं वैकंकतं नारिकेरं शृंगाटकपरूषकं कर्केधुविशेषणान्यलाबुग्रीवमित्यादीनि अत्र पाठान्तरम॰
पि कर्केधुग्रीवकं चापि तिन्दुकं मधुसाहूयं वैकंकतं नारिकीरं शृंगाटकपरूषकं पिप्पलीमरिचं चैव
पटोलं बृहतीफलं एवमादीनि चान्यानि स्वादूनि मधुराणि च महायवा वेणुयवाः मधूलिका याव
नालविशेषः अस्यैव विशेषणं हंसाः श्वेतालोहिताश्चेति कल्पतरुकारः गोविन्दराजस्तु स्मृतिमं
जर्यामन्यथा व्याचख्यौ हंसा हंसा गौराख्या षष्टिकाः शालिभेदाः गौरषष्टिकाः श्वेतालोहवाला
ख्याः शालिभेदाः गौरषष्टिकाः श्वेतालोहवालाख्याः शालयो लोहिताः मृद्वीका गोस्तनी द्राक्षाभे
दः पारेवतं हृतानविशेषः अक्षोटं क्षक्षीरमासिंगी तिमिश्रवं पीलुफलं कशेरुः कालजो मूलविशे १८१

संततं प्राकुर्यान्निकायत्तकर्माणि त्रिपिबामिति उदकं पानसमये मुखं कर्णौ हृदयं च उदकमध्ये पततीति त्रिपिबः म
हाशल्कामत्स्यविशेषः लोहामिषं लोहो नाम रक्तच्छागः पक्षिविशेषः सोपि वाध्रीणसेति व्यपदिश्यते तथा
च निगमे कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहंगमः स वै वाध्रीणसः प्रोक्तः इत्येषा नैगमी श्रुतिरिति अथवा
लो लोहैः छागः श्राद्धे मांसोपादानं क्षत्रियादिविषयं मन्यन्ते ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोरिति शूल
स्येन क्षत्रियादीनां मांसनियमात् छागमेषयोरालम्भः कर्तव्य इतरेषां तु न तथा कात्यायनः छाग
मेषावालब्धव्याः मेषाणि क्रीत्वा लब्ध्वा वा स्वयं मृतानां वाहृत्य पचेदिति शंखः क्षत्रियैस्तु मृगयायां वि
धिनायदाहृतं श्राद्धकाले प्रशंसंतीति हव्याग्रहृतं च यत् विष्णुः शाकैः श्यामाकैः प्रियंगुनीवारैर्मुद्ग
गौधूमैश्च मासं प्रीयंते पैठीनसिः हुतेन मासं प्रीणाति आदित्यपुराणे मधूकं रामठं चैव कर्पूरं मरिचं गुडं
श्राद्धकर्मणि शस्तानि सैंधवं त्रपुसं तथा रामठं हिंगु वायुपुराणे पणमाकास्त्मिलिनामानो विहिता
प्रि न्यवहानि स्वस्तात् प्रमा[illegible]का[illegible]यंगुश्च मुद्गाश्च हरितकास्तथा मुद्राश्चैव न्य याहमः सुः श्राद्धकर्मणि एता
न्यायसमानैः स्वश्यामाकानां गौधूम कृष्णमाषास्तिलाश्चैव श्रेष्ठाः सर्व एव शालयः महायवा व्रीहि।

धि२

पाठांतरं

मा० भू०
९८०

तस्यायमर्थः आधिमासिकं मलिम्लुच एव कुर्वीत पुनराब्दिकं द्वितीयायामाब्दिकं त्रयोदशे मासि परिपूर्णे च त्रयोदशमा
सप्रथमादिने कुर्यादिति अधिमासे काम्यव्रतादीनामारम्भः परिसमाप्तिश्चेति द्वयमपि निषिद्धं क्षयमासे तत्प्रथ
मारम्भ एव निषिद्धः इति संक्षेपेण मलमासे विधिनिषेधौ कर्मणां दर्शितौ विशेषस्तु मलमासनिर्णये द्रष्टव्यः
उक्ताः श्राद्धोपयुक्तकालाः अथेदानीं श्राद्धे हविर्विशेषान्प्रति विशेषेणाभिधीयते तत्र मनुः यद्धविश्चिरका
लाय यच्चानंत्याय कल्पते पितृभ्यो विधिवद्दत्तं तत्प्रवक्ष्याम्यशेषतः तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा द
त्तेन मासं प्रीयंते विधिवत्पितरो नृणां द्वौ मासौ मत्स्यमांसेन त्रीन्मासान्हारिणेन तु औरभ्रेणाथ चतुरः शाकुने न्
न तु पंच वै षण्मासांश्छागमांसेन पार्षतेनाथ सप्त तु अष्टावेणस्य मांसेन रौरवेण नवैव तु दशमासांस्तु
तृप्यंति वराहमहिषामिषैः शशकूर्मयोर्मांसेन मासानेकादशैव तु संवत्सरं तु गव्येन पयसा पायसेन वा
वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी कालशाकं महाशल्काः खड्गलोहामिषं मधु आनंत्यायैव कल्प्यं
ते मुन्यन्नानि च सर्वशः मत्स्याः पाठीनादिः शाकुनिः पक्षी सोऽप्यनिषिद्धो ग्राह्यः पृषताश्चित्रमृगाः एणः कृष्ण
सारः रुरुः शंबरः गव्येन पयसा वार्ध्रीणसो निगमोक्तः त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिं वार्ध्रीण १८०

यदाप्रथमसंवत्सरेदैवादधिमासस्त्रयोदशः तदाप्रथमाब्दिकमधिमासएव अब्देपरिपूर्णेसपिण्डीकरण
पन्नाप्रयणोसपिण्डीकरणमप्येतत्रैव तदाहवसिष्ठः असंक्रान्तेपिकर्तव्यमाब्दिकंप्रथमंद्विजैः तथैवमा
सिकंश्राद्धंसपिण्डीकरणंतथा यत्तुसत्यव्रतेनोक्तं वर्षेवर्षेतुयःश्राद्धंमातापित्रोर्मृताहनि मलमासेन
कर्तव्यंव्याघ्रस्यवचनंयथेति एतदधिमासादन्यत्रमृतस्यसांवत्सरिकविषयंप्रथमाब्दिकव्यतिरिक्तविष
यंच अत्रमलमासोनामाधिकमासएवनतुक्षयमासः क्षयमासेतत्रैवश्राद्धविधानात् एकएवयदामासः
संक्रान्तिद्वयसंयुतः मासद्वयगतंश्राद्धंमलमासेपिशस्यते गालवोपि वर्षेवर्षेपियच्छ्राद्धंमातापित्रोर्मृ
तेहनि मासद्वयेपितत्कुर्याद्व्याघ्रस्यवचनंयथा मासद्वयेतिसंक्रान्तिद्वययुक्तत्वात्क्षयमासएवमास
द्वयात्मकः अपिशब्दएवकारार्थे क्षयमासएवश्राद्धंकुर्यादितिएवंविधान्यन्यान्यपिवचनान्यस्मिन्नेव वि
षयेयोज्यानि द्वितीयाब्दिकंश्राद्धएवकार्यंतस्मिंस्तुप्राकृतेमासिकुर्यात् श्राद्धंयथाविधि तथैवाश्वदयंस
र्वनियममेकेहिसर्वदेतिसत्यव्रतस्मरणात् प्राकृतेशुद्धे नित्यानियमेनैकमेवशु[illegible]कुर्यान्नमलमासे
इत्यर्थः यत्तुयमवचनं आब्दिकंप्रथमंयत्स्यात्तत्कुर्वीतमलिम्लुचे त्रयोदशेतुसंप्राप्ते कुर्वीतपुनराब्दिकमिति

श्रा.प.

१५८

अथं च निषेधो दर्शश्राद्धादिव्यतिरिक्तविषयः तीर्थस्नानं पूर्वोपक्रांतं तथा जपश्च यवादिभिर्होमो नित्यहो
मः तावदेकग्रहणपरिशिष्टे मले नत्यगतिं नित्यं कुर्यान्नैमित्तिकीं क्रियां सोमयागादिकर्माणि नित्यान्य
पि मलिम्लुचे तथैवाग्रायणादानचतुर्मास्यादिकान्यपि महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्मयत् स्प
ष्टमासविशेषाख्याविहितं तद्वर्जयेन्मले महालयो भाद्रपदापरपक्षः स्पष्टेति मासविशेषनामग्रहणेन
पद्धहितं वैशाखे कार्यमित्येवमादि तदपि तथा प्रेतमालादिमारभ्य श्राद्धपिंडोदकक्रिया सपिंडीकरणांता
श्च यथाकालमुपस्थिताः अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचे अगस्त्यः न कुर्यान्मलमासेतिकर्मी
कर्म कथंचन मृत्यौ नैमित्तिके श्राद्धं नत्वत्रैव कीर्तितं एकोद्दिष्टं त्रयः श्राद्धं तन्नैमित्तिकमुच्यते तत्का
र्यं सर्वमासेपि कालाधिकोपि धर्मतः एकोद्दिष्टं षोडशश्राद्धादि सर्वमासेपि अपिशब्द एवकारार्थः सर्वे
मासे च तत्कार्यमित्यर्थः कौथुमिः अब्दमेकं घटं दद्यादन्नं वापि सुसिंचितं संवत्सरे विवृद्धेपि प्रतिमासं
च मासिकं मलमासस्मृतीनां त्रयः श्राद्धं प्रतिवत्सरं मलमासेपि तत्कार्यं नान्येषां तु कथंचन तु शब्द
एवकारार्थः व्यासः अधिमासे विपन्नानां सौरं मानं समाश्रये स एव तस्य मासोपि श्राद्धपिंडक्रियादिषु १५८

नुष्ठानंतत्सर्वमधिमासेपिकर्त्तव्यमितिरहस्यपरिशिष्टे अवषट्कारहोमाश्चपर्वंचाग्रायणंतथा मलमासे
पिकर्त्तव्यंकाम्याइष्टीर्विवर्जयेत् अवषट्कारोहोमाः अग्निहोत्रोपासनवैश्वदेवाद्याः दर्शनपूर्णमासोप
वंपर्वणाः स्थालीपाकश्च आग्रायणंआग्रायणेष्टिः आपदिवृत्तनवधान्याभावेकर्त्तव्या आग्रयणेष्टिर्नत्वा
नापदिस्मत्संतेषांआग्रायणनिषेधात् यमः गर्भेवार्धुषिकेभृत्येश्राद्धकर्मणिमासिके सपिण्डीकरणेनि
त्येनाधिमासंविवर्जयेत् तीर्थस्नानंजपोहोमोयवव्रीहितिलादिभिः जातकर्मान्तकर्माणिनवश्राद्धं
तथैवच मघात्रयोदशीश्राद्धंश्राद्धान्यपिचषोडश चंद्रसूर्यग्रहेस्नानंश्राद्धदानजपादिकं कार्याणिमल
मासेपिनित्यंनैमित्तिकंतथा गर्भेगर्भनिमित्तपुंसवनादिकर्माणि वार्धुषिके अशीतिभागोवृद्धिःस्यादि
त्यादिरुक्तवृद्धिग्रहणे भृत्ये भृत्यभृत्यस्यवेतनदाने श्राद्धकर्माणिमासिकेअमावस्याश्राद्धे केचनऋष्य
शृंगवचनमन्यथापठित्वामावस्याश्राद्धनिषेधमपिकुर्वंति वचनंतु संवत्सरातिरेकोवैमासोयःस्या
त्त्रयोदशाः तत्रत्रयोदशंश्राद्धंनकुर्यादिंद्रसंत्वयेइति अयंचपाठोनयुक्तः बहुस्मृतिविरोधादनेकवं
धकारैरनादृतत्वात् अपरेतुतस्मात्त्रयोदशंश्राद्धंनकुर्यान्नोपतिष्ठतीतिपठंति अयमेवपाठोयुक्तः

म० प्र०

ग्निष्वेव प्रवृत्तिनियमाभावात् चतुर्मासगांतपिअष्ट्यांसौमिकमपेवचाहिताग्नेरेवाधिकारात् तत्रश्राद्धेस्मार्ताग्नेर्नाधि
कारः यदिपूर्वोक्तकालेष्वश्रौताग्नेरेवाधिकारस्तदाहिताग्निरित्येवब्रूयात् नसाग्निकइति तस्माद्ग्निद्वयवताम
प्युक्तकालेश्राद्धादिकारःसिद्धः अथाधिमासेविहितानिनिषिद्धानिच तत्रशातातपः एकसंवत्सरोयदामासौस्या
तांसंवत्सरेक्वचित् तत्राद्येपितृकार्याणिदेवकार्याणिचोत्तरे व्यासः षष्टिभिर्दिवसैर्मासः कथितोबादरायणैः
देवकार्याणिपूर्वत्रापितृकार्याणिचोभयोः देवकार्याणिनित्याग्निहोत्रवैश्वदेवादीनि तथापितृकार्याण्यप्याव
श्यकान्येव एवंचवचनद्वयबलादावश्यकानांदेवपितृकार्याणामुभयत्रकर्तव्यताप्रतीयते एवमादीन्यन्यान्यपि
वचनानिआवश्यकदेवकार्यपितृकार्यविषयाणि तथाचबृहस्पतिः नित्यनैमित्तिकेकुर्यात्प्रयतःसन्मलिम्लु
चे तीर्थश्राद्धंगजच्छायाप्रेतश्राद्धंतथैवच नित्यंयदकरणेकालातिक्रमनिमित्तंप्रायश्चित्तंश्रूयते यथाअग्नये
पथिकृते पुरोडाशमष्टकपालंनिर्वपेद्योदर्शपौर्णमासीयाजीवसन्नमावस्यांवापौर्णमासींवातिपातयेदिति
नैमित्तिकंयथाग्निनिर्गृहाग्निर्दहेत्कालत्रप्रायश्चित्तिरित्युपक्रम्यगृहदाहेष्टिर्विहितातन्नैमित्तिकं अयमभिप्रा
यः यस्यातिक्रमेप्रायश्चित्तप्राप्तिः यस्यगृहदाहेष्टादेर्मासांतरेविहितकालासंभवीमलमासेवावश्यकम १७८

प्रेतः स्यात्तस्मै पिंडं निधाय प्रपितामहात्परं द्वाभ्यां दद्यात् यस्य पितामहः प्रपितामहश्च प्रेतौ स्यातां स पित्रे
पिण्डं दत्वा प्रपितामहात्परं द्वाभ्यां दद्यादिति निगमः योजीवति पितॄणां तं भोजयेत्स्वपितृस्थाने इत्येके
जीवतामजीवतां वा देयमिति हिरण्यकेतुरपि पिण्डपितृयज्ञे विषये मनुः पित्र्यं जीवत्पितुर्नोत्क्रम
ग्नोहैमोपि माह्निकः येभ्यो वापि पिता तेभ्यो दद्यादेतानकर्माणि दद्यात्त्रिभ्यः परेभ्यस्तु जीवेच्चेत्रि
तयं यदि आपस्तम्बः यदि जीवत्पितृको न दद्यादाहोमात्कृत्वा विरमेत् पिण्डं न दद्यादित्यर्थः यस्य पि
र्वहैमांतः पितृयज्ञः स्याज्जीवे पितृ द्विजानतः पितरं भोजयित्वा वा पिण्डौ निष्टृणुयात्परौ उभौ य
स्य वा जीवतो चजीवे च प्रपितामहः पिंडौ निष्टृणुयात्पूर्वौ भोजयित्वा पितामहमित्यादिवाक्यात्तु
मेधेयानि तत्र यथाशास्त्रं व्यवस्था जीवत्पितृकस्याग्निमत एवाधिकारस्तथा च स्मृत्यंतरं नजीवत्पि
तृकः कुर्यात् श्राद्धमग्निमते द्विजः एभ्य एव पिता कुर्यात्तेभ्यः कुर्वीत साग्निकः साग्निः श्रौतेन स्मा
र्तेन वा स्मार्त्ताग्निः पिण्डपितृयज्ञविधानात्तत्राधिकारः विवाहादिषु तस्यैवाधिकारः कर्तृत्वे श्रंग
त्वयज्ञाद्याकरणेप्यंगिरो वैगुण्यात्तत्रापि वैगुण्यभावः अग्निशब्दस्य स्मार्त्ताग्नौ वापि शक्तेः श्रौता

म.मा.
१८८

चतुर्मासेषु तथापि पिंडपितृयज्ञे च सौमिके मखे सोमादौ पुरोडाशात्पिण्डदाने च अन्योपि विशेषस्तत्रैव अन्वष्ट
क्यां गयायां प्रमीतेस्त्यांयम्मृतेहनि मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति यत्तु दर्शश्राद्धं गयाश्राद्धं श्राद्धं
चापरपाक्षिकं न जीवत्पितृकः कुर्यात्तिलैः कृष्णैस्तर्पणम् इति गयाश्राद्धनिषेधकवचनं तत्तु गयाश्रा
द्धोद्देशेन गयां गत्वा श्राद्धं न कार्यमित्येतत्परं एवौ तं वा कांतु देवाज्ञया श्रामो सत्यां श्राद्धविधायकं म्रियमा
णे तु पितर्यूर्ध्वं यामेव निर्वपेत् विप्रवत्पितरं श्राद्धे स्वकं पितरमाशयेत् पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पि
तामहः पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहं पितामहो वा तत् श्राद्धं भुंजीतेत्यब्रवीन्मनुः पूर्वेषां पितामहा
दीनां पितुः स नाम संकीर्त्य यस्मिन्त्विति वृत्तः पितामहे तिष्ठ प्रपितामहपिंडदानं गृह्णीयादित्यर्थः भविष्य
पुराणे जीवमाने न देयं स्याद्यस्मै भवति सत्तम तस्माज्जीवत्पिता कुर्याद्द्वाभ्यामेव न संशयः विष्णुः पितरि
जीवति यः श्राद्धं कुर्यात् येषां पिता कुर्यात्तेषां कुर्यात् पितरं पितामहे च जीवति येषां पितामहः करोति तेषां
कुर्यात् पितरि पितामहे च जीवति येषां पितामहः करोति तेषां कुर्यात् पितरि पितामहे प्रपितामहे च
जीवति नैव कुर्यात् यस्य पिता प्रेतः स्यात् स पित्रे पिण्डं निधाय पितामहात्पराभ्यां दद्यात् यस्य पितामहः १८८

दयोमत्स्यपुराणे अश्वयुक्शुक्लनवमीकार्त्तिकीद्वादशीतथा तृतीयाचैत्रमासस्यतथाभाद्रपदस्यच फा
ल्गुणस्यत्वमावस्यापुष्यस्यैकादशीसिता आषाढस्यापिदशमीमाघमासस्यसप्तमी श्रावणस्याष्टमीकृ
ष्णातथाषाढीचपूर्णिमा कार्त्तिकीफाल्गुणीचैत्रीज्येष्ठेपंचदशीसिता मन्वंतरादयश्चैते दत्तस्याक्षय
कारकाः यत्रक्लृप्तेतिविशेषानिर्देशात्तत्रैवकृष्णैवयत्रविशेषानिर्देशाभावस्तत्रसितैव वृद्धगार्ग्ये
णव भाद्रपदासिततृतीयाफाल्गुणामावस्याषाढदशमीश्रावणाष्टमीविहायमन्वंतरादयउक्ताः ॥
अश्वयुक्शुक्लनवमीकार्त्तिकेद्वादशीसिता तृतीयाचैत्रमासस्यज्येष्ठीपंचदशीसिता सप्तमीमाघमासस्य
पुष्यस्यामातथापरा ह्यश्विकेचाष्टमीकृष्णामकैकादशीसिता गोविंदद्वादशीऊर्ज्जेमेषेपंचदशीसि
ता कार्त्तिकेफाल्गुणाषाढीपूर्णिमाद्वादशीसिता मन्वंतरादयश्चैतामुनिभिःपरिकीर्त्तितः इति
अत्रापिएवंदेवव्यवस्था अथजीवत्पितृकश्राद्धकालाः तत्रकात्यायनः सपितुःपितृकृत्येषुअधिकारो
नविद्यते नजीवंतमतिक्रम्यकिंचिद्दद्यादितिश्रुतिः अत्रापवादोमैत्रायणीयपरिशिष्टे उद्वाहे पुत्र
जननेपिप्रेष्टांसोमिकेमखे तीर्थेब्राह्मणआयातेषडेतेजीवितःपितुः एतेषट्कालास्तत्पर्थेः पित्रेष्टं

ग्रथितमेवच वर्जयेदित्यर्थः यतस्मृतिविभवे विष्णुपुराणे होमदेवार्चनाद्यास्तु
क्रियास्तस्नानभोजने नैकवस्त्रः प्रवर्त्तेनद्विजेवाचनिकेजपे जान्हकार्येः परिधा
नाछह्रिःकच्छानिवद्धाद्यास्तुश्चसा धर्मकर्माणिविद्वद्भिर्वर्ज्जनीयाप्रयत्नतः परिधा
पनवंवस्त्रंतुग्नीयंचमेवतः आचमेत्सुद्धिजोवस्त्रेधौतेविपरिधायच नवश्वेवंग्रहणमे
त्रैः पारस्करेणादर्शितः परिधास्येयशोधास्येदीर्घायुष्वायजरदष्टिरस्मि शतंचजी
ववामिधारवः पुरूचीरायस्पोषमभिवर्धयिष्वाइति उत्तरेयेपि यशसामाद्यावापृ
थिवीयशसमिन्द्रावृहस्पती यशोसंभगाश्चमाविदधशोमाप्रतिपद्यतामिति व्यासः
क्षौमोपानहश्चापूर्वाणीचेत्तुमन्त्रइति नव्यवस्त्रपरीधानेवासद्योज्योतिः शास्त्रप्र
दर्शितः नक्षत्रेष्वाः मार्[illegible]एडचयत्नेप्राणः शाशाधरेत्क्लेशः सदामूषिजेवस्त्रला
भवुर्थैस्त्ररगुरौविधागमाः सम्पदा नानायोगरतिः प्रमोदवनितानाशयाद्दिलाभो

नक्षा१

गौर्दैवं स्पर्शनं स्नानरोगनाशकिलनरोभवनाम्बरं सौविरंगा श्रीपतिः रोहिणोषु करपंचकोस्विभेसु ॥ श्री१
मैत्रेण्डिचपुनर्वसुहृदये रेवतेषु वस्त्रं दैवतेच ममेनेंवस्त्रपरिधानमेष्यते अथक्रमंप्राप्ततिलक
म॰ पा॰ विधिः ब्रह्मपुराणे श्रीभगवानुवाच अंगुष्ठः पुष्टिदः प्रोक्तो मध्यमायुष्करी भवेत् अना
८० मिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी एतैरङ्गुलिभिर्देव्यस्तु कारयेन्नतवैः स्पृशेत् वर्ति
दीपाकृतिं चापि वेणुपत्राकृतिं तथा पद्मस्य मुकुलाकारं तथैव कुमुदस्य च म
त्स्यकूर्माकृतिं चापि शंखाकारमतः परम् चतुस्त्रिद्व्यंगुलैः पुण्ड्रं मध्यमे त्रिविधं स्मृ
तम् ललाटे केशवं विद्यान्नारायणमथोदरे माधवं हृदये न्यस्य गोविन्दं कण्ठकूपके
विष्णुं च दक्षिणे कुक्षौ तद्भुजे मधुसूदनं श्रीधरं च तथा न्यस्य वामबाहौ गले सदा प
द्मनाभं पृष्ठदेशे ककुदे दामोदरं स्मरेत् वासुदेवं स्मरेन्मूर्ध्नि तिलकं कारयेत्क्रमात्
व्यासः जाह्नवीतीरसंभूतां मृदं मूर्ध्ना बिभर्ति यः बिभर्ति रूपं सोर्कस्य तमोनाशाय केवलम् ८०

मच
कनिष्ठं विष्मैः
सप्तवर्पंच भिः पु
६५

वलं सत्यतपाः गोमतीतीरसंभूतां गोपीदेहसमुद्भवाम् मृदं मूर्ध्नावहेद्यस्तु सर्वपापैः प्र
मुच्यते ब्रह्माण्डपुराणे स्यामंत्र्यां [illegible]तिके र प्रोक्तं स्वाध्यायः पितृतर्प्पणम् भस्मीभव
ति तत्सर्वं मूर्ध्नि पिंड्रं विनाकृतम् ऊर्ध्वपुंड्रं मृदा कुर्यात्त्रिपुंड्रं भस्मना सदा तिलकं वै द्वि
जः कुर्यात्स्वहस्तेन यदृच्छया ऊर्ध्वपुंड्रं द्विजः कुर्यान्नाग्निर्यस्य त्रिपुंड्रकं अर्धचन्द्रं तु
वैश्यस्य वर्तुलं शूद्रजातिषु अथ मध्याह्निकी संध्या पूर्वोद्दिष्टा समाचरेत् उपस्थाने
चतत्प्रोक्तं जपस्य च विधिस्तथा अथ ब्रह्मयज्ञः [illegible]श्रुतिः उदितेन्नु[illegible]दिस्ये दक्षिणात उ
पवीतेयोपविश्य हस्तावव निज्य त्रिराचमेत् द्विः प्रमृज्य सकृदुपस्पृश्य पाशीरश्चक्षुषी नासि
के श्रोत्रे हृदये मालभ्येति अथ माचमनप्रकारः ब्रह्मयज्ञानुष्ठानप्रकारः शौनके
नोक्तः [illegible]प्राग्वोदग्वा ग्रामान्निष्क्रम्याप आप्लुत्य शुचौ देशे यज्ञोपवीत्याचम्याक्लिन्नवा
सा दर्भाणां महदुपस्तीर्य प्राक्कूलानां तेषु दर्भेषु प्राङ्मुख उपविश्य उपस्थं कृत्वा दक्षिणो

म· ८१ ततौपाणीपादौसंधायपवित्रवंतौद्यावापृथिव्योःसंधिमीक्षमाणःसंमील्यवायथावागुरुक्रमात्
पा· मात्मानंकृत्वेतनयायुक्तोधीयीतस्वाध्यायॐपूर्वाव्याहृतीःसावित्रीमन्वाह पच्छोर्धर्चशः सर्वा
मितितृतीयकंयावन्मन्येततावदधीत्यतस्यापरिदधाति नमोब्रह्मणेइति अक्लिन्नवासाः
अक्लिन्नवासाः महद्दुपस्थीयेप्राक्कूलेदर्भैर्भुवंवितिविज्ञेययथाभवतितयाब्रह्मा[illegible]उपस्थाम
कृत्वावामपादांगुष्टेदक्षिणपादांगुष्टंनिधायपादेपाणीसमपुटेलेकृत्नेमध्यउपस्थाकृति
रिवभवतितउपस्थमित्युच्यते इतरेतु[illegible]व्यासंस्थापनेष्यानेोपवेशनउपस्थकरण
मितिसंस्मृतिमंजर्यी अथवायथोपदेशंकुर्यात् यथावागुरुक्रमात्मानंमन्येत यथासमा
हितमनात्मानंमंत्रेण ॐकारपूर्वंभूरादिव्याहृतित्रयंक्रमेणगायत्रीपादादौनिक्षिप्यप्रथ
मतःपठेत् ततस्तथैवभूरादिव्याहृतिद्वयंगार्धादौक्रमेणततस्तथैवतृतीयव्याहृतिःपूर्व
कांसर्वकांगायत्रींपठेत् यावन्मन्येततावद्विन्याद्धिगायत्रीजपानेनतरंऋग्यजुस्सामादिष्वया

सं॰ पा॰ ७८

उतंत्रेय स्मानिध्यमास्मिंल्लोयेतस्थीयतांमदनुग्रहात् रुद्रान्प्रपद्ये वरदान्सर्वानप्सुषदस्त्वहम् सर्वानप्सुषदश्चैवप्रपद्ये
प्रणतःस्थितः देवानप्सुषदंवह्निंप्रपद्येघनिसूदनम् आपःपुण्याःपवित्राचप्रपद्येशरणंतथा रुद्राश्चाग्निश्चसर्पश्च।
वरुणश्चापएवच शमयंत्वाशुमेपापंवर्द्धंतुवसुदास्तुमां इत्येवमुक्त्वाकर्त्तव्यंततःसमार्जनंकुशैः आपोहिष्ठेतितिसृ।
भिर्यथावदनुपूर्वशः हिरण्यवर्णाःशुचयइतिचऋग्भिस्ततस्तिसृभिस्तथा शन्नोदेवीरितितथाशंवआपस्तथैववच इ।
दमापःप्रवहतेत्येवंसर्वमुदीरयेत् एवंसम्मार्जनंकृत्वाछन्दआर्षंचदैवतम् अघमर्षणसूक्तस्य संस्मरेत्प्रयतःसदा॥
ततोम्भसिनिमग्नस्त्रिःपठेदघमर्षणम् प्रदास्मान्मूर्धनितथामहाव्याहृतिभिर्जलंमिति इतिक्रियास्नानं॥ अ
घयोगणस्नानानि तत्रजाबालिः असामर्थ्याच्छरीरस्यदेशकालाद्यपेक्षया मंत्रस्नानादिकाःसप्तकेचिदिच्छंतिसूरयः॥
योगयाज्ञवल्क्यः मांत्रंभौमंतथाग्नेयंवायव्यंदिव्यमेवच वारुणंमानसंचैवसप्तस्नानान्यनुक्रमात् आपोहिष्ठादिभिर्मं।
त्रैर्मृदालंभेनपार्थिवं आग्नेयंभस्मनास्नानंवायव्यंगोरजःस्मृतम् यत्तुसातपवर्षेणस्नानंतद्दिव्यमुच्यते वारुणंचा
वगाहस्त्वाम्भामानसंविष्णुचिंतनम् कालदेशाद्यसामर्थ्यात्सर्वंतुल्यफलंस्मृतम् कूर्मपुराणे स्वस्थस्यवारुणं ७८

कारेपि पिण्याकतिलमोदके शष्कुलीकृसरादौ च निषेधो नावजायते मनुः शिरःस्नातस्तु तैलेन नांगं किंचिदुप-
स्पृशेत् [illegible] गार्ग्यः तैलेन शिरःस्नातं स्त्रीयमनन्यदपि तैलेन नांगं स्पृशेत् न प्रक्षालयेदिति एतच्चैतस्मिन् दि-
नस एव राज्ञाविदितात्रिशिष्टाचाराज्ञेयम् निषिद्धदिनादिष्वपि मंगलस्नादिषु भवत्येव तथा च कात्यायनः मांगल्येषु विष-
ये स्नाने वृद्धिसर्वे[illegible]त्सवेषु च स्नेहमात्रसमायुक्तं मध्याह्ने त्वाग्निविशिष्यते निषिद्धतिथिष्वपि शुभवारयोगे तै-
लस्नानं कार्यमिति तिथिपेक्षया वारस्य प्राबल्यात् यदुक्तं ब्रह्मसिद्धान्ते तिथिरेकगुणा प्रोक्ता नक्षत्रं च चतुर्गुणम् करणं षड्गु-
णं चैव वारस्त्वष्टगुणः स्मृतः इति तिलैः स्नानं सदा पुण्यं कुर्यादामलकैः श्रियै ॥ सप्तमीनवमीदर्शरविसंक्रामनाहते ॥
व्यासः तथा दर्शे च सप्तम्यां संक्रान्तौ च रवेर्दिने चंद्रसूर्योपरागे च स्नानमामलकैस्त्यजेत् षट्त्रिंशन्मते सर्वकालं ति-
लैः स्नायादिति व्यासोऽब्रवीन्मुनिः शिरःस्नानं ततः कृत्वा मज्जेदप्सु यथाविधि इति मलस्नानं अथ क्रियास्नानं तत्र शंखः
क्रियास्नानं प्रवक्ष्यामि यथावद्विधिपूर्वकम् मृद्भिरद्भिश्च कर्तव्यं शौचमादौ यथाविधि जलेनिमग्न उन्मज्ज्य उपस्थाय पय-
थाविधि तीर्थस्यावाहनं कुर्यात्तत्प्रवक्ष्याम्यतः परं प्रपद्ये वरुणं देवमम्भसां पतिमूर्जितं याचितं देहि मे तीर्थं सर्वपापप-

म॰
पा॰
७७

सूत्वेसप्तधामसमान्विते त्रिंशान्नमोदकादेयाः शार्करातिलसंयुताः भगाद्रयेतिलांनास्तु चतुर्थः शार्कराशाकः अनभ्यंगी
वरारोही सर्वमासंनयेद्वतीति इतिमाघस्नानविधिः क्रियांगस्नानलक्षणंप्रागभिहितान्नतेनेवव्याख्यातम्॥ अ
थमलापकर्षणस्नानम् तत्रगार्ग्यः अभ्यङ्गस्पर्शपानाद्यैर्यत्रतैलंनिषेवते चत्वारितस्यनश्यंतिआयुः प्रज्ञायशो
बलं तथापंचदश्यांचतुर्दश्यामष्टम्यांरविसंक्रमे द्वादश्यांसप्तमीषष्ठ्योस्तैलस्पर्शमपित्यजेत् गार्ग्यः त्रयोदश्यां
तृतीयायांप्रतिपद्दशमीद्वये तैलाभ्यंगंनकुर्वीतस्त्रेषोह्वानवमीविना मोहात्प्रतिपदंषष्ठींकुहूंरिक्तांतिथिंतथा
तैलेनाभ्यंजयेयस्तुचतुर्भिःपरिहीयते व्यासः आदित्यादिषुवारेषुतापंकांतिंमृतिंधनम् दारिद्र्यंदुर्भगत्वंच
कामाप्तिःस्नानतःक्रमात् गार्ग्यः मांसाशनेपंचदशीतैलाभ्यंगेचतुर्दशी अत्रसन्निहितेपापंतैलमांसेक्षुरेभ
गे अत्रप्रतिप्रसवमाहप्रचेताः सार्षपंगंधतैलंचयत्तैलंपुष्पवासितं अन्यद्रव्ययुतंतैलंनदुष्यतिकदाचन
तैलाभ्यंगनिषेधेतुतिलतैलंनिषिध्यते अभ्यंगस्यनिषेधेतुसार्षपादेरपीष्यते स्नेहाभ्यंगोभवत्येवसस्नेहःसा
र्षपादिकः नभोजनायतैलस्यनिषेधोभ्यंगएवसः तैलप्राह्वासलिलस्नेहेषुघृतानेवयोगिकः अन्तालिलवि। ७८

नित्यामिति संकल्प्य चेतसा ततः स्नात्वा प्रमेतीर्थे दत्वां शिरसि वै मृदम् वेदोक्तविधिना राजन् सूर्यस्यार्घ्यं निवेदयेत्
पितृणां तर्प्पयित्वा तु अवतीर्य ततो जलात् काष्ठमौनी नमस्कृत्य पूजयेत्पुरुषोत्तमम् शंखचक्रधरं देवं माधवं नाम।
पूजयेत् वह्नौ हुत्वा विधानेन ततस्त्वेकासनो भवेत् भूशय्या ब्रह्मचर्येण शक्तः स्नानं समाचरेत् अशक्तसाधनाढ्य।
सस्वेच्छा सर्वं च कथ्यते अवश्यमेव कर्त्तव्यं माघस्नानमिति श्रुतिः तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी तिल।
दाः तिलभोक्ता च षट्तिली नावसीदति तैलमामलकाश्चैव तीर्थे देयास्तु नित्यशः तथा प्रज्वालयेद्वह्निं सेवनार्थं द्वि
जन्मनाम् एवं स्नानावसाने तु भोज्यं देयमवारितम् भोजयेद्द्विजदाम्पत्यं भूषयेद्वस्त्रभूषणैः कम्बलाजिनरत्नानि
वासांसि विविधानि च चोलकानि च देयानि प्रच्छादनपटांस्तथा उपानहौ तथा गुप्तामोचकौ पापमोचकौ अनेन।
विधिना दद्यात् माधवः प्रीयतामिति तत्र समापनमंत्रः सवित्रे प्रसवित्रे च परंधाम जले मम त्वत्तेजसा परिभ्रष्टं पा।
पं यातु सहस्रधा दिवाकर जगन्नाथ प्रभाकर नमोस्तु ते परिपूर्णं करिष्येहं माघस्नानं तवाज्ञया अहन्यहनि दातव्यास्ति।
लाः शर्करयान्विताः माघवस्नानेषु भागे खड्गसंभोजनेन तथा सूर्यो मे प्रीयतां देवो विष्णुमूर्त्तिर्निरंजनः दम्पत्योर्वासमी

स॰ पा॰ ७९

दं स्मृतं मार्कंडेयः गवां कोटिसहस्रस्य सम्यग्दत्तस्य यत्फलम् तत्फलं जाह्नवीस्नाने राहुग्रस्ते दिवाकरे हस्तवासि
ष्ठः रविसंक्रमणे पुण्ये न स्नायाद्यदि मानवः सप्तजन्मांतरे रोगी दुःखभागी सदा भवेत् मार्कंडेयः अमृतत्वा।
मलकैर्विसुद्धेकादश्यां विशेषतः श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः सप्तमीं नवमीं चैव पर्वकाले च वर्जयेत्
गर्गः कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव वा नित्यं याहृच्छिकं चैव यथाशक्ति समाचरेत्॥ ब्रह्माण्डपुराणे नित्यं नै।
मित्तिकं काम्यं विविधं स्नानमुच्यते तर्पणं तु भवेत्तस्य अंगत्वेन प्रकीर्तितं अथ तर्पणं भूर्देवांस्तर्पयामीत्यादिकं यजुर्वे।
दिकम्॥ इति काम्यस्नानानि अथ माघस्नानविधिः नारदीयपुराणे संप्राप्ते माघमासे तु तपस्विजनवल्लभे कोशं।
ति सर्ववारीणि समुद्रक्षति भास्करे पुनीमः सर्वपापानि त्रिविधानि न संशयः तडागे षड्गुणं वा स्नायात् कूपे भाण्डास्थि।
तेन तथा माघमासे वरारोहे वासं च निम्नगाजलम् भाण्डस्थितेन तु विशेषः सरिन्नीयं महावेगं नवकुंभस्थितेन तथा वा।
पुनाति रुचिरे गंगास्नानसमं स्मृतम् अधिकवेगयुक्तायां सरित्यानीतं तोयमिसर्षः स्नातो वह्निं न सेवते अस्नातो वा
कथंचन सेवेत पितृहा मार्ये न शीतार्थे कथंचन विष्णुः दर्शं वा पौर्णमासीं वा प्राप्य स्नानमाचरेत् पुण्यान्यहानि त्रिंशत्
तु मकरस्थे दिवाकरे तत्र चोत्थाय नियमं गृहीत्वा विधिपूर्वकं माघमासमिमं पुण्यं स्नास्ये देव माधव तीर्थस्यास्य जले

द्विधयं यतः सप्यवदिवाकरकरैः स्नानं दिवास्नानं प्रशस्यते अप्रशस्तं निशिस्नानं राहोरन्यत्रदर्शनात् राहुदर्शनादिति पु
त्रजन्मादिप्रदर्शनार्थं तथाहपराशरः पुत्रजन्मनियज्ञेच तथासंक्रमणेरवेः राहोश्चदर्शनेस्नानं प्रशस्तंनिशिनेति इतिनै
ना मित्तिकस्नानं अथकाम्यस्नानानि तत्रपुलस्त्यः पुष्येतुजनकस्मनक्षत्रेव्यतीपातेचवैधृतौ अमायांचनदीस्नानं पुनात्या
सप्तमंकुलं चैत्रशुक्लचतुर्दश्यांयः स्नायाच्छिवसन्निधौ नप्रेतत्वमवाप्नोतिगंगायांतुविशेषतः भविष्यत्पुराणे शिव
लिंगसमीपेतुयत्तोयंपुरतःस्थितं शिवगंगेतितज्ज्ञेयंतत्रस्नात्वादिवंव्रजेत् यमः कार्त्तिक्यांपुष्करेस्नानःसर्वपापैः
प्रमुच्यते माघ्यांस्नानःप्रयागेतुमुच्यतेसर्वकिल्बिषैः पाद्मे कार्त्तिकीनवमीशुक्लापिहृत्प्रणस्तस्वायसा तस्यांस्नानं
कृतंदत्तमनंतंफलदंभवेत् विष्णुः सूर्यग्रहणतुल्यातुशुक्लामाघस्यसप्तमी अरुणोदयवेलायांतुस्नानंमहाफलं पुन।
वसौतुयीपेनाचैत्रमासेसिताष्टमी स्नातस्तु विधिःवत्स्नात्वावाजपेयफलंलभेत् कार्त्तिकंसकलंमासंनित्यस्नायीजि
तेंद्रियः जपन्हविष्यभुक्स्नानःसर्वपापैःप्रमुच्यते तुलामकरमेषेषुप्रातःस्नायी सदाभवेत् हविष्यंब्रह्मचर्यंचमहापात पी
कनाशनं पद्मे यइच्छेद्विपुलान्भोगांश्चन्द्रसूर्यग्रहोपमान् प्रातःस्नायीभवेन्नित्यंमासौद्वौमाघफाल्गुणौ मत्स्यपुराणे।
आषाढाविवतुर्मासंप्रातस्नायीभवेन्नरः विप्रेभ्योभोजनंदत्त्वाकार्त्तिक्यांगोप्रदोभवेत् सवैस्वर्गपदंयातिविष्णुव्रतमि

नि. पा. ७४

र्येह निसंस्पृष्टो वेदमांतनारित्रियः। साम्यचैलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत् दशद्वादशकृत्वो याम्राचमेच्च पुनः
पुनः अंतेच स्नानसंस्पर्शाः ततः शुद्धा भवेत्तु सा दद्याच्छक्त्या ततो दानं पुण्याहेन विशुद्ध्यति सूतिकामरणे रजस्वलाम
रणे चस्पृष्ट्वा स्नानं कारयित्वा पंचगव्येन स्नापयेत् तथा संग्रहकारः सूतिकायां मृतायां च कथं कुर्वंति याज्ञिकाः कुंभे
सलिलमादाय पंचगव्यं तथैव च पुण्यर्ग्भिरभिमंत्र्यापो वाचा शुद्धिं लभेत्ततः तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि॥
पंचभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां वस्त्रांतरावृत्तां कृत्वा दाहयेद्विधिपूर्वकमिति वृद्धशातातपस्तु रजस्वला
याः प्रेतायाः संस्कारादीन्नाचरेत् ऊर्ध्वं त्रिरात्रात्स्नातायाः शवधर्मेण दाहयेदिति त्रिरात्रानंतरं दाहादिसंस्कारमा
ह अत्र देशकालाद्यनुसाराद्व्यवस्था विज्ञेया शातातपः ग्रामे तु यत्र संस्पृष्टिर्यात्रायां कलहादिषु ग्रामसंदूषणे चैव स्पृष्टि
दोषो न विद्यते बृहस्पतिः तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति एत
द्वयमाह्निकेषु न स्पृष्टिरिति प्रसक्तत्वानेनास्तितद्विषये एतन्मात्रापवादेपि वचनानां चरितार्थत्वात् शातातपः
रात्रौ स्नानं न कुर्वीत तथा दानं च रात्रिषु नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिषु एतत्प्रथमयामद्वयस्याभिप्रायं तथा
च पराशरः महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् प्रदोषपश्चिमौ यामौ दिनवत्स्नानमाचरेत् एतदपवाद।

७४

नाचरितारं च स्पृष्ट्वा स्नातानेन विधीयते इति एतदुपलक्षणं अन्तेयमस्य स्नानमात्रमेव प्राप्तं न सचैलं उत्स्पृष्टोपि द्वितीयस्याच
मनमेवेति सिद्धं तृतीयस्य त्वाचमनं यथाह संवर्तः उच्छिष्टेन स्पृष्टो यस्तु स्नानं तस्य विधीयते ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां
प्रोक्षणं तथेति एतच्चाकामकारविषयं कामकृते तु तृतीयस्यापि स्नानमेव पतितचंडालसूतिकोदक्याशवस्पृष्टि
तत्स्पृष्ट्युपस्पर्शने सचैलमुदकोपस्पर्शनाच्छुध्येदिति गौतमस्मरणात् चतुर्थस्याचमनं यथाह देवलः उपस्पृश्य
शुचिस्पृष्टं तत्तीर्थं वापि मानवः हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यति यत्तु कूर्मपुराणे उच्छिष्टं स्पृष्टिनस्पृष्ट्वा
त्वष्टिस्पृष्टं द्विजोत्तमः आचमेत्तस्य शुद्ध्यर्थं प्राह देवः पितामह इति दुर्बलत्वेन स्नानाशक्तितृतीयविषयं अन्यथा गो
तमादिवचनविरोधात् अथवा चेतनपीठादिस्पर्शविषयं एवं सर्वत्र विवेकोवगंतव्यः स्वयमशुचिना उदकादि
स्पर्शे कृते देवलः अशुद्धान्स्वयमप्येतानशुद्धस्तु यदि स्पृशेत् विशुद्ध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः कृच्छ्रः अ
ल्पापादिविषयः उपवासः स्वल्पादिविषयः आर्तवस्नानं प्रति पराशरोक्तो विशेषः आर्तवे स्नानउत्पन्ने दशाहं कृत्वा स्ना
तुरः स्नात्वा स्नात्वा स्पृशेद्देवं ततः शुध्येत्स आतुरः स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला पात्रांतरितोयेन स्नानं
कृत्वा व्रतं चरेत् उशना ज्वराभिभूताया नारी रजस्वा च परिप्लुता कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा चतु

स्मृ॰ पा॰ ७८

मथस्नात्वेव सद्यः स्नात्वा च मंशुध्यतीमङ्गिरसैव स्मरणात् अस्पृश्यस्पर्शे जातूकर्ण्यः ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गं स्पृशेत्त्व
गः स्नानं तत्र कुर्वीत शेषं प्रक्षाल्य शुध्यति अमेध्यस्पर्शेऽप्येवं शौचप्रकरणे दर्शितं पूर्वमेव शंखः रथ्याकर्दमतोयेन ष्ठीवना।
द्येन वा तथा नाभेरूर्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यति यमः सकर्दमं तु वर्षासु प्रविश्य ग्रामसंकरं जंघयोर्मृत्तिकास्तिस्रः
पादयोर्द्विगुणास्ततः ग्रामसलिलप्रवाहदेशो ग्रामसंकरः तत्र कर्दमप्रदिश्य मनुः नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो।
विशुध्यति आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा वीक्ष्य वा रविम् एतच्च द्विजायास्थिविषयं अन्यत्र तु मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरा।
त्रमशौचं अस्निग्धे त्वहोरात्रमिति वसिष्ठोक्तं अमानुषे त्वस्थ्नि विशेषोक्तं भक्ष्यवर्ज्यं पंचनखं शवं च तदस्थि च सस्नेहं स्पृष्ट्वा।
स्नातः शुद्धवस्त्रमप्रक्षालितं वा विमृज्यादिति अमेध्येवंविधाः स्नानार्हाः स्मृत्यंतरेष्ववगंतव्याः ग्रंथगौरवभयान्नेहलि
खिताः उदक्यादिभिः स्पृष्टानां स्नानं अचेतनानां पीठादीनां प्रक्षालनं ततो उदक्यादिभिः स्पृष्ट्वा चेतनस्पर्शे तत्रामाच।
मनं उदक्यादिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेदिति याज्ञवल्क्यस्मरणात् उदक्यादिभिः स्पृष्टचेतनस्पर्शे तु द्वितीय
स्यापि स्नानमेव तथा च मनुः दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति॥
स्नानार्हचेतनस्पर्शेऽपि द्वितीयस्य क्वचित्स्नानापवादमाह संग्रहकारः कदाचिदस्पृश्यसंस्पृष्टो वान्तो विरिक्ते ज्वरकर्मणि मेध्या। ७८

असौ देवलको नाम हव्यकव्येषु गर्हितः ब्रह्मपुराणे शैवान्पाशुपतान्स्पृष्ट्वा लोकायतिकनास्तिकान् विकर्मस्थान्द्वि
जान्शूद्रान्सवासा जलमाविशेत् अधिकादेशविषयमानेये शैवा पाशुपता वा भवंति तत्स्पर्शने स्नानमिवागंतव्यं अ
न्यथा तंत्रदीक्षाविधायकपुराणानां वचननिचयविरोधात् अथवा श्रोत्रियादीनां संभाषवदननिषेधो यथा वाचनिकः
श्रोत्रियादिषु दोषाभावेपि तथा दोषाभावेपि वाचनिकः स्पर्शनिषेधः विकर्मस्थानिसेतत् द्विजातिस्तेनैव संबध्यते न शू
द्रानित्यनेन अस्वर्गीयाहुतिस्मासाम्यं द्रसंस्पर्शादूषितेति शूद्रमात्रसंस्पर्शेनास्वर्ग्यत्वप्रतिपादनसमर्थ्यात्॥ व्याघ्र
पादः चंडालं पतितं चैव दूरतः परिवर्जयेत् गोबालव्यजनादर्वाक्सवासा जलमाविशेत् एतच्चातिसंकीर्णस्था
नविषयं असंकीर्णेहूहस्तस्तक्तं युगापाट्ट्रियुगंचैवत्रियुगंचचतुर्युगं चंडालसूतिकोदक्यापतितानामधः क्रमादि
ति अथः क्रमात्प्रतिलोमक्रमात् चतुर्युगं अंत्यजले त्रियुगं सूतिकायामित्येव पैठीनसिः अनुदकमूत्रकवणे सचेलं
स्नानेव्याहृतिहोमश्च एतच्चशौचमहत्त्वाचिरकालास्थितनोवेदितव्यं अंगिराः भासवायसमार्जाररवरोष्ट्रश्वानसूक
करान् अमेध्यानि च संस्पृश्य सचेलो जयमाविशेत् मार्जारस्पर्शेस्नानमुच्छिष्टस्यनयेकर्मकालेच मार्जारश्चैवदर्वी
च मारुतश्चसदाशुचिः इति यमस्मरणात् श्वस्पर्शेनाभेरूर्ध्वं स्नानं नाभेरधः करणौ मृत्काशुनाययुपहस्मते तत्रस्नान

सामकृज्जपेत् पराशरः दुःस्वप्ने मैथुने वांते विरिक्ते क्षुरकर्मणि चितियूपश्मशानास्थिस्पर्शने स्नानमाचरेत् मैथुन इति
ऋतुकाले अनृतुकाले बृहस्पतिना शौचमात्रविधानात् अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवदिति अनृतावपि काल
विशेषे स्नानमेव तथा च स्मृतिः अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनं कृत्वा सचेलं स्नात्वा तु वारुणीभिश्च मार्जयेदि।
ति अष्टमीचतुर्दशीपर्वसु रात्रावपि अन्यत्र दिवा अत्र च गोबलीवर्दन्यायेनाष्टमीचतुर्दशीव्यतिरिक्तामावस्यादिप।
र्वपरो वर्तते अजीर्णादिषु स्नानमात्रमेव न सचेलस्नानं तदुपशमे सति अभ्यादित इति निद्रायां क्रियमाणायां दिवावमुदिते
तथैवास्तमिते च एतत्सर्वमकामतः स्पर्शे वेदितव्यं शवस्पृश्यादिवाकीर्तिचितियूपं रजस्वलां स्पृष्ट्वा त्वकामतो विप्रः स्ना।
नं कृत्वा विशुद्ध्यतीति बृहस्पतिना अकामत इत्युपादानात् कामतस्तु तत्पावनोक्तं द्रष्टव्यं श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजी।
विनं ग्रामयाजिनं सोमं सोमविक्रयिणं यूपं चितिं काष्ठं मद्यं भांडं सस्नेहं मानुषास्थि शवस्पर्शिनं रजस्वलां महापातकिनां
शावं स्पृष्ट्वा सचेलमंभोवगाह्योत्तीर्याग्निमुपस्पृश्य गायत्र्यष्टशतं जपेत् घृतं प्राश्य पुनः स्नात्वा त्रिराचमेदिति कश्यपः
उदयास्तमयोः स्कन्दित्वा हित्वा सन्ध्ये कर्णाक्रोशेन चितारोहणे यूपसंस्पर्शने सचेलं स्नात्वा पुनर्मनुरिति जपेन्महाव्या
हृतिभिः सप्ताज्याहुतीर्जुहुयादिति तथा स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत् देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयं।

सिंधुः स्वयंभूर्नर्मदा तथा ॥ यास्तु नदीषु रजोदोषो मितास्वपि उत्तीरवासिनां न दोषः तथा च निगमः न तु उत्तीरवासिनामि
ति अत्र विशेषमाह व्याघ्रपदः अभावे कूपवापीनां मनयापि पयोमृतं रजोदुष्टे पि पयसि ग्रामभोगो न दुष्यतीति वसि
ष्ठः उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते याज्ञवल्क्यः प्रस्नायादुत्सवे नी
ते मंगलं वि निवर्त्य च अनुव्रज्य सत्कृदं पूजयित्वेष्टदेवताः प्रसंगात्सत्संग्रहदुष्टं प्रतिकस्नान विशेषः कथ्यते तत्र स्मृ
तिसंग्रहे कालेन भस्मस्पृष्टं सात्वत ग्रस्तं विग्रहे अकाले तु दशाहं तु पीत्वा नाद्यादहर्निशमिति कालेवर्षकाले अ
काले तु दशाहं तु पीत्वा नाद्यादहर्निशमिति कालेवर्षकाले अकाले नद्धिपरीते अत्रापि विशेषो भविष्योत्तरे महदेव
समं वात्र यदितिष्ठे स्वराज्ञनम् नवां तु मिश्रितं तेन न दुष्टमिति सूचयति उक्तं नित्यस्नानं अथ नैमित्तिकानि तत्र या
ज्ञवल्क्यः उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत् अब्लिंगानि जपेच्चैव गायत्रीं मनसा सकृत् उदक्या रजस्व
ला अशुचयः शवपतितचंडालसूतिकाशावाशौचिनः एतैः स्पृष्टः स्नायात् तैरुदक्यादिस्पृष्टैः स्पृष्टः स्नायात्
तैरुदक्यादिस्पृष्टैरुपस्पृष्ट आचमेत आचमनं चाब्लिंगानि आपो हिष्ठेत्येवमादीनि त्रीणि सूक्तानि वा जपेत् त्रिचवच
नवचनस्य कपिंजलादिकरणन्यायेन विदितार्थत्वात् सूक्तवाक्ययोर्देशकालाद्यपेक्षया व्यवस्था ततो गायत्रीं मन

म०
पा०
७२

निर्गताः तथा प्रस्नाहन्नोदके स्नानं वर्ज्जनयोद्दिजातिभिः तस्मां रजकतीर्थे तदप्याह स्तेनवर्जयेत् प्रतिस्रोतो रजोयोगा
दथ्याजलनिवेशने गंगायां नप्रदुष्येत तथाहि धर्मद्रवः स्वयं देवलः नभोनभस्ययोर्मध्ये सर्वा नद्यो रजस्वलाः तासु स्नानं न
कुर्वीत वर्जयित्वा समुद्रगाः कात्यायनः नभोनभस्ययोर्मध्ये सर्वा नद्यो रजस्वलाः तासु स्नानं न कुर्वीत देवर्षिपितृतर्पणं ए
वं श्रावणभाद्रयोर्मध्ये सर्वासु नदीषु स्नानानि षेधे प्रसक्ते क्वचिद्विशेषोऽभिहितं भविष्यत्पुराणे आदौ कर्कटके देवि महान
द्यो रजस्वलाः त्रिदिनेन तु चत्वर्थेऽह्नि शुद्धाः स्युर्जाह्नवी यथेति महानद्यश्च ब्रह्मपुराणे गोदावरी भीमरथी तुंगभद्रा च वेणि
का तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्तिताः भागीरथी नर्मदा च यमुना च सरस्वती विशोका च वितस्ता च विन्ध्यस्यो
त्तरतः स्थिताः द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवाः इति एवं गंगादिष्वपि प्रसक्तावपवादमाह देवलः गंगा च यमु
ना चैव प्लक्षजाता सरस्वती ऊरुदेशे याः सरस्वती साप्यदृष्टजाता रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञकाः शोणसिं
धुहिरण्याद्याः कोकलोहित घर्घराः शतद्रुश्च नदाः सप्त पावनाः ब्रह्मणा स्मृताः निगमाः गंगा धर्मद्रवाः पुण्या यमु
ना च सरस्वती अन्तर्गतरजोयोगाः सर्वावस्थासु चामलाः एवं च महर्षेगोदरजस्वले स्यादिगंगा यमुना सरस्वती ना रजो दोष
प्राप्ता कालिन्द्यानि तान्यपि अन्तर्गतरजोविषयाणि स्रोतां न दोषः तथा कर्कटादौ रजोदुष्टा गोमती वासरत्रयं चन्द्रभागा सती

७२

त्विकेनतु पैठीनसिरपि नित्यंनस्नापयेत्स्नानेकाम्यंनैमित्तिकंचयत्नत् दशाम्यादिषुकर्त्तव्यंनतुयाहच्छिकंक्वचित् याह।
च्छिकलक्षणंगार्ग्येणोक्तं क्रियतांवानवायाहाचापस्वयंत्रणायाविना मलव्यपोहनफलंस्नानेयाहच्छिकंतुतत् पैठीनसिः
पुत्रजन्मनिसंक्रांतौश्राद्धेजन्मदिनेतथा नित्यस्नानेचकर्त्तव्येतिथिदोषोनविद्यते इतिमार्कंडेयपुराणे मातरंपितरं।
जायांभ्रातरंसुहृदंगुरुम् यस्मादिश्यनिमज्जेततस्याष्टमांशंलभेतसः नादशाकेनवस्त्रेणस्नायात्कौपीनकादृते ना।
१५४ नदीयेननार्द्रेणस्यूतेनाथवाग्रथितेनच स्नानंकृत्वार्द्रवासास्तुविण्मूत्रेकुरुतेयदि प्राणायामत्रयंकृत्वापुनःस्नानेनशु
द्ध्यति मनुः स्नातस्यवाह्नितप्तेनतथैवपरवारिणा शरीरशुद्धिर्विज्ञेयानतुस्नानफलंलभेत् यत्तुषट्त्रिंशन्मते।
आपःस्वभावतोमेध्याःकिंपुनर्वह्निसंयुताः तेनसंतःप्रशंसंतिस्नानमुष्णेनवारिणेति तदातुरविषये अनातुर।
स्यापिनद्याद्यसंभवेउष्णोदकस्नानमविरुद्धमित्याहयम नित्येनैमित्तिकंचैवक्रियांगंमलकर्षणं तीर्थाभावेतुकर्त्तव्य
मुष्णोदकपरोदकैः अत्रमलापकर्षणस्नानेतीर्थेकर्त्तव्यमितिनविधीयते अपितुप्रायशउष्णोदकसाध्यत्वादुष्णोदक
प्रकरणेपठितमिति उष्णोदकस्नानेकर्त्तव्येव्यासः शीतास्वप्सुनिषिच्योष्णामंत्रसंभारसंभृतः गृहेपिशस्यतेस्नानंतद्धी।
नमफलंभवेत् संभारास्तुदादयःअग्राह्यास्त्वागताःप्रायोनद्याःप्रथममेवराजाः पत्तोभितस्त्रकेनापितथातीर्थादि

नि॰ पा॰ ७१

अथाते संक्षेपस्नानविधिमाह योगयाज्ञवल्क्यः एवं विस्तरतः प्रोक्तः स्नानस्य विधिरुत्तमः असामर्थ्ये न कुर्याच्चेत्तत्रायं विधि
रुच्यते स्नानं मन्त्रजले चैव मार्जनाचमने तथा जलाभिमन्त्रणं चैव तीर्थस्य परिकल्पनं अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः।
याः स्नानाचरणमित्येतदुपदिष्टं स्वयंभुवा जाबालिः प्रवाहाभिमुखो मज्जेद्यत्रापः प्रवहन्ति वै स्थावरेषु च सर्वेषु।
आदित्याभिमुखस्तथा विष्णुपुराणे कूपेषूद्धृततोयेन यद्वा भुव्यसंभवे मनुः न स्नानमाचरेद्भुक्त्वा नातुरो न महा
निशि न वासोभिः सहाजस्रं नाविज्ञाते जलाशये व्यासः अनुत्सृष्टेषु न स्नायात्तथैवासंस्कृतेषु च असंस्कृतमप्रति।
ष्ठितम् अनुत्सृष्टं सदन्यं परिकीर्तितमिति यावत् जाबालिः न पापके ल दास्नायान्न भुक्त्वा न महानिशि नान्यमेकं च वस्त्र।
नं परिदध्यान्न यानवृ देवलः राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु स्नानदानादिकं कुर्यान्निशि काम्यव्रतेषु च भारद्वा
जः विद्यमानेन सूर्येण संगृहीतं तु यज्जलं न तत्स्वर्णोदकं कृत्वा स्नायात्स्थाप्य जलान्तिके पाराशरः अपो वाग्नेन यद्गृह्णी
यात्सविषं वरुणालयं आचरेत्कथं मन्त्रेण धाम्नो धाम्न इति स्वयं धाम्नो धाम्न इति मन्त्रेण स्वयमेव गृह्णीयादित्यर्थः यो
गयाज्ञवल्क्यः दर्शस्नानं न कुर्वीत मातापित्रोस्तु जीवतो मृदं विदन्ति येयाः स्नानं नाचरेद्बुधः कथं चन एतन्निःसने मित्तिका
दिस्नानव्यतिरिक्तविषये अनय एव भारद्वाजः भौमार्थं क्रियते यत्तु स्नानं यादृच्छिकं न तैः तन्निषिद्धं तन्नीयाचो नित्यनैमि

७१

यस्मोचनं तन्मेवोगांसुस्पोकाम्बयाः पंचत्रुदगोमय ततोदूर्वया काण्डात्कांडात्प्ररोहंती परुषःपरुषस्परि एवानोदूर्वेप्र
तनुसहस्रेणशतेनच यासांतेनप्रतनोषिसहस्रेणविरोहसि तस्यास्ते देवि इष्टके विधेम हविषावयं इत्येवमा
भिनंमंत्रैरभ्यक्तोतादिभिस्ततः इहेतदेवीरमृतेपारावतस्यरातिषु देवीरपःपारावतस्यरातिषु देवीरपः पारावत
स्यरातिषुस्नादिमंत्रैरभ्यस्तमीहेतपभिरभिमंत्रितास्त्रमृतं भवंतीत्यर्थः येनेषातमिति द्वाभ्यांतीर्थान्यावाहयेत्ततः
ओरुदेवाद्यादीन्यावाहयेत् ओरुदेवेत्रंगयागंगाप्रभासेपुष्कराणिच ततोमहाव्याहृतिभिर्गायत्र्याभिमंत्रयेत् आपो
हिष्ठेदमापश्चाद्रुपदादिवमुमपि तथाहिरण्यवर्णाभिःपावमानीभिरंततः ततोर्कसीद् कारंनिमज्ज्यांतर्जले
लेत्रयः प्राणायामान्कुर्वीत गायत्रीचाघमर्षणं यथोक्तैःवोमितनस्नेलमज्जन्निंद्रवत्ततः यथोक्तैःप्राणायामा
दिभिः द्रव्यःपूर्वमवस्थामतिक्रांतोदिगतपापइतियावत् अस्मेपिस्नानविधयोबहवः संतितेग्रंथगौरवभया
न्नेहप्रदर्शिताः एतस्वस्नानंसर्वसाधारणंविशेषस्तुशाखाभ्योविज्ञेयः अस्यचापवादः भानौभौमेत्रयोदश्यांनंदाभृ
गुमघास्वपि पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणमिति पिण्डदानेकामंनतिलैः योगयाज्ञवल्क्यः मृदास्नानंन
कुर्वीतराहोःसंध्याद्वयेच विधिनास्नानकालेवतथाभौमार्कवारयोः तिलतर्पणसप्रातिप्रसववस्तर्पणप्रकरणोक्ता

स. पा. ७.

विधिं कृत्स्नं प्रवक्ष्याम्यशुद्धेर्बलः येन स्नात्वा दिवं याति शूद्रदानाद्विजोत्तमाः नदीषु देवखातेषु तडागेषु सरस्सु च स्नानं स
माचरेन्नित्यं मां त्रे प्रस्रवणेषु च परकीयेषु नियानेषु न स्नायाद्धि कदाचन निपानकर्तृः स्नात्वा तु दुष्कृतांशेन लिप्यते
अस्नाभेदे मन्वानानां सरसीसरितां तथा उद्धृत्य चतुरः पिंडान्पारक्ये स्नानमाचरेत् याज्ञवल्क्यः पंच पिंडाननुद्धृत्य।
ग न स्नायात्परवारिषु योगयाज्ञवल्क्यः अर्हं द्विवा च स्नानं मध्याह्ने स्नाविशेषतः प्रयतो मृदमादाय दूर्वामार्द्रं च।
गोमयं शुक्लगान्तुदः विशेषत इति वचनादपराह्णे च स्नात मसीति गम्यते स्नापयत्त्वयाचम्य ततः स्नानं समा
चरेत् शिखाबंधनप्रकारमाह व्यासः स्मृतो कारं वगायत्रीं निबध्नीयाच्छिखां ततः पुनराचम्य हृदयं बहुस्कंदौ स। च
स्पृशेदिति मृदेकया शिरः क्षाल्यं द्वाभ्यां नाभेरथोपरि अधश्च तस्रभिः कायः षड्भिः पादौ तथैव च प्रक्षाल्य सर्वका
यं च द्विराचम्य यथाविधि ततः सम्मार्जनं कुर्यान्मृदा सर्वं तु मंत्रवित् अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुंधरे उद्धृतासि वराहेण कृष्णेन शतबाहुना मृत्तिके त्वां च गृह्णामि प्रजया च धनेन
च मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता मृत्तिके जहि नः सर्वं यन्मया दुष्कृतं कृतं मृत्तिके देहि मे पुष्टिं त्वयि स
र्वं प्रतिष्ठितं ततः स्वगोमयेनैवाग्रमंत्रमिति निवन् अग्रमग्रं चरंतीनामोषधीनां रसं वने तासामृषभपत्नीनां पवित्रं का

ग्रासाः संप्रवेकुशा अप्रहतागोर्मेनाद्दर्भायेचाग्रेहेदितानवैः कथितांस्त्वाग्निदग्धांश्चकुशान्यत्नेनवर्जयेत् नीवीमध्ये
स्थितादर्भाब्रह्मसूत्रेणयेष्टताः पवित्रांस्तान्विजानीयाद्यथाकायास्तथाकुशाः अत्रविशेषमाह कात्यायनः हारीताय
त्रिपादर्भाः पीतकाः पाकयज्ञियाः समूलाः पितृदेवत्याः कल्माषावैश्वदेविकाइति पितृदेवत्याः पित्र्यार्थाः गोबाल
पवित्रंप्रहस्तकौशिकः गवांवालपवित्रेणधार्यमाणेननित्यशः नस्पृशंतीहपापानिश्रीश्चगात्रेषुतिष्ठति गवां
वालपवित्रेणावह्यंपाशिंकरोति सवैद्वादशवर्षाणिकृतसंध्योभवेन्नरइति हारीतः समित्पुष्पकुशादीनिश्रोत्रि
यःस्वयमाहरेत् शूद्रानीतैःक्रयक्रीतैःकर्मकुर्वन्पतत्यधः कुशापुष्पाणिसमिधऔषधंतुविशेषतः निषेधो
पिवत्कृताणीयादस्यावस्यामपिहिजः यत्तुवचनं अमावस्यांनहिंस्यात्कुशांश्चसमिधस्तथा सर्वत्रावस्थितेसोमे
हिंसायांब्रह्महाभवेत् तत्तुयस्मिन्कालेवनस्पत्यादिषुसोमोवसतितन्मुहूर्तेनिषेधपरंसर्वत्रावस्थितइतिहेतू
पादानात् सर्वत्रवनस्पतिकुशादिषु अवस्थानकालविशेषश्चसोमपर्णेभिहितः त्रिमुहूर्तंवसेदर्केत्रिमुहूर्तंजले
वसेत् त्रिमुहूर्तंवसेद्गोषुत्रिमुहूर्तंवनस्पतौ वनस्पतिगतेसोमेयस्तुहिंसाद्वनस्पतिं घोरायांभ्रूणहत्यायांयुज्य
तेनात्रसंशयइति वनस्पतिरितिकुशादीनामपिप्रदर्शनार्थं इतिकुशाविधिः अथवासिष्ठेस्नानविधिः अथस्नान

· या· ६५

लंदेवसमुद्भवाः तेषु शस्तानि योक्तव्यादैवपित्र्येचकर्मणि जातमात्रो भवेद्दर्भस्ताम्रमूलः कुशाः स्मृताः सप्रपत्रस्तु कुश
पः छिन्नाग्रस्तृणमुच्यते अछिन्नाग्रा वर्हिष्का याः कुशास्त्वेव प्रमाणतः कुशपा इति विज्ञेयास्तैस्तु श्राद्धं समाचरेत् छंदो
गपरिमेष्टे स्वनंतर्गर्भिणामाग्रकौसां द्विदलमेवच प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् कौशाये विन्यानि सप
वित्रं दक्षिणे करे भुंजानस्तु विशेषेण गार्हिनाम्नसपोधनम् द्वौ दर्भौ दक्षिणे हस्ते सव्ये त्रीणि समन्वसहेत् उपवीते
शिखायां पादमूले सहस्तके हस्तेत् सहस्तस्तपकद्दसर्थः कौशिकः पवित्रस्य तु नाशो च माणानेतु कदाचन पितृ
णां तर्पणे तस्तु समुञ्चारे स्रजने तथा शौचः उभयत्रास्थितै र्दर्भैस्समाचामयति द्विजः सोमपानफलं तस्य भुक्त्वा यज्ञ
फलं भवेत् ग्रंथिर्यस्य पवित्रस्य न तेनाचामनं भवेत् आचमेयस्तु मोहाच्च यथा भोक्तानेयात्तुसः यथा भोक्ते ति
दृष्टांतः अतो भोजनकाले पि ग्रंथिर्निषिद्धः ब्रह्मयज्ञे जपे चैव ब्रह्मग्रंथिर्विधीयते भोजने वर्तुलः प्रोक्ता देवेयः
मौनहीयते वामहस्ते कुशान्कृत्वा दक्षिणेनोदकं पिवेत् रुधिरं तद्भवेत्तोयं पीत्वा चांद्रायणं चरेत् कुशाभावे तथा
काशा दूर्वा व्रीहियवानपि तदभावे तु नीवाराश्यामाकान्वा नियोजयेत् जपे दाने तथा होमे स्वाध्याये पितृतर्पणे ।
अस्पृष्टं तु करं कुर्यात्सुवर्णेन जनैः कुशैः आपस्तंभः ब्रजयत्ते च ये दर्भा ये दन्यापितृ तर्पणे स्तरणामनपिंडेषु ते ।

कंयन्नुदैवत्तविधिचोदितं तद्विकार्यंसमुद्दिष्टंनकाम्यस्तुप्रयोजयेत् तत्तुकामः पवित्राणिसर्वविष्णुदेवताःपितॄन्॥
स्नानंसमाचरेद्यत्नुक्रियांगंतत्प्रकीर्तितम् पवित्राणिसूक्तानि मलापकर्षणार्थीत प्रशस्तिलसस्तासंख्या मरस्थदे
वखातेखतीर्थंप्रुचनदीश्च क्रियास्नानंसमुद्दिष्टंस्नानंतत्रसमताक्रियेतिस्नानमेवतत्रक्रियाकर्तव्यंजयाविहितेस
र्थः देवाः वत्तुर्थेतत्तथाभागंस्नानार्थंमृदमाहरेत् तिलपुष्पकुशादीनिस्नानंचाहृद्धिमेनतेवत्तुर्थेभागेपूर्वाह्णे.
स्यैव रक्तागौरातथाश्वेतात्रिविधामृत्तिकास्मृता शुद्धदेशात्तुसंग्राह्याशर्करास्मादिवर्जिता शोषलक्षणंमृत्तिका
याःयेनच प्रकरणेबोद्धव्यं तिलाःकृष्णाःपुष्पाणियथोक्तानिकुशाःवसमाणलक्षणाः कुशग्रहणेकालविशेषः
माहकात्यायनः मासेनभस्यमावस्यांतस्यांदर्भोच्चयःस्मृतः अयातयामास्तेदर्भानियोक्तव्याःपुनःपुनः एतच्च
प्रतिदिनंग्रहणाशक्तोबोद्धव्यंकुशोत्पाटनविधिः शुचौदेशेशुचिर्भूत्वास्थित्वापूर्वोत्तरामुखः ओंकारेणात्तुमंत्रे।
णसकृदेवकुशान्स्पृशेत् सकृदेवप्रथमतएवंदर्भोत्पाटनेमंत्रः विरिंचिनामहोत्पन्नःपरमेष्ठिनिसर्गजः नुदसर्वा
णिपापानिदर्भस्वस्तिकरोभव कुशमूलेस्थितोब्रह्माकुशमध्येतुकेशवः कुशाग्रेतुहरेदेवस्त्रयोदेवाःकुशेस्थिता
श्रष्ठित्राद्यान्स्तरप्रष्णान्तम्लानांकोमलांशुभान् पितृदेवजपार्थंवसमादद्युःकुशांद्विजाः सप्तपर्णाःशुभाःदर्भास्ते।